ŚĀNKARA-VEDĀNTE TATTVA-MĪMĀṄSĀ

शांकरवेदान्ते तत्त्वमीमांसा

Dr. K. P. SINHA

•

VISHWAVIDYALAYA PRAKASHAN

ŚAṄKARA-VEDĀNTE

TATTVA-MĪMĀṀSA

Dr. K. P. Sinha
Sanskrit Department
University of Gauhati

VISHWAVIDYALAYA PRAKASHAN, VARANASI

First Edition : 1982

Rs. 25.00

Published by

VISHWAVIDYALAYA PRAKASHAN

Chowk, Varanasi

Printed at

SANMATI MUDRANALAYA, VARANASI

शांकरवेदान्ते तत्त्वमीमांसा

डा० कालीप्रसाद सिंहः

अध्यापकः, संस्कृत-विभागः

गुवाहाटी विश्वविद्यालयः

विश्वविद्यालय प्रकाशन, वाराणसी

ABOUT THE AUTHOR

Dr. K. P. Sinha passed M. A. in Sanskrit from the Jadavpur University in 1963. He obtained the Ph. D. Degree from the same University in 1968 and the D. Litt. Degree from the Burdwan University in 1982. Dr. Sinha is a devoted researcher in different fields of Indian Philosophy. Besides, he is the first exponent of the Bishnupriya Manipuri linguistics.

WORKS OF DR. SINHA

1. Nyāya-Darśana-Vimarśaḥ
2. The Bishnupriya Manipuri Language
3. Bishnupriya Manipuri Bhāṣātattvar Rūparekhā
4. Nairātmya-vāda—The Buddhist Theory of Not-Self
5. Śāṅkara Vedānte Tattva-Mīmāṅsā
6. Śāṅkara Vedānte Jñāna-Mīmāṅsa (in the press)
7. Reflexions on Indian Philosophy (in the press)
8. An Etymological Dictionary of Bishnupriya Manipuri (in the press)

PREFACE

The present work is an essay-type exposition of the main tenets of the Advaita-Vedānta metaphysics. In it, I have dealt not so much with the deep and knotty problems of the Advaita-Vedānta philosophy, but with the general problems, a proper knowledge of which is necessary for having a clear and thorough concept of the metaphysical aspect of the school.*

I must admit that this is not an original work; rather it is a compilation of the topics found in the original texts of the school of Advaita-Vedānta. It is based principally on the commentary of Śaṅkara on the *Brahma-sūtra*, the *Vedānta-paribhāṣā* and the *Vedānta-sāra*. Some topics from the *Advaita-siddhi* and the *Tattva-pradīpikā* have also been incorporated in it.

The Advaita-Vedāntic concepts of the world, the individual self, Brahman and liberation have mainly been discussed in this book, and an attempt has been made to reconcile the different views of different thinkers of this school.

Though there are numerous works in English on the subject, I have endeavoured to compile this work with

* The exposition of the epistemological aspect of this school will be found in the *Śāṅkara-Vedānte Jñāna-Mīmāṅsā* to come out shortly.

the main object that the readers may be acquainted with the traditional *śāstras* very easily by overcoming the difficulties faced in following the commentaries and sub-commentaries on the original texts.

I am obliged to Dr. Hiralal Tiwari of the Department of Hindi, Gauhati University for his help in getting the book published. I must also express my gratefulness to Mr. P. D. Modi of Vishwavidyalaya Prakashan, Varanasi, who has taken keen interest in publishing the book within a short span of time.

K. P. Sinha

विषयनुक्रमणिका

प्रथमः परिच्छेदः **पृष्ठाङ्काः**

१. वेदान्तशब्दस्य अर्थः १
२. अनुबन्धः ३
३. शांकरदर्शनसारः ९
४. सत्तात्रैविध्यम् १२
५. अध्यारोपापवादौ १४
६. भामतीविवरणप्रस्थानयोः भेदः १७

द्वितीयेः परिच्छेदः

१. ब्रह्मणः सगुणत्वं निर्गुणत्वं च १९
भूमा २२
२. ब्रह्मणः तटस्थलक्षणम् २४
सृष्टिवाक्यानां तात्पर्यम् २७
३. ब्रह्मणः स्वरूपलक्षणम् २८
४. ब्रह्मणः अभिन्नोपादाननिमित्तकारणत्वम् ३०
५. सृष्टिप्रयोजनविचारः ३८
६. अभावकारणवादखण्डनम् ३९
७. भेदाभेदविचारः ४४
(क) भोक्त्रापत्त्यधिकरणम् ४४
(ख) आरम्भणाधिकरणम् ४६
८. सत्कारणवादः ५०
(क) एकमेवाद्वितीयम् ५४
(ख) एकविज्ञानेन सर्वविज्ञानम् ५६

तृतीयः परिच्छेदः

१. कोशपञ्चकम् ६३
२. ईश्वरः ६६
३. प्राज्ञः ७०
४. हिरण्यगर्भः ७३
५. तैजसः ७५
६. विराट् ७७
७. विश्वः ७८
८. तुरीयचैतन्यम् ७९
९. साक्षी ८१
(क) साक्षिस्वीकारे प्रयोजनम् ८२
(ख) साक्षिणः जीवेश्वरभिन्नत्वम् ८४
१०. साक्षिद्वैविध्यम् ८६

चतुर्थ परिच्छेदः

१. आत्मस्वरूपे मतभेदः ९२
२. अद्वैतवादे आत्मस्वरूपम् ९७
३. आत्मनः चिद्रूपत्वम् १०१
४. जीवात्मपरिमाणम् १०५
५. अवच्छेदवादः १०९
६. प्रतिबिम्बवादः ११४
आभासवादः १२३
७. जीवस्य अवस्थात्रितयम् १२४
८. एकजीववादः १२८
९. अनेकजीववादः १३१

पञ्चमः परिच्छेदः

१. जगतः स्वरूपम् १३५
२. परिणामविवर्तयोः भेदः १३७
३. मिथ्यात्वलक्षणम् १३९
४. जगन्मिथ्यात्वे प्रमाणम् १४३
५. मिथ्यात्वमिथ्यात्वस्थापनम् १४७
६. सृष्टिक्रमः-पञ्चीकरणम् १५०
७. त्रिवृत्करणम् १५५
८. दृष्टिसृष्टिवादः १५८
९. प्रलयचातुर्विध्यम् १६१

षष्ठः परिच्छेदः

१. मोक्षस्वरूपम् १६८
२. ज्ञानकर्मसमुच्चयविचारः १७१
३. ज्ञानस्य अन्तरङ्गसाधनानि १७७
४. सगुणोपासनस्य ब्रह्मज्ञानसाधनत्वम् १८२
५. ब्रह्मज्ञानकरणविचारः १८३
६. 'तत्त्वमसि'-वाक्यार्थः १९१
७. श्रवणादौ विधिविचारः २०३
८. समाधिः २०९
९. समाधेरष्टाङ्गानि २१२
१०. जीवन्मुक्तिः २१५
११. विदेहमुक्तिः २२०
(क) सद्योमुक्तिः २२१
(ख) क्रममुक्तिः २२१

ससङ्केतग्रन्थतालिका

ग्रन्थनाम	ग्रन्थकारनाम	प्रकाशनस्थानम्	प्रकाशनकालः	संकेतः
१. अद्वैतसिद्धिः	मधुसूदन सरस्वती	निर्णयसागर प्रेस	१९३७	अ. सि.
२. ईषोपनिषत्	,, ,,	,, ,,	,,	ई. उ.
३. उपदेश-साहस्री	शङ्कराचार्यः	,, ,,	,,	उप. सा.
४. ऐतरेयोपनिषत्	,,	,, ,,	,,	ऐत. उ.
५. कठोपनिषत्	,,	,, ,,	,,	कठ
६. केनोपनिषत्	,,	,, ,,	,,	केन
७. कौषीतक्युपनिषत्	,,	,, ,,	,,	कौ. उ.
८. छान्दोग्योपनिषत्	,,	,, ,,	,,	छा. उ.
९. तत्त्वप्रदीपिका (चित्सुखी)	चित्सुखाचार्यः	उदासीन संस्कृत-विद्यालयः	१९५६	चि. सु.
१०. तैत्तिरीयोपनिषत्	,,	,,	,,	तै. उ.
११. नैष्कर्म्यसिद्धिः	सुरेश्वराचार्यः	उद्बोधन कार्यालय	१३६०	नै. सि.
१२. पञ्चदशी	विद्यारण्यमुनिः	निर्णयसागर प्रेस	१९४९	प. द.

१३. पञ्चपादिका	पद्मपादाचार्यः	मद्राज गवट् ओरियण्टल सीरीज	१९५८	प. पा.
१४. पञ्चपादिकाविवरणं	प्रकाशात्मयतिः	,,	,,	विव.
१५. प्रश्नोपनिषत्	,,	,,	,,	प्र. उ.
१६. ब्रह्मसूत्रशांकरभाष्यम् (भाभती-कल्पतरुपरिमल-समेतम्)		निर्णयसागर प्रेस	१९३८	श. भा.
१७. बृहदारण्यकोपनिषत्				बृह. उ.
१८. भारतीयदर्शने मुक्तिवादः	डा. विजयभूषण वन्द्योपाध्याय		१३६१	
१९. भाषापरिच्छेदः				भा. प.
माण्डूक्योपनिषत् (गौडपादकारिकासमेता)		गीता प्रेस		मा. उ.
२०. मुण्डकोपनिषत्	,,	,,	,,	मु. उ.
२१. योगसूत्रम्	पतञ्जलिः	,,	,,	यो. सू.
२२. वाक्यसुधा	शङ्कराचार्यः	,,	,,	वा. सु.

२३.	विवरणप्रमेयसंग्रहः (प्रमथनाथतर्कभूषणेन सम्पादितः)	विद्यारण्यमुनीश्वरः	वसुमती साहित्य मन्दिर	,,	वि. प्र. स.
२४.	वेदान्तदर्शन-अद्वैतवाद	डा. आशुतोष भट्टाचार्य शास्त्री	कलिकाता विश्वविद्यालय	१९६२	,,
२५.	वेदान्तदर्शने परमार्थतत्त्व	डा. सीतानाथ गोस्वामी	,,	१९५७	,,
२६.	वेदान्तपरिभाषा (पञ्चानन भट्टाचार्यशास्त्रिसम्पादिता)	धर्मराजाध्वरीन्द्रः		शक. १८८३	
२७.	वेदान्तपरिभाषा (शिखा-मणि-मणिप्रभासमेता)	,,	श्रीवेङ्कटेश्वर स्टीम मुद्रणालय	१९८५	
२८.	वेदान्तसारः (ब्रह्मचारि मेधाचैतन्यसम्पादितः)	सदानन्दयोगीन्द्रः		शक. १८९०	वे. सा.
२९.	वैयासकन्यायमाला	भारतीतीर्थमुनिः	आनन्दआश्रम		
३०.	श्रीमद्भगवद्गीता (शाङ्करभाष्यसमेता)	,,	निर्णयसागर प्रेस		गी.
३१.	श्वेताश्वतरोपनिषत्	,,	,,	,,	श्वे. उ.

३२.	संक्षेपशारीरकम्	सर्वज्ञात्ममुनिः	उदासीन संस्कृत विद्यालय	सं. २०१४	स. शा.
३३.	सम्बन्धवार्तिक (दिनेश-चन्द्रशास्त्रि-सम्पादितम्)	सुरेश्वराचार्यः	,,	१३५७	स. वा.
३४.	सर्वदर्शनसंग्रहः	माधवाचार्यः	आनन्दाश्रम	,,	स. द.
३५.	सांख्यसूत्रम्	कपिलः	,,		सा. सू.
३६.	सिद्धान्तलेशसंग्रहः (जीवा-नन्दविद्यासागर-सम्पादितः	अप्पयदीक्षितः		१८९७	सि. ले.

[क. त. = कल्पतरुः, परि. = परिमलः, शि. म. = शिखामणिः (टीका, वेदान्त परिभाषा), सि. मु. = सिद्धान्तमुक्तावली (टीका भाषापरिच्छेदः)]

शांकरवेदान्ते तत्त्वमीमांसा

ŚĀṄKARA-VEDĀNTE TATTVA-MĪMĀṄSA

प्रथमः परिच्छेदः

१. वेदान्त-शब्दस्य अर्थः

वेदान्त-शब्दस्य मुख्य-गौणभेदेन अर्थभेदोऽस्ति। तथाहि मुख्यतः वेदान्तशब्दः वेदभागविशेषस्य वाचकः, गौणतश्च शारीरकसूत्रादीनाम्। तदुक्तं सदानन्दयोगीन्द्रैः—"वेदान्तो नाम उपनिषत्प्रमाणं शारीरकसूत्रादीनि च"[1] इति। वेदान्तः मुख्यतः उपनिषत् एव। वेदानाम् अन्तः अन्तिमभागः सारभागो वा इति व्युत्पत्तेः, उपनिषदश्च उभयरूपत्वात्।

उप-नि-पूर्वस्य षद्-धातोः क्विप्-प्रत्ययेन उपनिषद् इति रूपं सिद्धम्। तत्र उपशब्दः सामीप्यम् आचष्टे, तच्च संकोचकाभावात् सर्वान्तरे प्रत्यगात्मनि पर्यवस्यति। निशब्दो निश्चयवचनः। सोऽपि तत्त्वमेव निश्चिनोति, तन्नैकट्यवाच्युपशब्दसामानाधिकरण्यात्। षद्-धातुश्च विशरणगत्यवसादनेषु अर्थेषु प्रयुज्यते। तस्मात् ब्रह्मविद्यासंशीलिनां संसारसारतामतिं सादयति=विषादयति, शिथिलयति वा, परमश्रेयोरूपं प्रत्यगात्मानं सादयति=गमयतीति वा दुःखजन्मप्रवृत्त्यादि मूलम् अज्ञानं सादयति=उन्मूलयतीति वा उपनिषत्। तथा चोक्तं सुरेश्वराचार्यपादैः"—

तत्र चोपनिषच्छब्दो ब्रह्मविद्यैकगोचरः।
तत्रैव चास्य सद्भावादभिधार्थस्य तत् कुतः॥
उपोपसर्गः सामीप्ये तत्प्रतीचि समाप्यते।
त्रिविधस्य सदर्थस्य नि-शब्दोऽपि विशेषणम्॥
उपनीयेयमात्मानं ब्रह्मापास्तद्वयं यतः।
निहन्त्यविद्यां तज्जं च तस्मादुपनिषद्भवेत्॥

निहत्यानर्थमूलं स्वाविद्यां प्रत्यक्तया परम् ।
गमयत्यस्तसंभेदमतो वोपनिषद्भवेत् ॥
प्रवृत्तिहेतून्निःशेषांस्तन्मूलोच्छेदकत्वतः ।
यतोऽवसादयेद्विद्या तस्मादुपनिषन्मता ॥२॥[२] इति

एवञ्च अविद्यामूलोच्छेदकारिणी ब्रह्मगमयित्री ब्रह्मविद्या एव उपनिषद् इति सारार्थः। उक्तञ्च रामतीर्थेन—'उपनिषच्छब्दः ब्रह्मात्मैक्यसाक्षात्कारविषयः'[3] इति। लाङ्गलं जीवनम् इतिवत्[४] यथोक्तविद्याबोधित्वात् सत्यज्ञानरूपायाः प्रमायाः करणभूतः वेदानां सर्वशाखासु उत्तरभागे पठ्यमानः ग्रन्थोऽपि उपचारात् उपनिषन्नामा भवेत्। एवंरूपा अविद्यामूलोच्छेदकारिणी ब्रह्म-गमयित्री ब्रह्मविद्यारूपा उपनिषत् एव प्रमाणम् = उपनिषत्प्रमाणं, उपनिषत् यत्र प्रमाणम् इति वा। यथार्थज्ञानरूपायाः प्रमायाः करणं प्रमाणम्। तथा च उपनिषत् एव प्रमाणं=प्रमाकरणम् उपनिषत्प्रमाणम्=उपनिषद्रूपं प्रमाणम्। स वेदान्तः इत्यर्थः। "उपनिषद्रूपम् आत्मनः प्रमाणम् इत्यर्थः। यद्वा उपनिषच्छब्देन आत्मज्ञानम् उच्यते, तस्य प्रमाणम् कारणम् इत्यर्थः" इति बाल-बोधिन्याम्। तदुपकारीणि=वेदान्तवाक्यसंग्राहकानि वेदान्तार्थ-विचारानुकूलानीति यावत्। तदनुकूलत्वं च वेदान्तवाक्यप्रमेया-सम्भावनापोहद्वारा, न तु प्रमित्युत्पत्तौ तत्फले वा साक्षात्-विचारशास्त्रस्य अङ्गभावः, तथा सति वेदान्तवाक्यानां सापेक्षता-प्रसङ्गात्। तदुक्तम् अभियुक्तैः "स्वाध्यायवन्न करणं घटते विचारो नाप्यङ्गमस्य परमात्मधियः प्रसूतौ। सापेक्षता पतति—वेदगिरस्तथात्वे ब्रह्मात्मनः प्रमितिजन्मनि तन्न युक्तम्।"[५] इति। शरीरमेव शारीरं तत्र भवो जीवः शारीरकः। स सूत्र्यते—याथातथ्येन निरूप्यते यैः तानि शारीरकसूत्राणि, वादरायणकृतानि 'अथातो ब्रह्मजिज्ञासा' इत्यादीनि। आदिशब्दः भाष्यादिसंग्रहार्थः। यद्वा शारीरकस्य सूत्राणि तद्याथात्म्यवादिवेदान्तार्थसंग्रहवाक्यानि

"अथातो ब्रह्मजिज्ञासा" इत्यादीनि। आदिशब्देन भगवद्गीताद्यध्यात्मशास्त्राणि गृह्यन्ते, तेषाम् अपि उपनिषच्छब्दवाच्यत्वादिति भावः। चशब्दो वेदान्तशब्दानुषङ्गार्थः, गौणार्थेन शारीरकसूत्रादीनि वेदान्तशब्दवाच्यानि भवन्ति इति भावः। तथा च वेदानामन्तोऽवसानभागो वेदान्तः इति व्युत्पत्तियोगात् मुख्यो वेदान्तशब्दो वेदभागभेदेषु, शारीरकादौ तूपचरितः इति व्युत्पादितः।

एवं वेदान्तस्य प्रस्थानत्रयम् अङ्गीक्रियते—(१) श्रुतिप्रस्थानम्, यथा उपनिषत्, (२) स्मृतिप्रस्थानम्, गीतादिकम् (३) न्यायप्रस्थानम्, ब्रह्मसूत्रादिकम्। तत्र उपनिषदि ऋषीणां सत्यद्रष्टॄणां वा सत्योपलब्ध्यादिकं विधृतम्, गीतादौ ऋषिभिः विधृतं उपलब्ध्यादिकं भाषान्तरेण उपस्थापितम्। ब्रह्मसूत्रादौ तु श्रुतिस्मृतिवचनादिकं युक्तिसहायेन दृढीकृतम्।

२. अनुबन्धः

पुरुषम् अनुबध्नाति स्वज्ञानेन प्रेरयति इत्यनुबन्धः। यद्वा अनुबध्यते अनेन इति करणे घञ्। अधिकारिविषयसम्बन्धप्रयोजनरूपम् अनुबन्धचतुष्टयम्। शास्त्रादौ च एतदनुबन्धचतुष्टयं निर्णेयं भवति, अन्यथा शास्त्रे प्रवृत्तिर्न स्यात्। तदुक्तं "ज्ञातार्थं ज्ञानसम्बन्धं श्रोतुं श्रोता प्रवर्तते। शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः॥ इति। भट्टपादैः अपि उक्तम्—"सर्वस्यैव हि शास्त्रस्य कर्मणो वापि कस्यचित्। यावत् प्रयोजनं नोक्तं तावत् तत् केन गृह्यते॥" इति। अतएव विषयप्रयोजनादीनाम् शास्त्रारम्भप्रयोजकत्वात् हेतुत्वम्।

तत्र स्वार्थप्रतिपत्तारम् अनाश्रित्य शास्त्रस्य प्रवृत्त्ययोगात् आदौ अधिकारो अपेक्षितः। तस्य च विषयबोधम् अन्तरेण अप्रवृत्तेः

विषयस्य तदानन्तर्यम्। विषयस्य च शक्यप्रतिपाद्यत्वसिद्धये सम्बन्धस्य विषयाद् आनन्तर्य्यम्। प्रयोजनस्य चरमत्वं प्रसिद्धम्।

अधिकारी

श्रवण-मनन-निदिध्यासनानि ब्रह्मानुभवसाधनानि। तत्र अधिकारिणं विना श्रवणादीनां प्रवृत्त्ययोगात्, श्रवणादिषु केषाम् अधिकारः इति प्रश्ने उच्यते—श्रवणादिषु मुमुक्षूणामेव अधिकारः। श्रवणादेः मोक्षरूपफलजनकत्वात् मोक्षकामस्यैव तत्र अधिकारः उचितः। काम्ये कर्मणि फलकामस्य अधिकारित्वात् मोक्षजनकं श्रवणादिकम् अपि मोक्षकामम् एव तत्र अधिकरोति इति भावः। तथा च पञ्चपादिकायां ब्रह्मज्ञानकामेनेदं शास्त्रं श्रोतव्यम् इति भावः इति। तस्मात् मुमुक्षा एव अधिकारिणः मुख्यं विशेषणम् इति सूचितम्।

ननु एवमपि श्रवणादिषु सर्वेषाम् अधिकारः स्यात्, सर्वेषां मुमुक्षुत्वात्, दुःखनिवृत्तिरूपस्य आनन्दावाप्तिरूपस्य वा मोक्षस्य सर्वैः अभिलषितत्वात् इति चेत्। उच्यते—मुमुक्षायां च नित्यानित्य-वस्तुविवेकस्य, इहामुत्रफलभोगविरागस्य शमदमोपरतितितिक्षा-समाधानश्रद्धानां च विनियोगः। ब्रह्मैव नित्यं ततः अन्यत् सर्वम् अनित्यम्, यत् नित्यं तत् सुखम्, यत् अनित्यं तत् दुःखम्, इत्येवं यः नित्यानित्यवस्तुविवेकः तस्य मुमुक्षायां साधनत्वम्।

एतन्नित्यानित्यविवेकफलभूतं मुमुक्षाहेत्वन्तरम् इहामुत्रफल-भोगविरागः। ऐहिकानां स्रक्चन्दनादिविषयभोगानां कर्मजन्यतया अनित्यत्वम्, अतएव दुःखजनकत्वम्। एवम् आमुष्मिकानां स्वर्गादि-भोगानामपि कर्मजन्यत्वेन अनित्यत्वं दुःखजनकत्वं च इति ज्ञानात् तेभ्यः तेभ्यः विरक्तिः जायते। सोऽयं विरागः नित्यानित्यवस्तु-विवेकाद् जायते इति विवेकफलभूतः इहामुत्रफलभोगविरागः मोक्षस्य हेत्वन्तरम्।

तादृशवैराग्यस्य फलभूताः मुमुक्षाहेतवः शमदमोपरति-तितिक्षा-समाधानश्रद्धाः। शमस्तावत् अन्तरिन्द्रियनिग्रहः = श्रवणादि-व्यतिरिक्तविषयेभ्यः मनसः निवर्तनम्। दमः बाह्येन्द्रियनिग्रहः = बाह्येन्द्रियाणां श्रवणादिव्यतिरिक्तविषयेभ्यः निवर्तनम्। विक्षेपा-भावः उपरतिः = निवर्तितानाम् इन्द्रियाणां श्रवणादिव्यतिरिक्त-विषयेभ्यः उपरमणम्, विहितानां कर्म्मणां विधिना परित्यागः वा उपरतिः। तितिक्षा = शीतोष्णादिद्वन्द्वसहिष्णुता। चित्तैकाग्र्यं समाधानम् = निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषये च समाधिः समाधानम्। गुरुवेदान्तवाक्येषु विश्वासः श्रद्धा।

तत्र उपरमशब्देन संन्यासः अभिधीयते। तथा च संन्यासिनाम् एव श्रवणादौ अधिकारः, न अन्येषाम् इति भाष्यानुवर्तिनः। वार्तिकानुवर्तिनां मते तु नायम् उपरतिशब्दः संन्यासवाचकः इति न सन्न्यासिमात्रस्य श्रवणादौ अधिकारः। ननु, मा अस्तु श्रवणादौ सन्न्यासिमात्रस्य अधिकारः, गृहस्थादीनाम् अधिकारस्तु कथं स्यात्, उपरतिशब्दार्थस्य कर्माभावस्य एषणाभावस्य वा सन्न्यासाधीन-त्वात्। उच्यते—विक्षेपाभावः उपरतिः। तथा च—गृहस्थादीनाम् अपि श्रवणादौ अधिकारः निर्बाधः स्यात्, अधिकारनिमित्तस्य विक्षेपाभावस्य तत्रापि सम्भवात्। जनकादिभिः अपि ब्रह्मविचारस्य श्रूयमाणत्वात् सर्वाश्रमसाधारणं श्रवणादिविधानम् इति अवगन्त-व्यम्। वस्तुतस्तु नायं पक्षः आचार्य्यसम्मतः, सूत्रभाष्यादिषु अन्यथा-दर्शनात्। यथा तथा वा भवतु, उक्तसाधनचतुष्टयसम्पन्नः एव श्रवणादौ अधिकारी इति सर्ववेदान्तिसम्मतम्। तथा च 'अथातो ब्रह्मजिज्ञासा' इति सूत्रभाष्ये भगवता भाष्यकारेण उक्तम्—'नित्यानित्यवस्तुविवेकः इहामुत्रफलभोगविरागः शमदमादिसाधन-सम्पत् मुमुक्षुत्वं च। तेषु हि सत्सु प्रागपि धर्मजिज्ञासायाः, ऊर्ध्वं च शक्यते ब्रह्म जिज्ञासितुं, ज्ञातुं च, न विपर्य्यये। तस्माद् अथ शब्देन यथोक्तसाधनसम्पत्त्यनन्तरम् इत्युपदिश्यते' इति।

साधनचतुष्टये च निर्मलचित्तस्य प्रमातुः पुरुषस्य एव इच्छा जायते। प्रमाता नाम लौकिकवैदिकव्यवहारेषु अभ्रान्तः जीवः। चित्तनैर्मल्यं च वेदाध्ययनात् नित्यकर्मादीनाम् अनुष्ठानात् च सम्भवति। तदुक्तं सदानन्दैः—"विधिवदधीतवेदवेदाङ्गत्वेन आपाततः अधिगताखिलवेदार्थः अस्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनपुरःसरं नित्यनैमित्तिकप्रायश्चित्तोपासनेन निर्गत-निखिलकल्मषतया नितान्तनिर्मलस्वान्तः" इति।

वेदानां शिक्षादीनां वेदाङ्गानां च अध्ययनेन येन अखिलः वेदार्थः आपाततः अधिगतः स अधिकारी। सर्ववेदार्थरहस्ये ज्ञाते सति उत्तरग्रन्थस्य व्यर्थत्वप्रसंगः, तद्वैयर्थ्यपरिहाराय आपाततः इत्युक्तम्। ननु, अनधीतवेदानाम् अपि विदुरादीनां ज्ञानोत्पत्ति-दर्शनात् अध्ययनस्य तत्प्रयुक्तकर्मानुष्ठानस्य च नावश्यकत्वम् इति चेत्। उच्यते तेषाम् आधुनिकाध्ययनाद्यभावे अपि जन्मान्तरीया-ध्ययनादिना चित्तपरिपाकता इति बोद्धव्यम्।

अपि च स्वर्गादीष्टसाधनानि ज्योतिष्टोमादीनि काम्यानि, नरकाद्यनिष्टसाधनानि ब्रह्महननादीनि निषिद्धानि च परिवर्ज्य, अकरणे प्रत्यवायसाधनानि सन्ध्यावन्दनादीनि नित्यानि, पुत्रजन्मा-द्यनुबन्धीनि जातेष्ट्यादीनि नैमित्तिकानि, सगुणब्रह्मविषयकमान-सव्यापाररूपाणि शाण्डिल्यविद्यादीनि उपासनानि च अनुष्ठाय यः निःशेषसकलकल्मषतया नितान्तनिर्मलान्तःकरणः सञ्जातः, स एव साधनचतुष्टये प्रवर्तते इति स एव अधिकारी वेदान्तशास्त्रे, 'शान्तो दान्तः' इत्यादिश्रुतेः। तदुक्तं समासेन उपदेशसाहस्र्याम्—'प्रशान्त-चित्ताय जितेन्द्रियाय प्रक्षीणदोषाय यथोक्तकारिणे। गुणान्वितायाऽनुगताय सर्वदा प्रदेयमेतत् सकलं मुमुक्षवे'[८] इति। प्रशान्तचित्ताय जितेन्द्रियाय = शमदमादिसाधनषट्परायणाय, प्रक्षीणदोषाय = प्रायश्चित्तोपासनापरायणाय, यथोक्तकारिणे = नित्यनैमित्तिककर्मा-नुष्ठानपरायणाय, गुणान्विताय = नित्यानित्यवस्तुविवेकेहामुत्रफल-

भोगविरागसम्पन्नाय अनुगताय = गुरूपदेशपालनतत्पराय, मुमुक्षवे = मुक्तीच्छापरायणाय एतत् वेदान्तशास्त्रं प्रदेयम् इत्यर्थः।

अत्र इदं ज्ञातव्यम्—न तावत् वेदाध्ययनं ब्रह्मजिज्ञासाधिकार-हेतुः, तस्य धर्मब्रह्मजिज्ञासयोः साधारणत्वात् तन्मात्रेण इह नियमेन प्रवृत्त्यनुपपत्तेः। नापि धर्म्मविचारः, प्रागपि धर्म्मविचारात् अधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेः। नापि धर्मानुष्ठानम् इह जिज्ञासाहेतुः, विनापि धर्मानुष्ठानं ब्रह्मचर्यादेव विरक्तस्य ब्रह्मजिज्ञासादर्शनात्। तथा च श्रुतिः "यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत्"[१] इति। अतो ब्रह्मजिज्ञासा यस्मिन् सति नियमेन जायते यस्मिन् असति नैव जायते, तदेव तस्याः साधनम्। तच्च साधन-चतुष्टयम् इति साधनचतुष्टयसम्पन्न एव अधिकारी। वेदाध्यय-नादिकं तु चित्तनैर्मल्यं विधाय साधनचतुष्टये पुरुषान् प्रवर्तयति इति गौणत्वेनैव तदुपयोगित्वम्।

विषयः

जीवब्रह्मैक्यं शुद्धचैतन्यं प्रमेयं विषयः, तत्रैव वेदान्तानां तात्पर्य्यात्। जीवात्मना अभिन्नम्, अविद्यारोपितसर्वज्ञत्वकिञ्चिज्-ज्ञत्वादिविरुद्धधर्मपरित्यागेन अविशिष्टं शुद्धं चैतन्यं ज्ञेयस्वरूपमेव सर्वेषां वेदान्तवाक्यानां विषयः इत्यर्थः। तथाहि—'श्लोकार्धेन प्रवक्ष्यामि यदुक्तं ग्रन्थकोटिभिः। ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः॥' क्षीरनीरवत् परस्परभिन्नयोः जीवब्रह्मणोः मिश्रीभावः इति शंका मा भूत् इति शुद्धचैतन्यम् इत्याह। चैतन्यस्य शुद्धत्वं सर्वधर्मातीतत्वम् एकरसत्वम्। ननु कथं शुद्धचैतन्यस्य विचारविषयत्वं, यावता प्रागपि विचारात् तत् स्वप्रकाशं स्वयमेव अवभासते इत्याशंक्य स्वरूपेण अवभासमानत्वेऽपि परिपूर्ण-सच्चिदानन्दरूपतया प्रत्यक्स्वरूपतया च अज्ञायमानत्वात् विषयतोपपत्तिरित्याह—प्रमेयम् इति। प्रमेयत्वम् अज्ञातत्वम्।

उपक्रमोपसंहारादिभिः लिङ्गैः वेदान्ततात्पर्य्ये निरूपिते सति तस्मिन् प्रमेयभूते प्रत्यक्स्वरूपे ब्रह्मणि एव सर्वेषां पर्य्यवसानात् ब्रह्मणः एव विषयत्वम् वेदान्तानाम् ।

सम्बन्धः

सम्बन्धस्तु जीवब्रह्मैक्यरूपप्रमेयस्य तत्प्रतिपादकोपनिषद्-रूपप्रमाणस्य च बोध्यबोधकभावः । बोध्यस्य = ब्रह्मात्मैक्यस्वरूपस्य बोधकस्य = वेदान्तशास्त्रस्य च बोध्यबोधकभावः एव सम्बन्धः इत्यर्थः । ननु कथं यथोक्तप्रमेयस्य उपनिषत्प्रमाणबोध्यत्वम्, निर्धर्मकस्य तस्य शब्दशक्तिगोचरत्वायोगात् इति चेत् । कः अभिप्रायः ? शब्दादिहीनस्य वाच्यत्वानुपपत्तिः इति चेत् । न, अनुक्तोपालम्भात् । असङ्गस्य लक्ष्यत्वानुपपत्तिः इति चेत्, न, लक्षणावृत्याश्रयणेन ब्रह्मात्मैक्यप्रतिबोधसम्भवात् ।

प्रयोजनम्

प्रयोजनं तु तदैक्यप्रमेयगताज्ञाननिवृत्तिः स्वरूपानन्दावाप्तिश्च । तच्च तदैक्यं, तदेव प्रमेयम्, तद्गतं तद्विषयकं यदज्ञानं तस्य निवृत्तिः इति विग्रहः । चिन्मात्रविषयाज्ञाननिवृत्तिः प्रयोजनम् इत्यर्थः । ब्रह्मात्मैकत्वलक्षणचिन्मात्रगताज्ञानस्य तत्कार्यभूतसकल-प्रपञ्चस्य च निवृत्तिः पुनरुत्पत्त्यभावरूपा स्वरूपाखण्डानन्दप्राप्तिः फलम् । ननु लोके अप्राप्तस्य क्रियासाध्यस्य स्वर्गादेः पुरुषार्थत्वेन फलत्वं दृष्टम्, अत्र तु नित्यप्राप्तस्य आत्मस्वरूपस्य क्रियासाध्यत्वाभावेन पुरुषार्थत्वाभावात् कथं फलत्वम् इति चेत् । न, क्रियासाध्यस्य एव पुरुषार्थत्वम् इति नियमाभावात् । यथा लोके कस्यचित् विस्मृत-कण्ठमणेः तत्प्रयुक्तशोकाग्निसन्दह्यमानस्य आप्तोपदेशात् उत्तर-कालं स्वकण्ठगतचामीकरप्राप्तेः अपि पुरुषार्थत्वात् फलत्वं दृष्टम्, एवम् अत्रापि नित्यप्राप्तस्य आत्मनः अज्ञानमोहान्धकारावृतत्वेन

विस्मृतस्वरूपस्य पुरुषस्य गुरुश्रुतिवाक्यश्रवणात् अनन्तरं अज्ञानमोहान्धकारनिवृत्तौ सत्यां स्वयं प्रकाशमानचिद्रूपस्य सिद्धस्य अपि आत्मनः फलत्वम् उपचर्यते इति भावः। तथा च श्रुतिः—'तरति शोकमात्मवित्',[10] 'ब्रह्म वेद ब्रह्मैव भवति'[11] इति।

३. शाङ्करदर्शन-सारः

ब्रह्मैव केवलं नित्यं सत्यं वस्तु, ब्रह्मभिन्नं सर्वं मिथ्या। ब्रह्मणश्च विभावद्वयम् अस्ति—निर्विशेषविभावः सविशेषविभावश्च। तत्र निर्गुणं निर्विशेषं ब्रह्म एव पारमार्थिकं परं सत्यम्, सगुणं सविशेषं ब्रह्म तु औपाधिकम्, तत्र अविद्यायाः उपाधित्वात्। इदमेव सगुणं सविशेषं ब्रह्म सृष्टिस्थितिप्रलयकर्ता ईश्वरः इति उच्यते। अयम् ईश्वरः अविद्योपहितत्वात् अपारमार्थिकः मिथ्याभूतः। वस्तुतस्तु एकमेव तत्त्वं निरुपाधिकं सत् ब्रह्मरूपेण, सोपाधिकं सत् ईश्वररूपेण वर्तते इति ईश्वरः ब्रह्मणः न भिन्नः। एवं जीवब्रह्मणोः अपि वस्तुतः न कश्चन भेदः, तत्त्वमस्यादिश्रुतेः। तथापि अज्ञानवशात् एव जीवः बद्धः इव सन् स्वकीयं ब्रह्मस्वरूपं नावगच्छति। अज्ञाने दूरीकृते जीवः स्वकीयं ब्रह्मभावम् अनुभवति। इदं जगदपि अविद्यावशात् ब्रह्मणि आरोपितम् इति तदपि मिथ्याभूतम्। वस्तुतस्तु एकमेव ब्रह्म सर्वत्र अवतिष्ठते इति ब्रह्मव्यतिरिक्तं सर्वं मिथ्या केवलं ब्रह्मैव सत्यम् इति अद्वैतिनाम् आशयः।

तत्र सच्चिदानन्दरूपत्वं ब्रह्मणः स्वरूपलक्षणम्। तथा च श्रुतिः—'सत्यं ज्ञानमनन्तं ब्रह्म',[12] 'विज्ञानमानन्दं ब्रह्म'[13] इति यद्यपि ब्रह्मणः स्वरूपकथनं न सम्भवति 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह'[14] 'न तत्र चक्षुर्गच्छति न वाग् गच्छति'[15] इत्यादि श्रुतेः, तथापि एतद्वर्जं ब्रह्मज्ञापकवाक्यं न सम्भवति इति स्वरूपलक्षणमिदम्। न च एते सत्यादयः ब्रह्मणः धर्माः, तथा सति ब्रह्मणः धर्मित्वेन अद्वैतहानिप्रसंगात्, अनित्यत्वप्रसङ्गाच्च।

न च एतेन ब्रह्मणः स्वरूपत्रयं बोद्धव्यम्, अद्वैतहानिप्रसंगात्। तथा च सद्भिन्नव्यावृत्तं चिद्भिन्नव्यावृत्तं अनानन्दव्यावृत्तं च ब्रह्म इति व्यावृत्तिप्रदर्शनेन, सदेव ज्ञानं, ज्ञानमेव आनन्दः इति व्याख्यानेन वा एकस्मिन् एव स्वरूपे पर्यवसानात् ब्रह्मणः स्वरूपत्रयत्वनिरासः इति बोद्धव्यम्। तस्मात् अपरिमितसत्स्वरूपम् अपरिमितज्ञानस्वरूपम् अपरिमितानन्दस्वरूपं च ब्रह्म इति सिद्धम्।

एतच्च अपरिमितं सत्यज्ञानानन्दं ब्रह्म लौकिकाः वयं बोद्धुं न शक्नुमः, तस्य लौकिकबुद्ध्यगोचरत्वात्। अतः 'शाखाग्रे चन्द्रः' इतिवत् 'जन्माद्यस्य यतः' इति सूत्रोपात्तं ब्रह्मणः तटस्थलक्षणमुच्यते जगज्जन्मादिकारणं ब्रह्म इति। तथा च श्रुतिः—'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यं प्रयन्त्यभिसंविशन्ति' इति। सर्वकारणकारणं हि ब्रह्म इति, अपञ्चीकृतानि पञ्चभूतानि तस्य कार्य्याणि। तथा च श्रुतिः—"तस्माद् वा एतस्मादात्मन आकाशः सम्भूतः, आकाशाद्वायुः, वायोरग्निः, अग्नेरापः इति। न केवलम् अपञ्चीकृतानां भूतानां ब्रह्म-कार्य्यत्वम्, अपि तु जीवानां पञ्चीकृतभूतानां च। यथा च—यस्मात् भूधरार्णवादीनि अचरवस्तूनि, मनुष्यादीनि चरवस्तूनि स्वर्गनरकादीनि चोपपद्यन्ते तत् ब्रह्म इति फलति। यद्यपि जीवब्रह्मणोः ऐक्यात् जीवानां न ब्रह्मकार्यत्वम्, तथापि जीवानामपि चराचरोपाधिकानां ब्रह्मप्रतिबिम्बत्वेन तत्-कार्य्यत्वम् इति भावः। यद्वा भूतसृष्टिवद् भौतिकसृष्टेः अपि हिरण्यगर्भद्वारा ब्रह्मैव कर्तृ इति बोद्धव्यम्। न च ब्रह्मणः जगत्कारणत्वे सति तस्य विकारप्रसङ्गः, ब्रह्मणः अपरिणामित्वात्। तथा च 'इदं जगत् ब्रह्मणः विवर्तः न तु परिणामः। अतत्त्वतःअन्यथाभावः विवर्तः। परिणामस्तु तत्त्वतः अन्यथाभावः। जगद्रूपस्य कार्य्यस्य च रज्जौ सर्पवत् अतात्त्विकत्वम् इति ब्रह्मणः न विकारप्रसङ्गः। न च ब्रह्मणः परिणामः सम्भवति, अंशतः परिणामस्वीकारे ब्रह्मणः सावयवत्वेन अनित्यत्वप्रसङ्गात्। कात्स्न्येंन परिणामस्वीकारे ब्रह्मणः उच्छेद-

प्रसङ्गात्। अतः जगद्रूपं कार्य्यं ब्रह्मविवर्तमिति। एतेन जगतः पारमार्थिकदृष्ट्या मिथ्यात्वं सूचितम्, 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्'[१६] इति श्रुतेः कार्य्यकारणयोः अनन्यत्वात् कार्य्यस्य कारणव्यतिरेकेण च अभावात्। अत्र स्रष्टृत्वेन पालकत्वनाशकत्वे अपि लक्षिते इति अस्य समग्रस्य जगतः सृष्टिस्थितिपालनकर्तृ ब्रह्म इति ब्रह्मणः तटस्थलक्षणम्।

ननु केवलात् ब्रह्मणः जगदुत्पत्तिश्चेत् जगतः त्रैकालिकसत्यत्वं स्यात्, तथा चानिर्मोक्षप्रसङ्गः। तदुच्यते—जगद्विवर्तार्थम् अज्ञानम् अपि अपेक्षणीयम्। यथा रज्जुमात्रात् न सर्पोत्पत्तिः, अपि तु रज्जवतिरिक्तं रज्जुविषयकम् अज्ञानमपि अपेक्षितम्, तथा न केवलात् ब्रह्मणः जगदुत्पत्तिः, अपि तु ब्रह्मविषयकम् अज्ञानमपि अपेक्षितम्। अतः अविद्यासहकारेणैव ब्रह्मणः इयं सृष्टिः बोद्धव्या। अविद्या च 'अनादिभावरूपं यद् विज्ञानेन विलीयते तदज्ञानमिति प्राज्ञा लक्षणं संप्रचक्षते॥'[१७] इति लक्षणलक्षिता। अज्ञानं च न सत्, तस्य नाशदर्शनात्, नापि शशविषाणवद् असत्, तस्य प्रतिभासात्, नापि सदसत्, सदसतोः विरोधात्। अतः सत्त्वासत्त्वाभ्याम् अनिर्वचनीयम् अज्ञानम्। तच्च द्वितयम्। एका हि अविद्या अनादिर्भावरूपा जगदुपादानम्; अन्या पूर्वपूर्वविभ्रमसंस्कारनिमित्तरूपा। तत्र प्रथमा मूलाविद्या द्वितीया च तूलाविद्या इति केचित्। तन्मन्दम् इत्येके। तेषां मते अग्रहणरूपा = आवरणात्मिका, अन्यथाग्रहणरूपा = विक्षेपात्मिका च इति द्विप्रकारा अविद्या। 'स्मृतिरूपः परत्र पूर्वदृष्टावभासः' इति लक्षणेन अध्यासे पूर्वदृष्टत्वस्य आवश्यकत्वात् ब्रह्माधिष्ठाने जगदध्यासार्थं प्राक्तनजगतः ज्ञानम् अपेक्षितम्, जगतः सोऽपि प्राक्तनः अध्यासः पूर्वज्ञानापेक्षितः इति पूर्वपूर्वसंस्कारः उत्तरोत्तराध्यासे हेतुः। वाचस्पतिपादानां मते अविद्यायाः आश्रयः जीवः, विषयस्तु ब्रह्म। विवरणकारमते तु अविद्यायाः आश्रयोऽपि ब्रह्म।

ननु अविद्यासाचिव्ये ब्रह्मणः अनीश्वरत्वम्, उपकरणस्य स्वातन्त्र्यविघातकत्वात् इति चेत्। उच्यते—स्वेतरकारकाप्रयोज्यत्वे सति निखिलकारकप्रयोक्तृत्वम् एव कर्तुः स्वातन्त्र्यम्। एवंरूपं स्वातन्त्र्यं च सच्चिदानन्दरूपे ब्रह्मणि अस्तीति तस्यईश्वरत्वे नानुपपत्तिः। तदुक्तं वाचस्पतिमिश्रैः भामतीटीकाप्रारम्भे—

अनिर्वाच्याविद्याद्वितयसचिवस्य प्रभवतो
विवर्त्ता यस्यैते वियदनिलतेजोऽबवनयः।
यतश्चाभूद्विश्वं चरमचरमुच्चावचमिदं
नमामस्तद्ब्रह्मापरिमितसुखज्ञानममृतम् ॥ इति।

४. सत्ता-त्रैविध्यम्

सत्त्वं त्रिविधम्—पारमार्थिकसत्त्वं, व्यावहारिकसत्त्वं प्रातिभासिकसत्त्वं च।

यस्य सत्त्वं कालत्रयेऽपि अबाधितं भवति, यस्य ज्ञानं कालत्रयेऽपि ज्ञानान्तरेण न बाध्यते, तस्य पारमार्थिकसत्त्वम्। यथा ब्रह्मणः।

यस्य सत्त्वं ज्ञातृकाले न बाध्यते, ज्ञातुः सत्त्वावस्थायां यस्य सत्त्वं ज्ञानान्तरेण न बाध्यते परन्तु वैदिकज्ञानेन बाध्यते तस्य व्यावहारिकसत्त्वम्। तथा हि इदं दृश्यमानं जगत् अस्मदादीनां जीवितावस्थायां स्वस्थावस्थायां च ज्ञानान्तरेण न बाध्यते, वैदिकप्रमाणेन ज्ञानेन तु अस्य सत्त्वं बाध्यते, ब्रह्मव्यतिरिक्तस्य सर्वस्य मिथ्यात्वात् इति अस्य जगतः व्यावहारिकसत्त्वम्।

यस्य तु सत्त्वं प्रतीतिसमये एव वर्तते परंतु ब्रह्मज्ञानातिरिक्तज्ञानान्तरेण लौकिकप्रमाणेन वा बाध्यते, तस्य प्रातिभासिकसत्त्वम्। प्रतिभासकालोत्पन्नाः प्रातिभासिकाः इति व्युत्पत्तेः। तथा हि शुक्तिरूप्यस्य, रज्जुसर्पस्य वा सत्त्वं प्रतीतिकाले एव स्वीक्रियते,

परक्षणे एव शुक्तिज्ञानेन रज्जुज्ञानेन च बाधात्, इति शुक्तिरूप्यस्य रज्जुसर्पस्य च प्रातिभासिकसत्त्वम्।

तदुक्तं पञ्चपादिकाविवरणे—'त्रिविधं सत्त्वम्, परमार्थसत्त्वं ब्रह्मणः, अर्थक्रियासामर्थ्यं सत्त्वं मायोपाधिकम् आकाशादेः, अविद्योपाधिकं सत्त्वं रजतादेः' [१८] इति।

अपि चोक्तम्—

कालत्रये ज्ञातृकाले प्रतीतिसमये तथा।
बाधाभावात् पदार्थानां सत्त्वत्रैविध्यमिष्यते॥
तात्त्विकं ब्रह्मणः सत्त्वं व्योमादेर्व्यावहारिकम्।
रूप्यादेरर्थजातस्य प्रातिभासिकम् इष्यते॥
लौकिकेन प्रमाणेन यद्बाध्यं लौकिकेऽवधौ।
तत्प्रातिभासिकं सत्त्वं बाध्यं सत्येव मातरि॥
वैदिकेन प्रमाणेन यद्बाध्यं वैदिकेऽवधौ।
तद्व्यावहारिकं सत्त्वं बाध्यं मात्रा सहैव तत् [१९]॥ इति।

अयं च विभागः संसारकालीनस्य एव सत्त्वस्य इति अस्य विभागस्य अतात्त्विकत्वमेव इति बोद्धव्यम्, अखण्डं ब्रह्म एव पारमार्थिकं सत् इति तत्र विभागानुपपत्तेः।

ननु अद्वैतसिद्धान्ते आपणस्थरजतस्य शुक्तौ भासमानस्य प्रातिभासिकरजतस्य च अविद्याकार्य्यत्वेन अध्यस्तत्वेन च उभययोः सत्यमिथ्यारजतयोः नियामकाभावात् व्यावहारिकत्वेन प्रातिभासिकत्वेन च कथं व्यवहारः इति चेत्। उच्यते—यथा नैयायिकमते सत्यत्वाविशेषे अपि ज्ञानसुखादीनां क्षणिकत्वं तृतीयक्षणविनाशित्वं वा, गोघटादीनां तु स्थायित्वम् = अक्षणिकत्वं स्वीक्रियते, तथा अद्वैतपक्षे अपि प्रातिभासिकानां स्वल्पकालस्थायित्वं व्यावहारिकानां च दीर्घकालस्थायित्वम् इति बोद्धव्यम्।

यद्वा, अध्यासमात्रं प्रति दोषस्य हेतुत्वात् व्यावहारिकघटाद्यध्यासे च दोषान्तराभावात् अगत्या उपादानभूता अविद्या

एव दोषः इति स्वीकरणीयम्। शुक्तिरजतादिप्रातिभासिकाध्यासे तु न केवलम् अविद्यायाः दोषत्वम्, अपि तु काचादीनामपि। तथा च अविद्यातिरिक्तदोषजन्यत्वं प्रातिभासिकत्वे प्रयोजकम् (व्याप्यं व्यापकं च)। प्रातिभासिकाध्यासं प्रति अविद्यातिरिक्तस्य दोषस्य हेतुत्वं, व्यावहारिकाध्यासं प्रति तु दोषान्तरस्य अहेतुत्वम् इति द्वयोः वैलक्षण्यम्।

एवम् अविद्यातिरिक्तदोषजन्यत्वस्य प्रातिभासिकत्वप्रयोजकत्वात् स्वप्नोपलब्धानां प्रपञ्चानां च अविद्यातिरिक्तनिद्रादिदोषजन्यत्वात् शुक्तिरूप्यादिवत् प्रातिभासिकत्वम्। सन् घटः इतिवत् सन् स्वाप्नप्रातिभासिके रथः इत्यादौ स्वाप्निके वस्तुनि अपि रथादेः सदभिन्नतया अवभासात् सद्रूपेण स्वयंप्रकाशमानस्य ज्ञानानन्दादिरूपेण तु अप्रकाशमानस्य मनोऽवच्छिन्नस्य जीवचैतन्यस्य अधिष्ठानत्वम् अवगन्तव्यम्।

५. अध्यारोपापवादौ

अध्यारोपापवादन्यायेन तावत् वेदान्तानाम् अद्वैते ब्रह्मणि तात्पर्यं ज्ञातुं शक्यते। तत्र "असर्पभूतायां रज्जौ सर्पारोपवत् वस्तुनि अवस्त्वारोपः अध्यारोपः।"[२०] व्यावहारिकवस्तुत्वेन अभिमतायां रज्जौ अवस्तुभूतसर्पस्य यः आरोपः भवति तत्र रज्ज्ववच्छिन्नचैतन्यनिष्ठा अविद्या सर्पज्ञानाभासाकारेण परिणमते सर्पाकारेण च विवर्त्तते। स एव विवर्तः। स च सर्पः रज्ज्ववच्छिन्नचैतन्यनिष्ठाविद्योपादानकः इति 'नायं सर्पः, किन्तु रज्जुः' इति विशेषदर्शनोत्तरकालीनेन अधिष्ठानभूतरज्जुसाक्षात्कारेण रज्जुगताज्ञाननिवृत्तौ सर्पभ्रान्तिः अपि निवर्तते।

एवं परमार्थदृष्ट्या अज्ञानानुपहितं तुरीयचैतन्यं ब्रह्म एव वस्तु। तच्च कालत्रयानपायि अक्षरं त्रिगुणातीतं सच्चिदानन्दरूपम् अद्वयम्। अज्ञानादिसकलजडसमूहः अवस्तु। अज्ञानतज्जन्यव्योमादेः

मिथ्यात्वदृश्यत्वसावयवत्वविकारित्वसापेक्षसिद्धिकत्वादिहेतुभिः अ-स्तुत्वम् इत्यर्थः। अज्ञानं नाम सदसद्भ्याम् अनिर्वचनीयम् त्रिगुणात्मकम् ज्ञानविरोधि भावरूपं यत्किञ्चित्।

इदम् अज्ञानं मायाशब्देनापि अभिधीयते। अज्ञानं समष्टिव्य-ष्ट्यभिप्रायेण एकम् अनेकं चेति व्यवह्रियते। तत्र शुद्धसत्त्वप्रधानं समष्ट्यज्ञानम् एव ईश्वरस्य उपाधिः, कारणशरीरं वा। मलिनसत्त्व-प्रधानं व्यष्ट्यज्ञानं च प्राज्ञस्य उपाधिः, कारणशरीरं वा। अज्ञानस्य आवरणं विक्षेपश्च इति शक्तिद्वयम् अस्ति। आवरणशक्तिः शुद्ध-सच्चिदानन्दरूपस्य आत्मनः स्वरूपम् आच्छादयति। तया आवृ-तस्य आत्मनः एव कर्तृत्वभोक्तृत्व-सुखित्व-दुःखित्वादिकं सम्भवति। विक्षेपशक्तिस्तु स्वावृतात्मनि आकाशादिप्रपञ्चम् उत्पादयति। तथाहि अज्ञानेन मायया वा उपहितात् चैतन्यात् क्रमेण आकाशः, वायुः, तेजः, आपः, पृथिवी इत्येतानि अपञ्चीकृतभूतानि उत्पद्यन्ते। माया च त्रिगुणात्मिका इति तत्कार्याणि आकाशादीनि अपि त्रिगुणानि। तत्र सत्त्वगुणप्रधानेभ्यः रजोगुणप्रधानेभ्यश्च अपञ्ची-कृतभूतेभ्यः समष्टिव्यष्ट्यात्मकानि लिङ्गशरीराणि उत्पद्यन्ते। तमोगुणप्रधानेभ्यः अपञ्चीकृतभूतेभ्यः पञ्चीकृतानि आकाशादिस्थूल-भूतानि उत्पद्यन्ते। तेभ्यश्च पञ्चीकृतभूतेभ्यः भूरादीनाम् ऊर्ध्व-लोकानाम्, अतलादीनाम् अधोलोकानाम्, ब्रह्माण्डस्य तदन्तर्गत-स्थूलशरीराणाम्, तदुचितानाम् अन्नपानादीनां च उत्पत्तिः भवति। एतेषां स्थूलसूक्ष्मकारणशरीराणां समष्टिः एकः महान् प्रपञ्चः। अयं च महाप्रपञ्चः अज्ञानजन्यत्वात् अवस्तुभूतः। तस्य अद्वैतचैतन्यरूपे वस्तुनि आरोपः अध्यारोपः।

ननु कथम् अवस्तुनः निरात्मकस्य आरोपः भवेत्, यतः कस्य-चिद् दृष्टपूर्वस्य सतः एव क्वचित् आरोपः भवितुम् अर्हति। उच्यते—अवस्तुत्वं नात्यन्तासत्त्वम्, अपि तु अनिर्वचनीयत्वम्। संस्कारजन्यः भ्रमः तत्सिद्धये पूर्वप्रतीतिमात्रम् अपेक्षते, न पुनः पूर्वप्रतीतस्य

परमार्थसत्त्वम् अपि। एतस्य भ्रमस्य च अनादिप्रवाहत्वात् नान्योन्याश्रयदोषप्रसंगः। एवं वस्तुनि परमार्थे सति अवस्तुनः अनिर्वचनीयस्य आरोपः युक्तः।

"अपवादो नाम रज्जुविवर्तस्य सर्पस्य रज्जुमात्रत्ववत् वस्तुविवर्तस्य अवस्तुनः अज्ञानादेः प्रपञ्चस्य वस्तुमात्रत्वम्।"[२१] असङ्गोदासीने परमात्मवस्तुनि तद्विवर्तभूताज्ञानादिमिथ्याप्रपञ्चस्य चिद्वस्तुमात्रावशेषतया अवस्थानम् एव अपवादः। तदुक्तम् 'अधिष्ठानावशेषो हि नाशः कल्पितवस्तुनः।'[२२] इति। तस्मात् कार्य्यस्य कारणमात्रसत्त्वावशेषणम् चिद्विवर्तस्य प्रपञ्चस्य चिन्मात्रावस्थानम् एव वा अपवादः। अत्रायं भावः—वस्तुनः अन्यथाभावः द्विधा भवति— परिणामभावः विवर्तभावश्च। सतत्त्वतोऽन्यथाप्रथा परिणामः। अतत्त्वतोऽन्यथाप्रथा च विवर्तः। वेदान्ते चात्र विवर्तभाव एव अङ्गीक्रियते, न परिणामभावः, ब्रह्मणः अविकारित्वात्।

तथाहि भोगायतनं चतुर्विध(सकल)स्थूलशरीरजातम् भोग्यरूपं अन्नपानादिकम्, तदाश्रयभूतभूरादिचतुर्दशभुवनानि, एतदाश्रयभूतं ब्रह्माण्डं च एतत्सर्वम् एतेषां कारणरूपम् आकाशादिपञ्चीकृतभूतमात्रं भवति। एतानि शब्दादिविषयसहितानि पञ्चीकृतभूतजातानि सूक्ष्मशरीरजातं च सर्वम् एतेषां कारणभूतम् अपञ्चीकृतभूतमात्रं भवति। तानि सत्त्वादिगुणसहितानि अपञ्चीकृतभूतानि च उत्पत्तिव्युत्क्रमेण एतत्कारणभूताज्ञानोपहितचैतन्यमात्रं भवति। एतदज्ञानं अज्ञानोपहितम् ईश्वरप्राज्ञादिकं चैतन्यं च एतदाधारभूतम् अनुपहितचैतन्यरूपं तुरीयं ब्रह्ममात्रं भवति इति अवस्तुनः अज्ञानादेः ब्रह्मरूपवस्तुमात्रत्वम्।

आभ्याम् अध्यारोपापवादाभ्यां तत्त्वंपदार्थशोधनमपि सिद्धं भवति। अद्वैतब्रह्मणि अज्ञानवशात् यत् नानात्वम् आरोप्यते 'तत्त्वमसि' इत्यत्र तत्परित्यागेन जीवब्रह्मणोः ऐक्यं प्रतिपाद्यते। तथाहि समष्टयज्ञानं तदुपहितः ईश्वरः, अनुपहितं चैतन्यम् इत्ये-

तत्त्रयम् अविविक्तं सत् तत्पदस्य वाच्यार्थः भवति। एवं व्यष्टय-ज्ञानं तदुपहितः प्राज्ञः, अनुपहितं चैतन्यम् इत्येतत्त्रयं च अविविक्तं सत् त्वंपदस्य वाच्यार्थः भवति। एतयोः वाच्यार्थयोः च एकत्वं न सम्भवति, विरोधात्। तथा च सति अद्वैतहानिर्भवेत्। तस्मात् अद्वैतब्रह्मसिद्धयर्थम् तत्त्वंपदयोः वाच्यार्थपरित्यागेन लक्ष्यार्थः गृह्यते। लक्ष्यार्थश्च तत्पदस्य अनुपहितं चैतन्यम् इति, त्वंपदार्थस्य च अनुपहितं चैतन्यम् इति। तथा च जीवब्रह्मणोः ऐक्यं सिध्यति।

६. भामती-विवरणप्रस्थानयोर्भेदः[१३]

पारमार्थिकत्वेन अद्वैतं ब्रह्मैव सत्यं, तद्भिन्नं सर्वम् अविद्या-विजृम्भितम् इति उपेयभूतपारमार्थिकतत्त्वविषये यद्यपि भामती-विवरणप्रस्थानयोः न मतानैक्यमस्ति, तथापि तदुपायभूतव्याव-हारिकप्रमेयविषये तयोः किञ्चित् मतवैषम्यमस्ति। तत् संक्षेपेणात्र आलोच्यते। एतेषां विषयानाम् विस्तृतं विवरणं तु अस्मिन् ग्रन्थे एव यथास्थानं लप्स्यते।

१. भामतीपन्थिनां मते कर्मणां विविदिषार्थत्वम्, विवरण-पन्थिनां मते कर्मणां विद्यार्थत्वम्।

२. ब्रह्मसाक्षात्कारे मन एव करणम् इति भामतीपन्थिनः, शब्द एव करणम् इति विवरणपन्थिनः।

३. श्रवणादौ विधिर्नास्तीति भामत्यनुसारिणः, विधिरस्ति इति विवरणानुयायिनः।

४. श्रवणमननिदिध्यासनानां मध्ये निदिध्यासनम् अङ्गि अपरे अङ्गभूते इति भामतीपन्थिनः, श्रवणमङ्गि अपरे अङ्गभूते इति विवरणानुयायिनः।

५. जीवात्मविषये भामत्यनुयायिनः अवच्छेदवादम्, विवरणानु-यायिनस्तु प्रतिबिम्बवादं समर्थयन्ति।

६. भामतीपन्थिनां मते अज्ञानस्याश्रयः जीवः, विषयस्तु ब्रह्म, विवरणपन्थिनां मते अज्ञानस्य आश्रयोऽपि ब्रह्म, विषयोऽपि ब्रह्म ।

७. भामतीपन्थिनां मते मूलाविद्यायाः जीवभेदेन नानात्वं, विवरणपन्थिनां मते एकैव मूलाविद्या ।

८. भामतीपन्थिनां मते उपहितं ब्रह्म एव अखण्डाकारवृत्तेः विषयः, विवरणपन्थिनां मते शुद्धं ब्रह्म एव अखण्डाकारवृत्तेः विषयः ।

उद्धृतिसूचिका

१. वे. सा. ३
२. स. वा. ३, ४, ५, ६, ७
३. वि. म., वे. सा. ३
४. द्र. स. वा. ८
५. स. शा. १. १८
६. श्लो. वा. १. १२
७. ब्र. सू. श. भा. १. १. १
८. उप. सा. २. १६. ७२
९. जाबा. उ. ४
१०. छा. उ. ७. १. ३
११. मु. उ. ३. २. ९
१२. तै. उ. २. १. १
१३. बृह. उ. ३. ९. २८
१४. तै. उ. २. ४. १
१५. के. उ. ३
१६. छा. उ. ६. २. १
१७. बि. सु. १. ९
१८. विव. पृ. १६५
१९. स. द. स., शांकरदर्शनम्
२०. वे. सा. ३२
२१. वे. सा. १०९
२२. सूत संहिता, ४. २. ८
२३. द्र. भूमिका, प. पा.

द्वितीयः परिच्छेदः

१. ब्रह्मणः सगुणत्वं निर्गुणत्वं च

अद्वैतिनां मते निर्गुणं निर्विशेषं ब्रह्म वाङ्मनसोः अगोचरम्। न हि तत् केनापि धर्मेण गुणेन वा प्रकाशयितुं शक्यते। विश्वप्रपञ्चस्य सर्वेभ्यः वस्तुभ्यः भिन्नं ब्रह्म इति निषेधमुखेन नेति नेतिमुखेन वा ब्रह्मणः लक्षणं क्रियते। वेदेषु उपनिषत्सु वा सच्चिदानन्दादिरूपेण विधिमुखेन ब्रह्मणः यत् यत् लक्षणं दृश्यते तत् सर्वं निषेधमुखेनैव अवगन्तव्यम् इति अद्वैतिनाम् आशयः [ब्रह्मणः स्वरूपलक्षणं द्रष्टव्यम्]।

ननु, सत्यं ज्ञानम् अनन्तं सच्चिदानन्दरूपम् इत्यादिपदैः वस्त्वन्तरेभ्यः ब्रह्मणः यो भेदः सूच्यते, स भेदः एव ब्रह्मणः धर्मः भवेत् इति तस्य सविशेषत्वमेव पर्यवस्यति इति चेत्। न, इतरभेदस्य ब्रह्मस्वरूपत्वात्। यथा नेदं रजतम् इत्यत्र शुक्तौ रजतस्य यो भेदः, स शुक्तेः स्वरूपभूतः एव, तथैव असत्य-जड-परिच्छिन्नवस्तुभ्यः ब्रह्मणि यो भेदः स ब्रह्मणः स्वरूपभूतः एव इति न तेन निर्विशेषत्वहानिः। तत्र यद्यपि सर्वेषां सत्यादिपदानां लक्ष्यमेकमेव निर्विशेषं ब्रह्म, तथापि मिथ्यात्वजडत्वादिनिवर्तनीयांशम् अपेक्ष्य न पदान्तरवैयर्थ्यम्। यद्यपि निर्विशेषसत्यं निर्विशेषज्ञानं वा इति एकैकम् एव शुद्धब्रह्मणः लक्षणं भवितुम् अर्हति, तथापि तेन मिथ्या-जड-परिच्छिन्नेभ्यः पदार्थान्तरेभ्यः तस्य भेदः न परिस्फुटो भवतीति सत्यादीनां सर्वेषां पदानां ग्रहणम्। स च भेदः सत्यादिपदानां मिथ्याव्यावृत्तादिलाक्षणिकार्थग्रहणेनैव परिस्फुटो भवतीति अत्र लक्षणा न दोषाय भवति। तथैव लक्षणया सर्वेषां सत्यादिपदानां एकस्मिन् एव ब्रह्मणि

पर्य्यवसानात् न सामानाधिकरण्यहानिरपि। यदि सत्यादिपदत्रयं स्वातन्त्र्येण विधिमुखेन च ज्ञानत्वविशिष्टं ब्रह्म, सत्यत्वविशिष्टं ब्रह्म, अनन्तत्वविशिष्टं ब्रह्म इत्येवं वाच्यार्थं प्रकाशयेत्, तर्हि ब्रह्मणः सविशेषत्वम् एव स्यात्। तथा च विशेषणानां भेदेन विशेष्यानाम् अपि भेदात् सामानाधिकरण्यं पीड्येत।

ननु, धर्मः एव धर्मिणः लक्षणं भवितुम् अर्हति, यथा गोत्वं गोः, अश्वत्वम् अश्वस्य इति। अद्वैतिसम्मतब्रह्मणश्च सर्वविधधर्मरहितत्वात् 'सत्यं ज्ञानम्'[1] इत्यादि वाक्यं कथं ब्रह्मणः स्वरूपलक्षणं भवेत् इति चेत्। तत्र धर्मराजाध्वरीन्द्राणाम् इदमुत्तरम्—यद्यपि ब्रह्मणि धर्मधर्मिभावः नास्ति, तथापि अविद्यावशात् ब्रह्मणि अपि धर्मधर्मिभावः कल्प्यते। इमं च कल्पितधर्मधर्मिभावं गृहीत्वा पद्मपादाचार्य्याः आहुः—"आनन्दो विषयानुभवो नित्यत्वञ्चेति धर्माः। अपृथक्त्वेऽपि चैतन्यात् पृथगिवावभासन्ते"[2] इति। एते च कल्पिताः धर्माः वस्तुतः ब्रह्मणः स्वरूपभूताः ब्रह्मणः अभिन्नाः। तथा च सत्यं ज्ञानम् आनन्दम् इत्यादिकं न परस्परभिन्नम्, अपि तु अभिन्नं तत्त्वम् इति सर्वज्ञात्ममुनिभिः उद्घोष्यते—"सत्येऽप्यस्ति ज्ञानता ज्ञानतायां सत्यत्वं च स्पष्टमस्त्येव तद्वत्। सत्यप्येवं नातिरेकावकाशः पूर्णे तत्त्वे ज्ञानसत्योपपत्तेः॥"[3] इति। तच्च ज्ञानस्वरूपं निर्विशेषं ब्रह्म अखण्डम् एकम् अद्वितीयं, स्वप्रकाशं, अज्ञेयं नित्यं च।

उपनिषत्सु ब्रह्मणः सगुणः निर्गुणश्चेति भावद्वयमपि दृश्यते। आचार्य्यशङ्कराणां मते निर्गुणं निर्विशेषं सर्वोपाधिविनिर्मुक्तं नित्यशुद्धबुद्धमुक्तस्वभावं, तुरीयं ब्रह्म एव परमं तत्त्वम्। अस्मिन् एव निर्गुणे ब्रह्मणि सर्वासाम् उपनिषदां तात्पर्य्यम् इति तेषाम् अभिप्रायः। तैः हि तैत्तिरीयोपनिषदि वर्णितस्य कोशपञ्चकस्य व्याख्यानप्रसङ्गे[4] 'ब्रह्मपुच्छं प्रतिष्ठा' इति श्रुतिबलात् निर्विशेषं ब्रह्म एव सर्वेषाम् आधारभूतम् इति निरूपितम्, 'सत्यं ज्ञानम् अनन्तं ब्रह्म' इति 'यतो वाचो निवर्त्तन्ते' इत्यादि श्रुतिभिश्च निर्विशेषं ब्रह्म एव

परतत्त्वत्वेन उद्दिष्टम् इति निर्धारितम्। 'यस्यामतं तस्य मतं मतं यस्य न वेद सः। अविज्ञातं विजानतां, विज्ञातमविजानताम्'[५] 'केवलो निर्गुणः'[६] 'स एष नेति नेति'[७] 'अस्थूलमनणु'[८] 'तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते'[९] 'अशब्दमस्पर्शमरूपमव्ययम्'[१०] 'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्'[११] इत्यादिश्रुतयः निर्विशेषं ब्रह्म एव प्रतिपादयन्ति इति आचार्याणां मतम्।

इदमेव निर्विशेषं ब्रह्म मायोपाधिवशात् सगुणं सत् सर्वज्ञः सर्वशक्तिमान् ईश्वरो भवति। अयं च सगुणभावः मायिकः, मिथ्याभूतश्च। 'तदेवम् अविद्यात्मकोपाधिपरिच्छेदापेक्षम् एव ईश्वरस्य ईश्वरत्वं सर्वज्ञत्वं सर्वशक्तित्वं च न परमार्थतः'। अनेन सगुणविभावेन ईश्वरः सृष्टिस्थित्यादिलीलां करोति। पारमार्थिकरूपेण तु य एव सगुणः ईश्वरः तदेव निर्गुणं ब्रह्म, न तयोर्भेदः अस्ति। सगुणस्य ईश्वरस्य औपाधिकः भावः एव मिथ्याभूतः, तस्य पारमार्थिकभावस्य तु न मिथ्यात्वम्। स्थूलदर्शिनाम् उपासकानाम् उपासनासौकर्यार्थं हि निर्गुणं निर्विशेषं ब्रह्म मायापाधिवशात् सगुणं सविशेषं च भवति। तदुक्तं वेदान्तकल्पतरौ—निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः। ये मन्दास्तेऽनुकम्प्यन्ते सविशेषनिरूपणैः।[१२] इति। देहेन्द्रियादौ निविष्टचित्तानां प्रथमतः एव निर्गुणे निर्विशेषे च ब्रह्मणि चित्तैकाग्र्यं न सम्भवतीति सगुणब्रह्मणः परिकल्पनम्। सगुणे ब्रह्मणि ऐकाग्र्यलाभानन्तरं च निर्गुणे ब्रह्मणि चित्तस्थैर्यं सम्भवति। तदुक्तम्—वशीकृते मनस्येषां सगुणब्रह्मशीलनात्। तदेवाविर्भवेत् साक्षादपेतोपाधिकल्पनम्।[१३] इति वेदान्तकल्पतरौ।

जीवान् प्रति करुणावशात् च परमेश्वरः स्वेच्छानुरूपं मायामयं देहं गृह्णाति। तदुक्तं भाष्यकारेण—"स्यात् परमेश्वरस्यापि इच्छावशात् मायामयं शरीरं साधकानुग्रहार्थम्।"[१४] इति "स च

भगवान्.... अजोऽव्ययो भूतानाम् ईश्वरो नित्यशुद्धबुद्धमुक्तस्वभावोऽपि सन् मायया देहवान् इव लोकानुग्रहं कुर्वन्निव लक्ष्यते"[१५] इति च। एवं च उपासनायां सगुणब्रह्मणः उपयोगित्वात् सगुणब्रह्मबोधकवाक्यानाम् नानर्थक्यम् अप्रामाण्यं वा। 'सगुणवाक्यानाम् औपाधिकगुणविषयत्वेन स्वाभाविकनिर्धर्मकत्वश्रुतेर्न विरोधः' इत्यद्वैतसिद्धौ।

ननु, निर्विशेषब्रह्मणि किं प्रमाणम् इति चेत्।—उच्यते—प्रत्यक्षम्, अनुमानं, शब्दः इत्यादिकं लौकिकप्रमाणं निर्विशेषब्रह्मप्रतिपादने असमर्थम्। वेदः, उपनिषत् इत्यादिकम् अध्यात्मशास्त्रम् एव तत्र प्रमाणम्।

भूमा[१७]

एतत् निर्गुणब्रह्मरूपं निरतिशयं परं तत्त्वम् एव भूमा इत्युच्यते। तदेव तत्त्वं मोक्षार्थिभिः जिज्ञासितव्यम्, नातः परं जिज्ञास्यं किमपि अस्ति। यतः तदेव परं सुखस्वरूपम्। न हि अल्पे सुखम् अस्ति, अल्पस्य अधिकतृष्णाहेतुत्वात्, तृष्णायाश्च दुःखबीजत्वात्। तथा च श्रुतिः 'यो वै भूमा तत् सुखं, नाल्पे सुखमस्ति भूमैव सुखं भूमा त्वेव विजिज्ञासितव्यः' इति।

स च भूमा निर्विशेषरूपः नामरूपविहीनः। न हि तत्र दृग्दृश्यादिरूपः कश्चन भेदः अस्ति इति तस्मिन् तत्त्वे न दृश्यात् भिन्नः कश्चन द्रष्टा केनापि करणेन किमपि अन्यत् पश्यति शृणोति वा। तथा, न किमपि अन्यत् मनुते वा विजानाति वा। तथा च श्रुतिः—'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद् विजानाति स भूमा' इति 'नान्यन् मनुते' इति च। अतः "यस्मिन् अधिकरणे तत्त्वविचारणायाम् अन्यः अन्यं न पश्यति न शृणोति न मनुते न विजानाति स भूमेति द्रष्टृदृश्यादि विकल्पनिषेधेन अध्यासाधि-

करणत्वोपलक्षितस्य विकल्पाविषयत्वमेव भूमलक्षणम्"[18] इति भावः। न च तत्र आत्मानं पश्यति इत्यपि वक्तुं शक्यते 'अदृश्येनात्म्ये' 'न संदृशे तिष्ठति रूपमस्य'[19] ज्ञायते, 'विज्ञातारमरे केन विजानीयात्'[20] इत्यादि श्रुतिभ्यः स्वात्मनि दर्शनाद्यनुपपत्तेः। अपि च आत्मानं पश्यतीति चेत् एकस्मिन् एव क्रियाकारकफलभेदः अभ्युपगतो भवेत्। क्रियाकारकफलभेदश्च संसारः इति तदा संसारनिवृत्तिः न स्यात्। अतः अन्यदर्शनाद्यभावमात्रम् इहोच्यते। तेन च द्वैतमूलकसंसारव्यवहारविलक्षणः भूमा इति फलति। यत्र तु अविद्याविषये अन्यः अन्येन अन्यत् पश्यति तदल्पम्, अतएव तत् अनृतम् स्वप्नवस्तुवत्। तद्विपरीतः यः भूमा तद् अमृतम्। तदुक्तम्—'यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यम् इति।

स च भूमा स्वे महिम्नि आत्मीयमाहात्म्ये आत्मीयविभूतौ वा प्रतिष्ठितः। यदि प्रतिष्ठाशब्देन कश्चित् आधारः ज्ञायते, तर्हि भूमा न स्वे महिम्नि अपि प्रतिष्ठितः इत्येव परमार्थेन वक्तव्यम्। यथा गवाश्वादिमहिमा, तदाश्रितः तत्प्रतिष्ठश्च चैत्रः भवति, तथा नहि भूमा क्वचिदपि प्रतिष्ठितः आश्रितः वा, अन्यः हि अन्यस्मिन् प्रतिष्ठितः भवति, भूम्नि तु अन्यस्यैव अभावात् तस्य स्वतः अन्यस्मिन् प्रतिष्ठितत्वाभावः इत्यर्थः। स एव भूमा अधस्तात्, उपरिष्टात्, पश्चात् पुरस्तात् दक्षिणतः उत्तरतश्च सर्वत्र वर्त्तते। न तद्व्यतिरेकेण किमपि अन्यत् विद्यते। भूम्नः अन्यस्मिन् सति हि भूमा प्रतिष्ठितः स्यात्, न तु तदस्ति, यतः स एव सर्वम्। अतः न क्वचिदसौ प्रतिष्ठितः।

न च स भूमा द्रष्टुः जीवाद् आत्मनः वा अन्यः कश्चित्। स एव आत्मा इति आत्मैव सर्वतः सर्वम्। एवं निर्विशेषरूपः नामरूपविहीनः संसारव्यवहारविलक्षणः स्वे महिम्नि प्रतिष्ठितः अन्यस्मिन् अप्रतिष्ठितः आत्मनश्च अभिन्नः भूमा इति फलति।

२. ब्रह्मणः तटस्थलक्षणम् ॥[२१]

यावल्लक्ष्यकालम् अनवस्थितत्वे सति यद् व्यावर्त्तकं तत् तटस्थलक्षणम्। लक्ष्यं यावत् कालं वर्तते तावत् कालम् अविद्यमानत्वे सति इतरभेदबोधकं तटस्थलक्षणम् इत्यर्थः। ब्रह्मणः तटस्थलक्षणं च जगज्जन्मादिकारणत्वम्। तथाहि पारमर्षं सूत्रं—'जन्माद्यस्य यतः' इति। आदिपदेन स्थितिप्रलययोः संग्रहः। यस्मादस्य जगतः सृष्टिः यस्मिन्स्थितिः लयश्च भवति तत् ब्रह्म इत्यर्थः। तथा च श्रुतिः—'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यं प्रयन्त्यभिसंविशन्ति'[२२] इति। यद्यपि जगज्जन्मस्थितिलयेषु एकैककारणत्वमपि इतरव्यावर्तकत्वात् ब्रह्मणः लक्षणं भवितुमर्हति, तथापि एकैककारणत्वस्य निमित्तकारणसाधारणत्वाद् ब्रह्म जगतः निमित्तकारणमात्रमिति शङ्का स्यात्, तद्व्यवच्छेदार्थं ब्रह्मणः उपादानत्वं निमित्तत्वं च ज्ञापनार्थं त्रितयग्रहणं कृतम्।

ननु जगज्जन्मादिकारणत्वं ब्रह्मणो लक्षणं भवितुं नार्हति। जगदन्तर्गताम् अनादिभावभूतां मायां प्रति तस्य अकारणत्वादिति चेत्। उच्यते, अत्र जगत्पदेन कार्यजातं विवक्षितम्। तेन जगदन्तर्भूताम् अनादिभावभूतां मायां प्रति अकारणत्वेऽपि न ब्रह्मणः जगज्जन्मादिकारणत्वहानिः। ननु तथापि कालादृष्टादिषु जगत्कारणेषु अतिव्याप्तिः इति चेत्। न, कारणत्वं हि कर्तृत्वम्। तेन कालादृष्टादीनां कार्यप्रपञ्चं प्रति कारणत्वेऽपि न तत्र तत्र जगज्जन्मादिकारणत्वस्य अतिव्याप्तिः, तेषाम् अचेतनत्वेन कर्तृत्वायोगात्। एवमविद्यायां च नातिव्याप्तिः। अविद्यायाः जगदुपादानत्वेन जन्महेतुत्वे अपि आधारतया स्थितिहेतुत्वे अपि लयाधारतया लयहेतुत्वे अपि अचेतनत्वेन जगत्कर्तृत्वायोगात्। सांख्यस्वीकृते प्रधाने स्वीकृते अपि एतल्लक्षणं तत्र नानुगच्छति, तस्य अचेतनत्वेन कर्तृत्वायोगात्। जीवादिचेतनेषु अपि नातिव्याप्तिः. जीवादीनां

शरीरेन्द्रियसृष्ट्यनन्तरं कर्तृत्वसम्भवेऽपि शरीरेन्द्रियरहितानां तेषां जगज्जन्मादिकर्तृत्वायोगात् ।

ननु अविद्यादीनां कारणत्वं चेत् कर्तृत्वमपि स्यात्, कारणविशेषस्यैव कर्तृ[illegible]त् । तथा च अविद्यादौ अतिव्याप्तिः इति चेत् । उच्यते कर्तृत्वं च तदुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वम् । तथा च अविद्यादीनाम् अचेतनतया जगदुपादानगोचरापरोक्षज्ञानवत्त्वाद्यभावात्, न तत्र अतिव्याप्तिः । नापि जीवे हिरण्यगर्भे वा अतिव्याप्तिः, सकलजगदुपादानगोचरापरोक्षज्ञानाद्यभावात् । ब्रह्मणस्तु उपादानगोचरापरोक्षज्ञानसद्भावे—'यः सर्वज्ञः सर्वविद् यस्य ज्ञानमयं तपः । तस्मादेतद् ब्रह्म (= हिरण्यगर्भः) नाम रूपमन्नं च जायत",[23] "तदैक्षत बहुस्यां प्रजायेय"[24] इत्यादि श्रुतिः मानम् । उपादानगोचरचिकीर्षासद्भावे च 'सोऽकामयत बहुस्यां प्रजायेय"[25] 'सोऽकामयत द्वितीयो मे आत्मा जायेत' इत्यादि श्रुतिः मानम् । उपादानगोचरकृतिसद्भावे च 'तन्मनोऽकुरुत' इत्यादि श्रुतिः मानम् । अत्र तु ज्ञानेच्छादीनां समष्टिः लक्षणे न विवक्षिता अपि तु ज्ञानेच्छाद्येकैकगर्भलक्षणत्रितयं विवक्षितम् । ज्ञानादित्रितयस्यैव कर्तृत्वलक्षणत्वे व्यर्थविशेषणतापत्तेः, लक्षणघटकविशेषणानाम् इतरभेदानुमितौ व्यभिचारावारकत्वात् व्यभिचारावारकविशेषणानां व्यर्थत्वाङ्गीकारात् । अतएव जन्मस्थितिभङ्गानाम् अपि समष्टिः लक्षणे न विवक्षिता, लक्षणघटकविशेषणानां व्यर्थत्वापत्तेः । तथा च जगज्जन्मकर्तृत्वं जगत्स्थितिकर्तृत्वं जगल्लयकर्तृत्वञ्चेति एकैकं ब्रह्मलक्षणम् । एवं ज्ञानादीनां जन्मादीनां च समष्ट्यविवक्षायाम् जगज्जन्मानुकूलापरोक्षज्ञानवत्त्वं, तदनुकूलचिकीर्षावत्त्वं तदनुकूलकृतिमत्त्वं च इत्येवं जगत्स्थितिभङ्गयोरपि योजनया नव लक्षणानि द्रष्टव्यानि ।

यद्वा निखिलजगदुपादानत्वं निखिलकार्योपादानत्वं वा ब्रह्मणः तटस्थलक्षणम् । ननु शुक्त्यवच्छिन्नचैतन्यस्यापि जगद्रूपमिथ्यारज-

तोपादानत्वात् तत्र अतिव्याप्तिः इति चेत्। न, निखिलेति विशेषणात्। तथा च तस्य जगद्रूपमिथ्यारजतोपादानत्वेऽपि निखिलजगदुपादानत्वाभावात् न तत्रातिव्याप्तिः।

ननु इदं लक्षणं मायायाम् अतिव्याप्तम्, तस्याः अपि जगदुपादानत्वाभ्युपगमादिति चेत्। उच्यते—उपादानत्वं च जगदध्यासाधिष्ठानत्वम् जगदारोपाधिष्ठानत्वं वा। तथा च मायायाः जगदुपादानत्वे अपि न तदारोपाधिष्ठानत्वम्, तस्याः जडत्वेन अधिष्ठानत्वायोगात्, चैतन्यस्यैव अधिष्ठानत्वनियमात्। एवं च न तत्र अतिव्याप्तिः। ननु एवमपि लक्षणमिदं रज्ज्ववच्छिन्नचैतन्ये अतिव्याप्तम्, निखिलजगदन्तर्गतस्य रज्जुसर्पाद्यध्यासस्य ब्रह्म न अधिष्ठानमिति रज्ज्ववच्छिन्नचैतन्यस्यैव तदधिष्ठानत्वाङ्गीकारात् इति चेत्। उच्यते—उपादानत्वं तर्हि जगदाकारेण वियदाद्याकारेण वा परिणममानमायाधिष्ठानत्वं भवतु। तथा च रज्ज्ववच्छिन्नचैतन्यस्य वियदाद्याकारेण परिणममानमायाधिष्ठानत्वाभावात् तत्र नातिव्याप्तिः। तत्र मायाधिष्ठानत्वम् इत्युक्तौ रज्ज्वाद्यवच्छिन्नचैतन्ये अतिव्याप्तिः स्यात्, तस्यापि मायाधिष्ठानत्वात्, अतः जगदाकारेण परिणममानेति मायाविशेषणम्।

एतादृक् उपादानत्वम् अभिप्रेत्यैव 'इदं सर्वं यदयमात्मा'[२६] 'सच्च त्यच्चाभवत्',[२७] 'बहु स्यां प्रजायेय'[२८] इत्यादि श्रुतिषु ब्रह्मप्रपञ्चयोः तादात्म्यव्यपदेशः। तद्धि तादात्म्यं न ब्रह्मोपादेयत्वप्रयुक्तम्, ब्रह्मणः अपरिणामित्वात्, अपि तु कार्योपादानमायाधिष्ठानत्वप्रयुक्तम्। घटः सन् घटः भाति घटः इष्टः इत्यादिलौकिकव्यपदेशे अपि अधिष्ठानभूतं सच्चिदानन्दरूपं ब्रह्म एव आरोप्येण सह तादात्म्यापन्नं सत् भासते। जगति नामरूपांशद्वयव्यवहारस्तु अविद्यापरिणामात्मकनामरूपसम्बन्धात् भवति इति नामरूपयोः मिथ्यात्वम्। तदुक्तं वाक्यसुधाकरे—

अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम् ।
आद्यत्रयं ब्रह्मरूपं जगद्रूपमतो द्वयम् ॥[२९] इति ।

ननु निखिलजगत्कर्तृत्वं ब्रह्मणो नोपपन्नम्, घटपटादि-भौतिकसृष्टेः जीवसाध्यत्वदर्शनात् इति चेत् । उच्यते—सृष्टपदार्थेषु परमेश्वरस्य पञ्चतन्मात्रेन्द्रियवर्गोत्पत्तौ सप्तदशावयवोपेतलिंगशरीरोत्पत्तौ हिरण्यगर्भस्थूलशरीरभूतत्रैलोक्योत्पत्तौ च साक्षात् कर्तृत्वम्, अविद्यातिरिक्तद्वाराभावात् । इतरनिखिलप्रपञ्चोत्पत्तौ तु हिरण्यगर्भविराडादिद्वारा ईश्वरस्य कर्तृत्वम्, 'हन्ताहमिमास्तिस्रो देवताऽनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि'[३०] इति श्रुतेः ।

ननु, अस्तु भूतसृष्टिः ईश्वरकर्तृका, शरीरसृष्टिस्तु नेश्वरकर्तृका, तस्याः शरीरसाध्यत्वात् । उच्यते, मैवम्, नहीश्वरस्य शरीराभावः, अविद्यायाः एव तच्छरीरत्वात् ।

सृष्टिवाक्यानां तात्पर्यम्

ननु जगज्जन्मादिकारणत्वं ब्रह्मलक्षणं चेत् एतेषां जगत्कारणत्वादीनां ब्रह्मधर्माणां वेदान्तप्रतिपाद्यत्वेन तेषां पारमार्थिकत्वं स्यात् । तेषां पारमार्थिकत्वे च सप्रपञ्चत्वं सविशेषत्वं वा ब्रह्मणः स्यात्, न तु निर्विशेषत्वम् । शास्त्रस्य प्रमाणत्वात् प्रमाणगम्यस्य च अबाधितत्वेन पारमार्थिकत्वात् ब्रह्मणः सविशेषत्वम् एव पारमार्थिकत्वेन ग्रहणीयम् इति भावः । न च जगत्कारणत्वादिकस्य शास्त्रप्रतिपाद्यत्वे अपि अविद्याकल्पितत्वेन अपारमार्थिकत्वम्, अतएव च ब्रह्मणः न निर्विशेषत्वहानिः इति वाच्यम्, तथा सति 'यतो वा इमानि भूतानि जायन्ते' इत्यादिश्रुतिवाक्यानां बाधितार्थविषयकज्ञानजनकत्वेन अप्रामाण्यापत्तेः इति चेत् । उच्यते—मैवम्, "नहि सृष्टिवाक्यानां सृष्टौ तात्पर्यम्, किन्तु अद्वये ब्रह्मण्येव ।"[३१] न हि यस्मात् वाक्यात् यः प्रतीयते स एव तस्यार्थः, परन्तु यः तात्पर्य-

विषयीभूतः अर्थः स एव तस्यार्थः। तथा चोक्तम्—"यत्परः शब्दः स शब्दार्थः" इति। अत्रापि सृष्टिवाक्यानां न सृष्टौ तात्पर्यम्, सप्रयोजनस्य अज्ञातस्यैव शास्त्रतात्पर्यविषयत्वात्, सृष्टेश्च लोकावगतत्वेन निष्प्रयोजनत्वात्। एवं सृष्टिवाक्यानां श्रुतार्थे प्रामाण्याभावे अपि तात्पर्यविषयीभूतार्थे अद्वितीये ब्रह्मणि तात्पर्यसम्भवात् न प्रामाण्यहानिः।

ननु अद्वितीयब्रह्मप्रतिपत्तौ सृष्टेः किम् उपयोगित्वम् इति चेत्। उच्यते—यदि सृष्टिम् अनुपन्यस्य 'नेह नानास्ति किंचन' इत्यादिश्रुत्या ब्रह्मणि प्रपञ्चस्य निषेधः प्रतिपाद्येत, तर्हि ब्रह्मणि प्रतिषिद्धस्य प्रपञ्चस्य वायौ प्रतिषिद्धस्य रूपस्येव ब्रह्मणः अन्यत्रावस्थानशंकायाम् असन्दिग्धम् अद्वितीयं ब्रह्म न प्रतिपादितं स्यात्। तथा हि 'वायौ रूपं नास्ति' इत्युक्ते यथा रूपम् अन्यत्र वर्तते इति प्रतीयते, एवं 'प्रपञ्चः ब्रह्मणि नास्ति' इत्युक्ते प्रपञ्चः अन्यत्र वर्तते इति प्रतीतिः स्यात्। एवं च ब्रह्मातिरिक्तस्य प्रपञ्चस्य सत्यस्य विद्यमानत्वे ब्रह्मणः अद्वितीयत्वं न सिध्येत् इति भावः। सृष्टिवाक्यानाम् उपन्यासात् ब्रह्मैव जगदुपादानम् इति ज्ञाने जाते तु, उपादेयस्य=कार्यस्य उपादानं विना स्थित्यभावात्, ब्रह्मरूपम् उपादानं विहाय अन्यत्र जगतः सद्भावशंका निरस्ता भवति। ततः 'नेति नेति'[32] 'नेह नानास्ति किञ्चन'[33] इत्यादिश्रुत्या ब्रह्मण्यपि प्रपञ्चस्य सत्तायां निराकृतायां प्रपञ्चस्य तुच्छत्वावगमे=मिथ्यात्वावबोधे निरस्तनिखिलद्वैतविभ्रमम् अखण्डं सच्चिदानन्दरूपं ब्रह्म सिध्यति इति परम्परया सृष्टिवाक्यानां ब्रह्मण्येव तात्पर्यम्।

३. ब्रह्मणः स्वरूपलक्षणम्[34]

लक्षणं नाम अव्याप्त्यादिदोषत्रयरहितः लक्ष्यस्य असाधारणः धर्मः। तद्द्विविधं—स्वरूपलक्षणं तटस्थलक्षणं च। तत्र स्वरूपमेव लक्षणं स्वरूपलक्षणं, न तु स्वरूपस्य लक्षणमिति व्याख्यानम्।

सच्चिदानन्दरूपमेव ब्रह्मणः स्वरूपलक्षणम्। तथा च श्रुतिः— 'सत्यं ज्ञानमनन्तं ब्रह्म',[35] 'विज्ञानमानन्दं ब्रह्म'[36] इति, 'आनन्दो ब्रह्मेति व्यजानात्'[37] इति। अत्र सत्यादीनि विशेषणानि न विशेषणप्रधानानि, विशेषणस्य सजातीयव्यावर्त्तकत्वात्, ब्रह्मणश्च सजातीयान्तराभावात्, किन्तु लक्षणप्रधानानि, लक्षणस्य सजातीयविजातीयव्यावर्त्तकत्वात्। अत्रायं भावः— ब्रह्मशब्दनिर्वचनबलेन यद् अविशेषतः महत्त्वेन प्रतिपन्नम्, तत् सत्यं ज्ञानमनन्तमिति विशेषतः प्रतिपत्तव्यम् इति विशेषावगति-शेषभूतं लक्षणम्। अत एकैकः विशेषणशब्दः परस्परं निरपेक्षः ब्रह्मशब्देन सम्बध्यते—सत्यं ब्रह्म, ज्ञानं ब्रह्म, अनन्तं ब्रह्म, आनन्दं ब्रह्मेति। तानि च विशेषणानि स्वरूपसमर्पणद्वारेण विरुद्धार्थव्या-वर्त्तकानि मन्तव्यानि, अवाङ्मनसगोचरस्य ब्रह्मण 'नेति' मुखेनैव लक्षणनिरूपणसम्भवात्, अन्यथा ब्रह्मणः सविशेषत्वप्रसङ्गात्। तथाहि—

यद् यद्रूपेण निश्चितं तद्रूपं यत् न व्यभिचरति, तत् सत्यम्, यच्च व्यभिचरति, तदनृतं विकारि च। तत्र सत्यत्वविशेषणेन ब्रह्मणः असत्याद् विकाराद् व्यावृत्तिः अवगम्यते। ब्रह्मणः सत्यत्वे च तस्य जगत्कारणत्वं प्राप्तम्, लोके सत्यस्यैव मृदादिवस्तुनः कारणत्वदर्शनात्। ननु लोके अचिद्रूपाणां मृदादीनां कारणत्वदर्श-नात् ब्रह्मणः अपि कारणत्वे तस्य अचिद्रूपत्वं प्राप्तम् इति चेत्। उच्यते—ज्ञानं चिद्रूपं वा ब्रह्म इति। ज्ञानशब्दोऽत्र भावव्युत्पत्त्या निर्विशेषं चिन्मात्रं लक्षयति, सत्यादिपदसन्निधानात्, न तु ज्ञान-कर्त्तारम्। ज्ञानकर्तृत्वे हि ब्रह्मणः सत्यत्वम् अनन्तत्वं च अनुपपन्नं स्यात्, ज्ञानकर्तृत्वेन विक्रियमाणस्य ब्रह्मणः सत्यत्वानन्तत्वाद्य-सम्भवात्। अतः चिद्रूपविशेषणेन ब्रह्मणः अचिद्रूपात् च व्यावृत्तिः अवगम्यते। लौकिकज्ञानवद् अन्तवत्त्वनिवृत्त्यर्थम् उच्यते—अनन्तम् इति। देशकालवस्तुपरिच्छेदशून्यम् इत्यर्थः। अस्मादेव अनन्तत्व-

विशेषणाद् ब्रह्मणः अन्तवद्भ्यः व्यावृत्तिः अवगम्यते। एवम् आनन्दम् इत्यनेन निरानन्देभ्यः व्यावृत्तिः अवगम्यते। "यद्यपि सर्वेषां सत्यादिपदानां लक्ष्यमेकमेव निर्विशेषं ब्रह्म तथापि निवर्त्तनीयांशाधिक्येन न पदान्तरवैयर्थ्यम्"[३८] इति अद्वैतसिद्धौ।

ननु, अतिव्याप्त्यादिदोषरहितस्य व्यावर्त्तकधर्मस्य लक्षणं चेत्, कथं स्वरूपस्य लक्षणत्वम्, स्वरूपस्य धर्मित्वेन स्ववृत्तित्वाभावेन च धर्मत्वाभावात्, अभेदे लक्ष्यलक्षणव्यवहाराभावाच्च। उच्यते—स्वस्यैव ब्रह्मणः स्वरूपभूतसत्यत्वाद्यपेक्षया धर्मधर्मिभावकलनया लक्ष्यलक्षणभावः सम्भवति इति। यद्यपि सत्यज्ञानानन्दादयः परस्परं वस्तुतो न भिद्यन्ते, तथापि अन्तःकरणवृत्त्युपाधौ आकारभेदम् आपद्यमानाः चिद्रूपाद् ब्रह्मणो भिन्नाः इव प्रतिभासमानाः धर्मधर्मिभावं प्रतिपादयन्ति। तस्मात् स्वरूपभूतानाम् अपि तेषां लक्षणत्वं नानुपपन्नम्। तदुक्तं पञ्चपादिकायाम्—आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्माः। अपृथक्त्वेऽपि चैतन्यात् पृथगिवावभासन्ते ॥[३९] इति। विषयानुभवः = ज्ञानत्वम्, नित्यत्वम् = अनन्तत्वम्, चकारात् = सत्यत्वादिपरिग्रहः। आनन्दादीनाम् एतेषां ब्रह्मणः स्वरूपत्वेऽपि अन्तःकरणवृत्त्युपाधौ नाना इव अवभासन्तः इत्यर्थः।

४. ब्रह्मणः अभिन्नोपादाननिमित्तकारणत्वम्[४०]

ब्रह्म एव जगतो योनिभूतम्। 'इदं सर्वमसृजत। यदिदं किञ्च' इत्यादिश्रुत्या अद्वितीयस्य ब्रह्मण एव स्रष्टृत्वनिर्देशात्। एवं 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्',[४१] 'तदैक्षत बहु स्यां प्रजायेयेति,'[४२] 'आत्मा वा इदमेक एवाग्र आसीन्नान्यत् किञ्चनमिषत्। स ऐक्षत लोकान्नु सृजै'[४३] इत्यादि श्रुतिभिः एकस्यैव ब्रह्मणः स्रष्टृत्वम् उक्तम्। यदा च इदं ब्रह्म जगतः स्रष्टृत्वेन प्रकाशते तदा स ईश्वरः इति उच्यते। अयं च ईश्वरः जगत्कर्ता मायोपहितः भवतीति तस्य सगुणत्वम् इति च उच्यते।

तथा च अद्वितीयं ब्रह्म 'बहु स्याम्' इति सिसृक्षावृत्तिवशात् बहुरूपेण भासते। इयं सिसृक्षावृत्तिरेव माया। एतन्मायोपहितं चैतन्यम् एव ईश्वरः। माया च एतस्य परमेश्वरस्य शक्तिभूता, संसारप्रपञ्चस्य च बीजस्वरूपा त्रिगुणात्मिका। सा हि विश्वजननी प्रकृतिः अविद्या वा। सर्वज्ञस्य ईश्वरस्य आत्मभूते इव अविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्याम् अनिर्वचनीये संसारप्रपञ्चबीजभूते सर्वज्ञस्य ईश्वरस्य मायाशक्तिः प्रकृतिरिति श्रुतिस्मृतिभ्यः अभिलप्यते। प्रलयकाले अयं जगत्प्रपञ्चः मायायां लीनो भवति, माया च परमेश्वरम् आश्रित्य तिष्ठति। सृष्टेरारम्भे यदा अस्याः मायायाः सृजनीशक्तिः प्रकाशते तदा परमेश्वराश्रितायां मायायां विलीनं जगत् पुनरपि आविर्भवति।

एवं च ब्रह्म एव जगतः मूलं निदानम्। ब्रह्मसत्तया एव जगतः सत्ता, ब्रह्मण एवास्य जगतः उत्पत्तिः ब्रह्मण्येव अवस्थितिः, लयश्च। तत्र सगुणं ब्रह्म = मायाधीशः परमेश्वरः एव अस्य जगतः निमित्तकारणम्। ईश्वरस्य अध्यक्षत्वेनैव मायायाः विकाशो भवति, तया च मायया ईश्वरः जगतः सृष्टिकार्यं सम्पादयति। निर्विशेषं परं ब्रह्म तु मायायाः मायाकार्यभूतस्य नामरूपप्रपञ्चस्य च अधिष्ठानम्। एकमेव ब्रह्म अविकृतं सदेव मायावशात् बहुरूपेण भासते। ब्रह्मणः अधिष्ठानत्वेनैव मायायाः इयं विचित्रलीला सम्भवति, इदं च जगत् सत्यत्वेन अवभासते। मायायाः आश्रयभूतम् इदम् अविकारि कूटस्थं ब्रह्म एव अस्य जडजगतः उपादानकारणम्, तदेव ब्रह्म आश्रित्य अनिर्वचनीया माया अविद्या वा नामरूपात्मकम् इदं जगत् प्रकाशयति। एवं च ब्रह्म न केवलम् अस्य जगतः निमित्तकारणम्, अपि तु उपादानकारणमपि।

ननु, ब्रह्म जगतः निमित्तकारणम् एव स्यात्, न तु उपादानकारणम्। कथम्? ईक्षापूर्वककर्तृत्वश्रवणात्। तथाहि 'स ईक्षांचक्रे। स प्राणमसृजत'[४४] 'तदैक्षत बहु स्यां प्रजायेय'[४५] इत्यादि-

श्रुतिषु ब्रह्मणः ईक्षणपूर्वकं कर्तृत्वम् उक्तम्। ईक्षापूर्वकं कर्तृत्वं च कुलालादिषु निमित्तकारणेषु एव दृश्यते। ईश्वरत्वप्रसिद्धेश्च ब्रह्मणः निमित्तकारणत्वम् अभ्युपगन्तव्यम्। यथा ईश्वराणां वैवस्वतादीनां निमित्तकारणत्वमेव, तथैव परमेश्वरस्यापि निमित्तकारणत्वमेव स्वीकरणीयम्, न तु उपादानकारणत्वम्। अपि च उपादानकारणेन सह कार्यस्य साम्यम् अभ्युपगतम्, यथा मृत्पिण्डेन सह घटस्य। प्रकृते तु इदं जगत् सावयवम् अचेतनम् अशुद्धं च, ब्रह्म तु निरवयवं, चेतनं शुद्धम्, 'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्'[४६] इत्यादिश्रुतेः। तस्मात् ब्रह्मणा सह जगतः साम्यलेशोऽपि नास्तीति ब्रह्म नास्य जगतः उपादानकारणम्, अपि तु केवलं निमित्तकारणमेव इति चेत्। उच्यते— ब्रह्म अस्य जगतः निमित्तकारणम् उपादानकारणं चेति अभ्युपगन्तव्यम्, न केवलं निमित्तकारणमेव। तथा च सूत्रम्—'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्'[४७] इति। तत्र च भाष्यम्—"प्रकृतिश्च उपादानं च ब्रह्म अभ्युपगन्तव्यं, निमित्तकारणं च। न केवलं निमित्तकारणम् एव" इति। कुतः? प्रतिज्ञादृष्टान्ताभ्याम् उपादानकारणत्वस्य अनुपरोधात् बाधाभावाद् वा। अत्र हि श्रुतिवचनमेव प्रमाणत्वेन गृहीतं भाष्यकारैः। तत्र इयं प्रतिज्ञा— 'उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्'[४८] इति। तत्र एकविज्ञानेन अविज्ञातमपि अन्यत् सर्वं विज्ञातं भवतीति प्रतीयते। एतच्च ब्रह्मण उपादानकारणत्वे सम्भवति, नान्यथा, कार्य्यस्य उपादानकारणाव्यतिरेकेन उपादानावस्थान्तरमात्रत्वात् उपादानकारणविज्ञानेन सर्वेषां कार्यजातानां विज्ञानोपपत्तेः। निमित्तकारणाव्यतिरेकस्तु कार्य्यस्य नास्तीति न निमित्तकारणविज्ञानेन कार्यवर्गाणां विज्ञानं सम्भवति। दृष्टान्ता अपि ब्रह्मणः उपादानकारणत्वं निर्दिशन्ति। तथा हि— 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यात्।' 'एकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्यात्', 'एकेन नखनिकृन्तनेन

सर्वं कार्ष्णायं विज्ञातं स्यात्'[४९] इति दृष्टान्तेषु मृत्पिण्डादीनाम् उपादानानां ज्ञानेनैव कार्य्यवर्गस्य ज्ञानं भवतीति प्रतिपद्यते। एवम् अन्यत्रापि[५०] 'कस्मिन्नु भगव विज्ञाते सर्वमिदं विज्ञातं भवति' इति प्रतिज्ञा, 'यथा पृथिव्यामोषधयः सम्भवन्ति' इति दृष्टान्तः इत्येवम्। 'यतो वा इमानि भूतानि जायन्ते'[५१] इत्यत्र अपि 'यतः' इत्यनेन प्रकृतिः उपादानं वा ज्ञाप्यते। 'ब्रह्मैवेदं सर्वम्'[५२], 'सर्वं खल्विदं ब्रह्म,'[५३] 'आत्मैवेदं सर्वम्',[५४] 'ऐतदात्म्यमिदं सर्वम्'[५५] इत्यादि श्रुतौ च निखिलपदार्थानां ब्रह्मस्वरूपत्वं पुनः पुनः उक्तम्। तेन च ब्रह्मणः उपादानकारणत्वं समर्थितं भवति। अपि च, साक्षाद् ब्रह्मैव कारणम् उपादाय अस्य जगतः सर्गप्रलयौ आम्नातौ। तथाहि, 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति, यं प्रयन्त्यभिसंविशन्ति'[५६] इति, 'सर्वाणि ह इमानि भूतान्याकाशादेव समुत्पद्यन्ते, आकाशं प्रत्यस्तं यन्ति'[५७] इति च श्रुतिः ब्रह्मणः सृष्टिस्थितिलयकारणत्वं वदन्ती ब्रह्मणः उपादानकारणत्वं प्रदर्शयति। यद्धि यस्मात् जायते यस्मिंश्च प्रलीयते, तत्तस्य उपादानमिति प्रसिद्धम्, यथा व्रीहियवादीनां पृथिवी। तथा जगतोऽपि ब्रह्म उपादानम्।

वेदान्तेषु ब्रह्मणः योनित्वश्रवणाच्च ब्रह्म जगतः उपादानकारणम्। तथाहि—'कर्तारमीशं पुरुषं ब्रह्मयोनिम्'[५८] इति 'यद्भूतयोनिं परिपश्यन्ति धीराः'[५९]। इति च योनिशब्दश्चात्र प्रकृतिवचनः 'यथोर्णनाभिः सृजते गृह्णते च'[६०] इति वाक्यशेषात्। यच्च उक्तम् —ईक्षापूर्वकं कर्तृत्वं निमित्तकारणेषु एव सम्भवति, नोपादानेषु इति, तत्रोच्यते—न लोकवद् इह बोद्धव्यम्; परमकारणस्य ब्रह्मणः शब्दैकगम्यत्वात्, श्रुत्यनुसारेणैव ईक्षयितुरपि उपादानकारणत्वं ग्रहीतव्यम् इति।

ननु निर्विशेषं ब्रह्म कथमस्य जडजगतः उपादानं भवितुम् अर्हति। उपादानकारणं हि कार्य्ये अनुस्यूतं भवतीति विकारिणः

परिणामिनः वा कारणस्य एव उपादानकारणता सम्भवति, निर्विकारस्य ब्रह्मणस्तु नैतत् सम्भवति इति चेत्। उच्यते—अद्वैतिनां मते उपादानकारणं तावत् द्विविधं भवितुम् अर्हति—परिणाम्युपादानम्, अपरिणाम्युपादानं च। निर्विकारं ब्रह्म च यद्यपि परिणाम्युपादानकारणं भवितुं नार्हति, तथापि ब्रह्मविवर्तस्य जगतः अधिष्ठानत्वात् अपरिणाम्युपादानं भवितुम् अर्हति। एतद् अपरिणाम्युपादानकारणम् एव विवर्तकारणम् इत्युच्यते, 'अस्य द्वैतेन्द्रजालस्य यदुपादानकारणम्। अज्ञानं तदुपाश्रित्य ब्रह्म कारणमुच्यते ॥'[६१] इति वचनानुसारेण विवर्ताधिष्ठानत्वेन ब्रह्मणः उपादानत्वोपपत्तेः। न च अपरिणामिनः उपादानकारणत्वं कथमिति वाच्यम्, आत्मनि कार्यजनिहेतुत्वस्य उपादानलक्षणत्वात्, तस्य च परिणाम्यपरिणाम्युभयसाधारणत्वात्।"[६२] तथा च, यथा मृत्तिका आत्माश्रितस्य=मृत्तिकाश्रितस्य घटरूपकार्यस्य कारणत्वेन उपादानकारणं भवति, तथा ब्रह्मरूपम् अधिष्ठानम् आश्रित्य यद् जगद्रूपं कार्य्यम् उत्पद्यते, तस्य जगतः कारणत्वात् ब्रह्म अपि उपादानकारणं भवति। एवम् अविद्याम् आश्रित्य जगत् उत्पद्यते इति अविद्या च अस्य जगतः उपादानकारणम्। तस्याः अनिवर्चनीयायाः मायायाः स्वभावः जड़जगति अनुवर्तते; माया एव नामरूपत्वेन परिणमते इति माया अस्य जगतः परिणाम्युपादानम्। जगत्कर्तृत्वस्य मिथ्या अभिमानम्, सिसृक्षा, सृष्टिः इत्यादिकम् अविद्यायाः परिणाम एव। अविद्या एव परिणाम्युपादानम्, न ब्रह्म। न हि अविद्यासाहित्ये अपि ब्रह्म परिणमते, अपि तु विवर्तते। निर्विशेषं ब्रह्म समस्तविकारवर्गेषु अनुसृत्य अपि अविकारि, असंगं च सत् तिष्ठति। यथा अभिज्ञः नटः स्वकीयैः अभिनयैः न मुह्यते, न च भिद्यते तथैव मायासचिवं ब्रह्म सृष्टिरूपाभिनयेन न कदापि परिवर्तते। एवं च जगद्विवर्ताधिष्ठानत्वेन एव अविकारि ब्रह्म जगतः उपादानम् इति अद्वैतिनां सिद्धान्तः।

न चैवं ब्रह्मणः निमित्तकारणत्वं न स्यात् इति वाच्यम्, 'तदैक्षत बहु स्यां प्रजायेय, तत्तेजोऽसृजत',[63] 'स ऐक्षत लोकान्नु सृजे' इति 'स इमान् लोकानसृजत,'[64] 'सोऽकामयत बहु स्यां प्रजायेय'[65] इत्यादि श्रुतिः ब्रह्मणः स्वातन्त्र्यप्रवृत्त्या ईक्षापूर्विकां प्रपञ्चसृष्टिं वदन्ती तस्य निमित्तकारणत्वं दर्शयति, निमित्तकारणस्यैव कुम्भकारस्य इव चिन्तापूर्वककृतिसम्भवात्, स्वातन्त्र्यसम्भवाच्च।

एवं ब्रह्म जगतः उपादानं निमित्तं चेति अभ्युपगन्तव्यम् तथा च श्रुतिः 'तदात्मानं स्वयमकुरुत'[66]। इति अत्र आत्मनः कर्मत्वं कर्तृत्वं च दर्शितम्। 'स्वयमकुरुत' इति कर्तृत्वम्, 'आत्मानम्' इति कर्मत्वम्। तच्च कर्मत्वम् उपादानकारणत्वे पर्यवस्यति, विकारात्मना परिणामस्य उपादानेषु एव उपपत्तेः। 'यतो वा इमानि भूतानि जायन्ते'[67] इति 'जनिकर्तुः प्रकृतिः' इति सूत्रे प्रकृत्यर्थविहितपञ्चमीश्रुत्या 'यत् प्रयन्त्यभिसंविशन्ति' इति स्थितिलयाधारत्वलिंगाच्च उपादानत्वसिद्धिः, 'तदैक्षत व्याकरवाणि' इति ईक्षणाद्याधारतया कर्तृत्वसिद्धिश्च[68]। 'यथोर्णनाभिः सृजते गृह्णते च'[69] इत्यादि श्रुत्या च ब्रह्मणः अभिन्ननिमि[त्तोपा]दानकारणत्वं दर्शितम्।

ननु लोके उपादानकारणं निमित्तकारणं च परस्परं भिद्येते, यथा घटस्य उपादानकारणं मृत्तिका, निमित्तकारणं कुम्भकारश्च परस्परं भिद्येते। तस्मात् एकस्यैव ब्रह्मणः उपादानकारणत्वं निमित्तकारणत्वं च कथम् उपपद्यते इति चेत्। उच्यते सत्यमिदं लोके, परंतु सृष्टेः प्राक् एकस्यैव ब्रह्मणः सत्त्वात् तस्यैव उपादानकारणत्वं निमित्तकारणत्वं च अभ्युपेयम्, अन्यथानुपपत्तेः।

वस्तुतस्तु मायासंवलितं ब्रह्म=सगुणब्रह्म–परमेश्वरो वा जगतः निमित्तकारणम्। तथा चोक्तं विवरणकारैः—'तस्मादनिर्वचनीयमायाशक्तिविशिष्टं कारणं ब्रह्मेति प्राप्तम्'[70] इति। निर्गुणं ब्रह्म च

जगतः उपादानकारणम्। तथापि निर्गुणसगुणयोः तत्त्वान्तरत्वाभावात् एकमेव ब्रह्म निमित्तम् उपादानं च इत्यत्र नानुपपत्तिः।

ब्रह्म जगतः उपादानं निमित्तं च इत्यत्र जगतः यत् उपादानं ब्रह्म तत् शुद्धं ब्रह्म वा ईश्वररूपेण वा जीवरूपेण वा इति प्रश्नः।

तत्र संक्षेपशारीरककाराणां मते शुद्धं ब्रह्म एव जगतः उपादानम्। 'अथातो ब्रह्मजिज्ञासा' इति सूत्रे शास्त्रविषयसमर्थकेन ब्रह्मपदेन शुद्धस्य निर्गुणस्य ब्रह्मण एव ज्ञेयत्वेन उपात्तत्वात्, 'जन्माद्यस्य यतः' इति द्वितीयसूत्रे च लक्ष्योभूतब्रह्मणः एव जगत्कारणत्ववचनात् शुद्धं ब्रह्म एव जगतः कारणम्। ननु आत्मन आकाशः सम्भूतः[७१] सोऽकामयत[७२] 'यः सर्वज्ञः सर्ववित्'[७३] इत्यादिकारणवाक्येषु ईश्वररूपब्रह्मणः कारणत्वम् उच्यते न शुद्धस्य; तस्य कामयितृत्वसर्वज्ञानकर्तृत्वाद्यनुपपत्तेः, अतः तद्वाक्यगतात्मपदतत्पदसर्वज्ञादिपदानां मायाशवलितब्रह्मवाचित्वात् न कारणवाक्येभ्यः शुद्धस्य उपादानत्वसिद्धिः इति चेत्। उच्यते—एतेषु कारणवाक्येषु शवलवाचिनाम् आत्मादिशब्दानां शुद्धे लक्षणैव। तथा च शुद्धस्य कारणत्वावगतिः युक्ता इति।

एतन्मते माया नोपादानकारणम् अपि तु द्वारकारणम्। कूटस्थस्य ब्रह्मणः स्वतः उपादानकारणत्वानुपपत्तेः माया द्वारकारणम्। यदि मायां विनैव ब्रह्म उपादानं स्यात् तदा ब्रह्मणः स्वतः परिणामित्वमेव स्यात्। अतो ब्रह्मणः जन्मादिविकारराहित्यरूपकूटस्थत्वप्रतिपादनविरोधात् मायाद्वारा ब्रह्मणः कारणत्वं ग्रहणीयम् इति।

वाचस्पतिमिश्राणां मते जीवाश्रितमायाविषयीकृतं ब्रह्म स्वत एव जाड्याश्रयप्रपञ्चाकारेण विवर्तमानतया उपादानम् इति ब्रह्मैव उपादानम्, माया तु सहकारिमात्रं न कार्य्यानुगतं द्वारकारणम्।

ननु जीवस्य मायाश्रयत्वे तस्यैव जगदुपादानत्वं स्यात् प्रपञ्चस्य मायापरिणामत्वात्। प्रपञ्चपरिणामिमायाश्रयत्वं हि ब्रह्मणः प्रपञ्चो-

पादानत्वम्, जीवस्य मायाश्रयत्वे तु तस्यैव जगदुपादानत्वं स्यात्, न ब्रह्मणः। उच्यते—ब्रह्मणः मायाश्रयत्वाभावेऽपि मायाब्रह्मणोः विषयविषयिभावलक्षणसम्बन्धान्तरबोधकतया 'मायिनम्'[६४] इति श्रुत्युपपत्तेः प्रपञ्चस्य जीवाश्रितमायाविषयीकृतब्रह्मविवर्तत्वमात्राभ्युपगमात् न जीवस्य जगदुपादानत्वप्रसङ्गः इति।

विवरणानुसारिणां मते तु मायाशबलितं ब्रह्म ईश्वरो वा जगदुपादानम्। तत्र 'यः सर्वज्ञः सर्वविद् यस्य ज्ञानमयं तपः तस्मादेतद् ब्रह्म नाम रूपमन्नं च जायते'[६५] इत्यादिश्रुतिः प्रमाणत्वेन उपन्यस्यते। तथा च सर्वज्ञत्व-सर्ववित्त्वकामयितृत्वसर्वेश्वरत्वादिविशिष्टं ईश्वररूपं ब्रह्म एव कारणम् इति तेषां मतम्।

अतएव 'अन्तस्तद्धर्मोपदेशात्'[६६] सर्वत्र प्रसिद्धोपदेशात्'[६७] इत्याद्यधिकरणानां भाष्ये 'सैव (आदिपुरुषः एव) ऋक्, तत् साम, तदुक्थं तद्यजुस्तद्ब्रह्म' 'सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः' इत्यादिश्रुत्युक्तं सर्वोपादानत्वप्रयुक्तं सर्वात्मकत्वम् ईश्वरलिङ्गम् इति वर्णितम्। यदि प्रतिबिम्बत्वविशिष्टचैतन्यरूपे जीवे बिम्बत्वविशिष्टचैतन्यरूपे ईश्वरे च विशेष्यतया अनुस्यूतस्य शुद्धचैतन्यरूपब्रह्मणः सर्वोपादानत्वम् इष्येत तदा तस्यैव सर्वात्मकत्वं स्यात्, न ईश्वरस्य इति सर्वात्मत्वस्य भाष्ये जीवव्यावृत्तेश्वरलिङ्गत्वोपन्यासो न स्यात्।

एवम् यद्यपि जगदुपादानत्वम् ईश्वरगतं तथापि तदनुगतम् अखण्डचैतन्यं शाखाचन्द्रमसम् इव तटस्थतया लक्षयितुं शक्नोति इति तेषाम् अभिप्रायः।

पदार्थतत्त्वनिर्णयकाराणां मते तु ब्रह्म च माया च इति उभयमपि जगतः उपादानकारणम्। तथा सति 'मायां च प्रकृतिं विद्यात्'[६८] इति मायोपादानकारणत्वश्रुतिः, 'यतो वा इमानि भूतानि जायन्ते'[६९] इत्यादिब्रह्मोपादानकारणत्वश्रुतिश्च संगच्छते, घटादिषु सत्तायाः जडतायाः च अनुवृत्तिः उपपद्यते। ननु उभयोः उपादानत्वं

कथम् इति चेत्। उच्यते—तत्र ब्रह्म विवर्तमानतया उपादानं माया च परिणममानतया उपादानम् इति।

५. सृष्टिप्रयोजनविचारः

परमेश्वरः एव अस्य जगतः उत्पत्तिकारणं स्रष्टा वा इति सिद्धान्तितम्। तत्रायं पूर्वपक्षः—न खलु चेतनः परमात्मा इदं जगद्बिम्बं विरचयति इति कर्त्तुं युक्तम्। कुतः? प्रयोजनवत्त्वात् प्रवृत्तीनाम्। चेतनो हि पुरुषो लोके बुद्धिपूर्वकारी प्रवर्त्तमानः दृष्टः। न मन्दोपक्रमामपि प्रवृत्तिम् आत्मप्रयोजनम् अनुद्दिश्य आरभते जनः। किमुत गुरुतरसंरम्भाम्। भवति च लोकप्रसिद्धयनुवादिनी श्रुतिः—'न वा अरे सर्वस्य कामाय सर्वं प्रियं भवति, आत्मनस्तु कामाय सर्वं प्रियं भवति'[८१] इति। अपि चोक्तं—'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्त्तते'[८२] इति। गुरुतरसंरम्भा चेयं उच्चावचप्रपञ्चं विरचनरूपा प्रवृत्तिः यदि इयमपि प्रवृत्तिः चेतनस्य परमात्मनः आत्मप्रयोजनोपयोगिनी इति परिकल्प्यते, परितृप्तत्वं परमात्मनः श्रूयमाणं बाध्येत। तथाहि नित्य-तृप्तः हि परमेश्वरः इति बहुशः गीयते, 'आनन्दो ब्रह्म'[८३] इत्यादि श्रुतेः एतादृशस्य नित्यतृप्तस्य सृष्टिकर्मणि वा न किमपि प्रयोजनं कल्पनीयम्। प्रयोजनाभावे च प्रवृत्त्यभावेऽपि स्यात्। अथ चेतनोऽपि सन् यथा उन्मत्तः बुद्धय-पराधाद् आत्मप्रयोजनं विनैव प्रवर्त्तमानः दृष्टः, तथा परमात्मापि प्रवर्तिष्यते इत्युच्येत, तथा सति सर्वज्ञत्वं परमात्मनः श्रूयमाणं बाध्येत। तस्मात् अश्लिष्टा चेतनात् सृष्टिरिति।

तत्रोच्यते—यथा लोके कस्यचित् आप्तैषणस्य राज्ञो राजामात्यस्य वा लीलाव्यतिरिक्तं किंचित् प्रयोजनम् अनभिसन्धाय एव केवलं लीलारूपाः प्रवृत्तयः क्रीडाविहारेषु भवन्ति। यथा च उच्छ्वास-प्रश्वासादयः अनभिसन्धाय बाह्यं किंचित् प्रयोजनं स्वभावादेव संभवन्ति एवं ईश्वरस्य अपि किंचित् प्रयोजनान्तरं

अनपेक्षय एव स्वभावादेव केवला लीलारूपा प्रवृत्तिः भविष्यति। न हि ईश्वरस्य प्रयोजनान्तराविष्करणं न्यायतः श्रुतितो वा संभवति। न च स्वभावः प्रयोजनम् अपेक्षते। यद्यपि अस्मासु इयं जगद्बिम्बविरचनो गुरुतरसंरम्भत्वेन प्रतिभाति, तथापि परमेश्वरस्य लीलेव केवला इयम्, तस्य अपरिमितशक्तित्वात्। यदि नाम लोके लीलासु अपि किंचित् सूक्ष्मं आनन्दलाभादिकं प्रयोजनम् उत्प्रेक्षेत, तथापि नैवात्र सृष्टिकर्मणि किंचित् प्रयोजनम् उत्प्रेक्षितुं शक्यते, आप्तकामश्रुतेः। नापि अप्रवृत्तिप्रसङ्गः सृष्टिश्रुतेः न च उन्मत्तवत्प्रवृत्तिप्रसङ्गः सर्वज्ञत्वश्रुतेः। न चेयं सृष्टिश्रुतिः परमार्थविषया अविद्याकल्पितनामरूपव्यवहारगोचरत्वात् ब्रह्मात्मभावप्रतिपादनपरत्वात् च सृष्टिश्रुतेः इत्येतदपि नैव विस्मर्तव्यम्।

६. अभावकारणवादखण्डनम्[८८]

सतः कारणात् तदभिन्नत्वेन कार्यम् उत्पद्यते। उत्पत्तेः प्राक् च कार्यं कारणरूपेण अवतिष्ठते इति सत्कारणवादिनः वेदान्तिनः। अस्य च जगतः कारणं सद् इति उत्पत्तेः प्राक् इदं जगत् सद्रूपेण आसीत् इति तेषां मतम्।

वैनाशिकानां बौद्धानां मते तु अभावादेव कारणात् सद्भूतं कार्यम् उत्पद्यते। तथा च इदं जगत् [उत्पत्ते]ः प्राक् असत् अभावमात्रं वासीत्। तेषां मतम् एव छान्दोग्योपनिषदि एवम् उपन्यस्तम्— 'तद्धेक आहुरसदेवेदमग्र आसीदेकमेवाद्वितीयं तस्मादसतः सज्जायत' इति। प्रागुत्पत्तेः इदं जगत् सदभावमात्रम् एकम् अद्वितीयम् आसीत् इति। सदभावमात्रं = सदन्यन्ताभावमात्रं हि प्रागुत्पत्तेः तत्त्वं कल्पयन्ति बौद्धाः, न तु तदभावप्रतिद्वन्दि वस्त्वन्तरम् इच्छन्ति। ननु नैयायिकमते उत्पत्तेः प्राक् कार्यस्य असत्त्वे अपि कारणस्य सत्त्वम् इति तन्मते उत्पत्तेः प्राक् सद्रूपं कारणम् आसीत् इति वक्तुं युज्यते। अभावमात्रकारणवादिनां वैनाशिकानां पक्षे तु

नैतत् वक्तुं युज्यते इति चेत्। वेदान्तिभिः तत्र उच्यते—बाढम् प्रागुत्पत्तेः भावस्य यः अभावः तन्मात्रं तत्त्वम् अभ्युपगच्छतां वैनाशिकानां पक्षे प्रागुत्पत्तेः इदम् असत् एकमेव अद्वितीयं च आसीत् इति संख्यासम्बन्धस्य कालसम्बन्धस्य च उपन्यासः न युक्तः।

ननु अन्यापोहस्य शब्दार्थत्वे सति अपोह्यवस्तुनः तदर्थत्वे वा असत् इति शब्दस्य अर्थसिद्धिः? आकृतेश्च मीमांसकप्रक्रियया शब्दार्थत्वे सति सृष्टेः प्राक् सर्वेषां वस्तूनाम् अभावेन आकारस्यापि अभावात् एकम् अद्वितीयम् इति पदयोः आकृतिवाचकत्वायोगात् वाक्यार्थस्यैव अनुपपत्तिः इति चेत्। उच्यते बौद्धैः—
नैष दोषः सद्ग्रहणनिवृत्तिपरत्वात् वाक्यस्य। सदित्ययं तावच्छब्दः सदाकृतिवाचकः, एकमेवाद्वित्तीयमिदमासीत् इत्येते शब्दाः सच्छब्देन समानाधिकरणाः। तत् नञ् सद्वाक्ये प्रयुक्तः सद्वाक्यमेव अवलम्ब्य सद्वाक्यार्थविषयां बुद्धि निवर्तयति, यथा अश्वारूढः अश्वावलम्बनः अश्वं तदभिमुखविषयात् निवर्तयति तद्वत्, न पुनः सद्भावमेव अभिधत्ते। अतः पुरुषस्य विपरीतग्रहणनिवृत्त्यर्थपरम् इदम्' असदेवेत्यादिवाक्यं प्रयुज्यते। तस्मात् असतः सर्वाभावरूपात् विद्यमानम् अजायत इति वैनाशिकाः।

तत्रोच्यते सत्कारणवादिभिः सिद्धान्तिभिः—नैतत् युक्तम् असतः सदभावाद्वा सज्जायते इत्यस्य प्रमाणाभावात् दृष्टान्ताभावात्। ननु बीजसत्तायां नोङ्कुरोद्गमः। उक्तं च—नानुपमृद्य प्रादुर्भावात्' इति। विनष्टात् बीजादेव अङ्कुरः उत्पद्यते, विनष्टात् क्षीरात् दधि, विनष्टात् मृत्पिण्डाच्च घटः। एवं नानुपमृद्य प्रादुर्भावात् कूटस्थात् कारणात् कार्योत्पत्तिस्वीकारे अविशेषात् सर्वतः सर्वम् उत्पद्येत। न तु एवं भवति इति स्वरूपोपमर्दम् अन्तरेण कस्यचित् कूटस्थस्य वस्तुनः कारणत्वासम्भवात् अभावग्रस्तेभ्यः बीजादिभ्यः अङ्कुरादीनाम् उत्पत्तिः स्वीकरणीया। तथा च अभा-

वात् भावोत्पत्तिः इति चेत्। उच्यते—किम् अङ्कुरोत्पत्तौ बीजावयवाः उपमृद्यन्ते, किं वा बीजाकारसंस्थानम्? नाद्यः बीजसंस्थानविशिष्टानां बीजावयवानाम् अंकुरोद्गमे अपि अंकुरे अनुवृत्तिदर्शनात् न तेषाम् उपमर्दः अंकुरजन्मनि। स्थिरभावानाम् एव सुवर्णादीनाम् रुचकादिकार्येषु अनुगतानां कारणत्वदर्शनात्। येषां च बीजादीनाम् उपमर्दः वैनाशिकैः अभ्युपगम्यते, तेषामपि वस्तुतः न स्वरूपोपमर्दः, अनुपमृद्यमानानां बीजाद्यवयवानाम् अंकुरादिषु अनुगतानाम् एव कारणत्वोपलम्भात्। एवं सद्भ्यः एव सुवर्णादिभ्यः सतां रुचकादीनाम् उत्पत्तिः दृश्यते असद्भ्यश्च शशविषाणादिभ्यः सदुत्पत्त्यदर्शनात् अयम् अभावकारणवादः नोपपद्यते। यदि तु बीजाकारसंस्थानविशेषस्य नाशादङ्कुरोत्पत्तिः इति द्वितीयः पक्षः अवलम्ब्यते तर्हि बौद्धानाम् एव स्वाभ्युपगमविरोधः। न हि तैः अवयवातिरिक्तः अवयवी स्वीक्रियते। तथा च बीजाकारसंस्थानं बीजावयवव्यतिरेकेण न वस्तुभूतं यत् अङ्कुरजन्मनि उपमृद्येत। यदि तावत् उच्यते—बीजाकारसंस्थानम् इदं न परमार्थवस्तु, अपि तु संवृतिमूलकं लौकिकबुद्धिमूलकं वा (संवृति नाम लौकिकी बुद्धिः, संव्रियते आच्छाद्यते तत्त्वम् अनया इति व्युत्पत्तेः) इति; तत्र प्रश्नः—संवृतिः अभावो वा भावो वा। नाद्यः, भावस्य अभावात् उत्पत्तौ दृष्टान्ताभावात्, संवृतेः अवस्तुत्वेन च सत्त्वासाधकत्वात्। न द्वितीयः, संवृतेः भावत्वे नाभावात् अङ्कुरोत्पत्तिः, बीजावयवेभ्यः हि अङ्कुरोत्पत्तिः। तथा च बीजावयवानाम् अङ्कुराकारपरिणामसिद्धेः दृष्टान्ताभावः, अभावकारणवादभङ्गश्च। अवयवाः अपि उपमृद्यन्ते इति चेत्। न, यथा वैनाशिकानां बीजसंस्थानरूपः अवयवी नास्ति तथा बीजसंस्थानरूपाः अवयवाः अपि न सन्ति इति तेषाम् अपि उपमर्दः नोपपद्यते। बीजावयवानाम् अपि सूक्ष्मावयवाः, तदवयवानाम् अपि अन्ते सूक्ष्मतरावयवाः इत्येवं प्रसङ्गस्य अनिवृत्तेः सर्वत्र उपमर्दानुपपत्तिः। सद्बुद्ध्यनुवृत्तेः

सत्त्वानिवृत्तेश्च सद्वादिनां सतः एव उत्पत्तिः सिध्यति । न हि असतः सदुत्पत्तौ असत्कारणवादिनां दृष्टान्तः अस्ति । सद्वादिनां तु अस्ति दृष्टान्तः मृत्पिण्डात् घटोत्पत्तेः मृद्भावे घटसद्भावात् मृदभावे च घटाभावात् ।

यदि तावत् ज्ञानमात्रास्तित्ववादिनः बौद्धाः ब्रूयुः—मृद्बुद्धिः घटबुद्धेः कारणम् इति, तदानीम् अपि नाभावात् कार्योत्पत्तिः, किन्तु विद्यमानायाः मृद्बुद्धेः एव, विद्यमानां घटबुद्धिं प्रति कारणत्वम् इति नासतः सदुत्पत्तिः ।

तथा च—न हि अभावात् भावः उत्पद्यते । यदि अभावात् भावः उत्पद्येत तर्हि अभावत्वस्य सर्वत्र अविशेषात् कारणविशेषात् कार्यविशेषः उत्पद्यते इति वक्तुं न शक्येत । तथा हि बीजादीनां ध्वंसे यः अभावः, शशविषाणादीनां च य अभावः तयोः उभयोरपि निःस्वभावत्वाविशेषात् न कश्चिद् विशेषः अस्ति । निर्विशेषस्य तस्य अभावस्य कारणत्वे स्वीकृते एतादृशस्य अभावस्य सर्वत्र विद्यमानत्वात् सर्वत्र सर्ववस्तूनाम् उत्पत्तिः स्यात् । तथा च शशविषाणादिभ्यः अपि अङ्कुरादयः जायेरन् । तथा सति बीजादेव अङ्कुरः जायते, क्षीरादेव दधि इत्येवं कारणविशेषाभ्युपगमः अनर्थकः स्यात् । एवं च अभावादेव घटस्य उत्पत्तौ घटार्थिना मृत्पिण्डः नोपादीयेत ।

यदि तावत् उत्पलादीनां यथा नीलत्वादिः विशेषः, तथा अभावस्यापि बीजाभावः मृतपिण्डाभावः इत्येवं कश्चित् विशेषः अभ्युपगम्यते, तर्हि विशेषवत्त्वादेव अभावस्य भावत्वं प्रसज्येत ।

न हि अभावः कस्यचिद् उत्पत्तिहेतुः स्यात्, अभावत्वात्, शशविषाणादिवत् । अभावात् भावोत्पत्तौ, अभावान्वितमेव सर्वं कार्यं स्यात्, कारणस्य कार्ये अन्वयात् तथा च उत्पन्ने घटादौ अपि अभावबुद्ध्यनुवृत्तिः प्रसज्येत । न तु एवं दृश्यते, सर्वस्य वस्तुनः स्वेन स्वेन रूपेण भावात्मनैव उपलभ्यमानत्वात् । न हि मृदन्विताः

घटादयः भावाः तन्त्वादि विकारत्वेन उपलभ्यन्ते, मृद्विकाराः एव मृदन्विताः घटादयः भावाः उपलभ्यन्ते ।

अपि च अभावात् भावोत्पत्तिः इति अभ्युपगम्यमाने उदासीनानां प्रयत्नशून्यानां जनानाम् अपि अभिमतसिद्धिः स्यात्, अभावस्य सर्वत्र सुलभत्वात् । तथा च क्षेत्रकर्मणि अप्रवृत्तस्यापि कृषीबलस्य शस्यलाभः स्यात् । स्वर्गापवर्गलाभार्थं च न कश्चित् यतेत तथा च पारमर्षं सूत्रम्—नासतोऽदृष्टत्वात् इति ।

ननु बीजध्वंसानन्तरम् एव अङ्कुरोत्पत्तिः भवति इति सर्वैः दृश्यते । तथा च कथं बीजाभावस्य अङ्कुरोद्गमं प्रति न उपादानकारणत्वम् इति चेत् । उच्यते बीजध्वंसस्य निमित्तकारणत्वं सहकारिकारणत्वं वा अत्र स्वीकरणीयम्, न तु उपादानकारणत्वम्, अभावस्य भावं प्रति उपादानत्वासम्भवात् । भावभूतम् अङ्कुरं प्रति भावानां बीजावयवानाम् एव उपादानकारणत्वम् । न च उत्पत्तेः प्राक् कार्यस्य अभावात् कार्यस्य प्रागभावः एव कार्यं प्रति उपादानकारणम् । इति वाच्यम्, प्रागभावस्य अनादित्वेन कार्यवर्गस्यापि अनादित्वप्रसङ्गात्, निर्विशेषात् प्रागभावात् विचित्रशक्तियुक्तस्य कार्यवर्गस्य उत्पत्तेः अनुपपत्तेश्च ।

ननु दृष्टान्ताभावादेव न सतः सदुत्पत्तिः, नहि घटात् घटान्तरोत्पत्तिः दृश्यते इति चेत् । उच्यते—सत्यम्, न सतः सदन्तरम् उत्पद्यते, सदेव संस्थानान्तरेण अवतिष्ठते । यथा सर्पः कुण्डली भवति, यथा च मृत्पिण्डः घटादिप्रभेदैः विराजते ।

ननु कार्यम् उपादानात् भिद्यते, उपादानविलक्षणबुद्धिविषयत्वात्, यथा अश्वबुद्धिविलक्षणविषयः महिषः ततः भिद्यते । उच्यते—मैवं पिण्डघटादीनाम् इतरेतरव्यभिचारे अपि मृत्त्वाव्यभिचारात् । यद्यपि घटः पिण्डं व्यभिचरति पिण्डश्च घटं तथापि पिण्डघटौ मृत्त्वं न व्यभिचरतः । तस्मात् मृद्रूपौ पिण्डघटौ । व्यभिचरति तु अश्वं गौः, अश्वो वा गाम् । तस्मात् मृदादिसंस्थान-

मात्रं घटादयः एवं सत्संस्थानमात्रमिदं सर्वमिति युक्तं प्रागुत्पत्तेः सदेव इति, वाचारम्भणमात्रत्वात् विकारसंस्थानमात्रस्य ।

७. भेदाभेदविचारः

(क) भोक्त्रापत्त्यधिकरणम्[८]

अद्वितीयाद् ब्रह्मणः इदं सर्वं जगत् उत्पद्यते, अस्मिन् एव ब्रह्मणि सर्वासाम् उपनिषदां तात्पर्य्यम् इति समन्वयोऽत्र विषयः। तत्र यत् मिथो भिन्नं तत् न अद्वितीयकारणोत्पन्नं यथा मृत्तन्तुजौ घटपटौ इति द्वैतग्राहितर्कसहितभेदप्रत्यक्षादिना स समन्वयः विरुध्यते न वेति सन्देहः। तत्र जगत्कारणे तर्कस्य अप्रतिष्ठितत्वेऽपि जगद्भेदे तस्य प्रतिष्ठितत्वं सम्भवति इति तर्कसहितभेदप्रत्यक्षादिना अद्वैतब्रह्मकारणवादः बाध्यते इति पूर्वपक्षिणः।

ननु अतिगम्भीरं जगत्कारणं न तर्केण अवगम्यते, तस्य आगममात्रगम्यत्वात्। तत् कथं पुनः तर्कनिमित्तः आक्षेप इति चेत् उच्यते मानान्तरायोग्यश्रुत्यर्थे स्वविषये श्रुतिरेव प्रामाण्यं भवतु नाम, स्फुटतरप्रतिष्ठितप्रामाणान्तरेण विरोधे तु मुख्यार्थात् प्रच्याव्य तस्याः गौणार्थकत्वं नीयते, यथा मन्त्रार्थवादौ। यत्तु तर्कस्य अप्रतिष्ठितत्वात् न श्रुत्यर्थे तर्कनिमित्तस्य आक्षेपस्य अवकाशः इति उक्तं—तत्रोच्यते—तर्कोऽपि यद्यपि स्वविषयात् अन्यत्र धर्माधर्मादौ अप्रतिष्ठितः, तथापि स्वविषये जगद्भेदे तु तर्कस्य प्रतिष्ठितत्वमेव। तथा च श्रुत्या सह तर्कस्य तुल्यविषयत्वाभावात् तयोः विरोधाभावः इति श्रुतेः प्रामाणान्तरप्रसिद्धार्थबाधनं न युक्तम्। जगद्विषये तर्कादेः प्रामाण्यात् द्वैतबाधकत्वं श्रुतेरयुक्तम् इत्यद्वैतसमन्वयबाधः युक्तः इत्यर्थः। कथं नाम प्रामाणान्तरप्रसिद्धोऽर्थः श्रुत्या बाध्यते इति चेत्। उच्यते भोक्तृभोग्यविभागस्तावत् लोके प्रसिद्धः—भोक्ता चेतनः शारीरः इति भोग्याश्च

शब्दादयः विषयाः इति। यथा भोक्ता देवदत्तः भोज्यश्च ओदनः इति। स चायं विभागः नोपपद्येत यदि भोक्तुः भोग्यभावापत्तिः भोग्यस्य वा भोक्तृभावापत्तिः इति भोक्तृभोग्ययोः मिथः एकत्वं स्वीक्रियते। तयोश्च भोक्तृभोग्ययोः इतरेतरभावापत्तिप्रसङ्गश्च परमकारणात् ब्रह्मणः कार्यजातस्य अनन्यत्वात् आयाति। तयोः भोक्तृभोग्ययोः एकेन ब्रह्मणा सह अभेदश्रवणात् एकत्वं कल्प्यते, एकस्मात् अभिन्नयोः भेदे एकस्यापि भेदापत्तेः। तथा च अद्वैतब्रह्म-कारणावादे स्वीकृते अयं भेदः बाध्यते। न चास्य लोकप्रसिद्ध-विभागस्य बाधः युक्तः। यथा च अद्यतनयोः भोक्तृभोग्ययोः भेदः दृश्यते तथा अतीतानागतयोः अपि भेदः अनुमेयः। यदि अतीता-नागतयोः सर्गयोः एष विभागः न भवेत्, ततः तेन अद्यतनस्य विभागस्य बाधः स्यात्, स्वप्नदर्शनस्य जाग्रद्दर्शनेन इव। न तु एतदस्ति, अबाधितेन अद्यतनदर्शनेन तयोः अपि अबाधितत्वानु-मानात्। तस्मात् सर्वकालप्रसिद्धस्य अस्य भोक्तृभोग्यभेदस्य अभावप्रसङ्गात् अद्वैतब्रह्मकारणवादः न युक्तः इति स्थितः पूर्वपक्षः।

तत्र व्यावहारिकभेदप्रतिपादनार्थं परिणामदृष्टान्तेन आपाततः सिद्धान्तमाह 'स्याल्लोकवत्' इति। अस्य अयमर्थः—अयं लोक-प्रसिद्धः विभागः अद्वैतब्रह्मवादे अपि उपपद्यते, एवं लोके दृष्टत्वात्। तथाहि यद्यपि उदकात्मकात् समुद्रात् तद्विकाराणां फेनवीचीतरङ्ग-बुद्बुदादीनाम् अनन्यत्वम् अस्ति, तथापि तयोः इतरेतरविभागः इतरेतरसंसर्गादिलक्षणः व्यवहारश्च दृश्यते। न हि फेनादीनां समुद्रात् अभेदेन तेषां परस्परभावापत्तिः इतरेतरविभागाद्यभावश्च भवति। न खलु एकस्मात् अभिन्नानां मिथः अभेदः, तेषां भिन्नत्वे च एकस्यैव भेदापत्तिः इति वक्तुं युक्तम्। उदकात्मकात् समुद्रात् अनन्यत्वे अपि तद्विकाराणां फेनतरङ्गादीनाम् इतरेतरभावापत्त्य-भावात् तेषां भेदे अपि समुद्रस्य एकत्वात्। न च फेनादीनाम्

इतरेतरभावापत्त्यभावात् मिथः भिन्नत्वेन तेषां समुद्रात् भिन्नत्वम्, अन्यथा समुद्रस्यापि तत्तद्भेदेन भेदप्रसङ्गात् इति वाच्यम्। न हि इतरेतरभावापत्त्यभावे अपि समुद्रात् फेनादीनाम् अन्यत्वं केनापि स्वीक्रियते। एवं भोक्तृभोग्ययोः मिथः भेदः ब्रह्माभेदश्च इति न भोक्तृभोग्ययोः मिथः भेदः ब्रह्माभेदश्च इति न भोक्तृभोग्ययोः इतरेतरभावापत्तिः, न च परस्माद् ब्रह्मणः भोक्तृभोग्ययोः अत्यत्वं भविष्यति। ननु, फेनादीनां समुद्रविकारत्वात् तदभेदेऽपि, जीवस्य ब्रह्मविकारत्वाभावात् दृष्टान्तवैषम्यम् इति चेत्, उच्यते—यद्यपि भोक्ता न ब्रह्मणो विकारः 'तत् सृष्ट्वा तदेवानुप्राविशत्' इति[६] अविकृतस्य एव स्रष्टुः कार्यानुप्रवेशेन भोक्तृत्वश्रवणात्, तथापि कार्य्यम् अनुप्रविष्टस्य अस्ति उपाधिनिमित्तः विभागः आकाशस्येव घटाद्युपाधिनिमित्तः। अतः परमकारणात् ब्रह्मणः अनन्यत्वे अपि उपपद्यते भोक्तृभोग्यलक्षणः विभागः, यथा समुद्रात् अभेदे अपि फेनतरङ्गादीनां मिथः भेदः उपपद्यते। तस्मात् युक्तमेव जगतः ब्रह्मकारणत्वम्।

(ख) आरम्भणाधिकरणम्[८७]

अद्वितीयात् ब्रह्मणः इदं सर्वं जगत् उत्पद्यते, ब्रह्मणि च सर्वासाम् उपनिषदां तात्पर्यम् इति ब्रह्मणि वेदान्तानां समन्वयः विषयः। ब्रह्मणि अवगम्यमानम् इदम् अद्वैतं प्रत्यक्षादिसिद्धेन भोक्तृभोग्यभेदेन बाध्यते इति पूर्वपक्षे व्यावहारिकं भोक्तृभोग्य-लक्षणं विभागम् अभ्युपगम्य समुद्रतरंगादिदृष्टान्तेन 'स्याल्लोकवत्' इति परिहारः अन्यत्र अभिहितः। तत्र अयं सन्देहः—किमेतौ भेदाभेदौ तात्त्विकौ व्यावहारिकौ वा इति। एकत्वं नानात्वम् इत्युभयमपि पारमार्थिकत्वेन सत्यम्, एकत्वमेव वा इति शंकाशयः।

तत्र पूर्वपक्षी आह—एकत्वं नानात्वम् इति उभयमपि सत्यम् इति, तरंगादिरूपेण भेदस्य, समुद्ररूपेण अभेदस्य च दृष्टत्वेन

भेदाभेदयोः विरोधाभावात्, भेदाभेदविरोधव्यवहारस्य एकस्मिन्नपि वस्तुनि सावकाशत्वात्। तथा च, यथा वृक्षः इति एकत्वं शाखाः इति नानात्वम्, यथा च समुद्रात्मना एकत्वं फेनतरंगाद्यात्मना नानात्वम्, तथा ब्रह्माकारेण अद्वैतम्, जगदाकारेण च नानात्वम् इति एकत्वं नानात्वम् इत्युभयस्यापि सत्यत्वम् इति।

तत्र सिद्धान्तिभिः उच्यते—मैवम्, पूर्वाधिकरणे प्रदर्शितः विभागः वस्तुतः नास्त्येव। कुतः? कार्यकारणयोः अनन्यत्वात्। कार्यम् इदं जगत्, कारणं परं ब्रह्म। तस्मात् ब्रह्मरूपात् कारणात् परमार्थतः अनन्यत्वं व्यतिरेकेण अभावः = कारणात् पृथक्सत्त्वशून्यत्वम् (न तु ऐक्यम्) जगद्रूपस्य कार्यस्य। कुतः? आरम्भणशब्दादिभ्यः। तथाहि छान्दोग्यश्रुतौ एकविज्ञानेन सर्वविज्ञानं भवतीति प्रतिज्ञायाः दृष्टान्तापेक्षायाम् उच्यते—'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्'[८८] इति। अस्य अयमर्थः—एकस्मिन् मृत्पिण्डे परमार्थतो मृदात्मना ज्ञाते सति तेनैव सर्वेषां मृन्मयानां घटशरावोदञ्चनादीनां ज्ञानं भवति, तेषां सर्वेषामपि मृदात्मत्वात्। कारणभूता मृत्तिका एव सत्यभूता, वागारभ्यं नाममात्रं हि विकारजातम्, अत एव तत् अनृतम्। नहि मृदः पृथक्त्वेन वस्तुवृत्तेन विकारो नाम कश्चिद् अस्ति। वाचारम्भणशब्दाद् दार्ष्टान्तिकेऽपि कारणरूपब्रह्मव्यतिरेकेण कार्यरूपस्य जगतः अभावः इति गम्यते। तेजोऽबन्नकार्याणां च तेजोऽबन्नव्यतिरेकेण अभावः श्रूयते 'अपागाद् अग्नेरग्नित्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम्'[८९] इति। तेषामपि सन्मात्रत्वात् सदेव शिष्यते। एवम् 'ऐतदात्म्यमिदं सर्वम्'[९०] 'इदं सर्वं यदयमात्मा'[९१] 'ब्रह्मैवेदं सर्वम्'[९२] 'आत्मैवेदं सर्वम्'[९३] 'नेह नानास्ति किञ्चन,'[९४] इत्यादीनि वाक्यानि अपि कारणरूपस्य एकस्य आत्मन एव सत्यत्वं प्रतिपादयन्ति। जीवजगतोः ब्रह्मान्यत्वे एकविज्ञानेन सर्वविज्ञानं न प्रति-

पद्यते। तस्मात् यथा घटशरावाद्याकाशः महाकाशात् न भिद्यते, एवम् अस्य भोक्तृभोग्यादिलक्षणस्य जगत्प्रपञ्चस्यापि ब्रह्मव्यतिरेकेण सत्ताशून्यत्वम् इति द्रष्टव्यम्।

एकत्वं नानात्वं च इत्युभयमपि सत्यम् इति यदुक्तं तन्न, यतः दृष्टान्ते 'मृत्तिकेत्येव सत्यम्' इति प्रकृतिमात्रस्य सत्यत्वम् अवधृतम्, वाचारम्भणम् इत्यनेन च विकारस्य अनृतत्वम् अभिहितम्। दार्ष्टान्तिकेऽपि 'ऐतदात्म्यमिदं सर्वं तत् सत्यम्' इति केवलं परमकारणस्यैव सत्यत्वं वज्रलेपायते। 'स आत्मा तत्त्वमसि श्वेतकेतो' इत्यनेन च जीवात्मनः ब्रह्मात्मत्वम् उपदिष्टम्। स्वयंसिद्धेऽस्मिन् ब्रह्मात्मत्वे अवगते सति क्रियाकारकफललक्षणः समस्तनानात्मक व्यवहारः बाध्यते। तथा च श्रुतिः—'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत्'[१५] 'नेह नानास्ति किञ्चन'[१६] इत्यादिः।

न चायं ब्रह्मात्मभावः, व्यवहाराभावश्च अवस्थाविशेषनिबन्धनः, 'तत्त्वमसि' इति श्रुत्या नित्यस्यैव ब्रह्मात्मैक्यस्य प्रदर्शनात्। तस्करदृष्टान्तेन अपि अनृताभिसन्धस्य बन्धनं सत्याभिसन्धस्य च मोक्षं श्रावयित्वा एकत्वस्यैव पारमार्थिकत्वं नानात्वस्य च मिथ्याज्ञानविजृम्भितत्वं दर्शयति श्रुतिः। उभयस्य सत्यत्वे नहि व्यवहारगोचरस्य जीवस्य अनृताभिसन्धत्वम् उच्येत। 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति'[१७] इति श्रुत्या च नानात्वम् अपोदितम्।

ननु ऐकान्तिके एकत्वे नानात्वाभावे च अभ्युपगम्यमाने प्रत्यक्षादीनां लौकिकानां प्रमाणानां विधिनिषेधपराणां च शास्त्राणां च अप्रामाण्यं प्रसज्येत। तथा शिष्यशासित्रभावे मोक्षशास्त्रस्यैव व्याघातः स्यात् इति चेत्। न, यथा प्रबोधात् प्राक्स्वाप्नव्यवहारस्य सत्यत्वेन ग्रहणं भवति, तथा ब्रह्मात्मत्वविज्ञानात् प्राक् विकारेषु अनृतत्वबुद्धिः न जायते इति कृत्वा लौकिकानां वैदिकानां च सर्वेषां व्यवहाराणां प्रामाण्योपपत्तेः।

न च मृदादिदृष्टान्तात् मृदादेः इव ब्रह्मणोऽपि परिणामित्वं कल्पनीयम्, 'महानज आत्माऽजरोऽमरः' [९८] 'अस्थूलमनणु' [९९] इत्यादि-श्रुतिभ्यः ब्रह्मणः सर्वविक्रियारहितत्वेन कूटस्थत्वावगमात्। नापि ब्रह्मणः ऐकान्तिके एकत्वे सति ईशित्रीशितव्यभावस्यापि अभाव इति ईश्वरकारणप्रतिज्ञाविरोधः इति वक्तव्यम्। यतः अविद्यात्मक-नामरूपव्याकरणापेक्षं व्यावहारिकं हि ईश्वरत्वं सर्वज्ञत्वं सर्वशक्ति-मत्त्वं च। न हि परमार्थतः सर्वोपाधिविनिर्मुक्ते आत्मनि ईशित्री-शितव्यसर्वज्ञत्वादिव्यवहारः उपपद्यते, 'यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद् विजानाति' [१००] इत्यादिश्रुतेः। सूत्रकारेणापि परमार्थाभिप्रायेणैव तदनन्यत्वम् इत्युक्तम्। एवं 'सदेव सोम्येदमग्र आसीत्' इत्यादि श्रुत्यन्तराच्च एकस्य कारणस्यैव ब्रह्मणः सत्यत्वम्, नानात्मककार्य्यस्य च कारणाभिन्नत्वेन मिथ्यात्वम् अवधारितम् इति जगतो ब्रह्माभेदात् अद्वैतं ब्रह्म तात्त्विकम्, भेदज्ञानं तु व्यावहारिकम्।

अनुमानेनापि कारणादनन्यत्वं कार्यस्य अवगम्यते—'भावे चोपलब्धेः'। तथाहि—कारणस्य सद्भावे एव कार्यस्य सद्भावः उपलभ्यते, नाभावे। यथा मृत्तिकायाः सद्भावे घटः उपलभ्यते तन्तुसद्भावे च पटः। न हि अन्यस्य सद्भावे अन्यस्य उपलब्धिः नियमेन दृश्यते। अपि च तन्तुसंस्थानरूपे पटे तन्तुव्यतिरेकेण पटरूपस्य कार्य्यस्य उपलब्धिः न भवति। एवं च अवरकालीनस्य कार्यस्य कारणात्मनैव सत्त्वश्रवणात् कार्यस्य कारणात् अनन्यत्वम्। 'सदेव सोम्यदेमग्र आसीत्' [१०१] 'आत्मा वा इदम् एक एवाग्र आसीत्' [१०२] इत्यादौ इदंकारास्पदस्य कार्य्यस्य कारणेन सदात्मना सामानाधिकरण्यव्यपदेशात्। उपपत्तेः प्राक् अनन्यत्वात् च उत्पन्न-मपि कार्यम् कारणात् अव्यतिरिक्तम् इत्येव अवगम्यते। 'असदे-वेदमग्र आसीत्', [१०३] 'असद् वा इदमग्र आसीत्' [१०४] इत्यादिवचनात् कार्यस्य उत्पत्तेः प्राक् असत्वम् इति चेत्। न, तत् सदासीत् इति

'तदात्मानं स्वयमकुरुत' इत्याद्युपसंहारवाक्ये कारणात्मना सत एव कार्यस्य व्यपदेशात्। असत्त्वं च 'नामरूपव्याकरणात् प्राक् असदिव आसीत्' इत्यर्थे उपचर्यते।

अपि च, क्षीरमृत्तिकासुवर्णादिभ्यः उपादानेभ्यः दधिघटरुचकादीनि नियमेन उत्पद्यन्ते इति लोके दृश्यते। उत्पत्तेः प्राक् कारणे कार्य्यस्य असत्त्वे सर्वस्य सर्वत्र असत्त्वाविशेषात् कस्मात् क्षीरादेव दधि उत्पद्येत, न मृत्तिकायाः, मृत्तिकाया एव च घट उत्पद्येत न क्षीरात्? तस्मात् क्षीरादौ दध्यादिकम् अस्ति, तानि च दध्यादिभावेन अवतिष्ठमानानि कार्य्याख्यां लभन्ते इति न कारणाद् अन्यत्वं कार्य्यस्य। अपि च, प्रसारितः पटः संवेष्टितात् पटाद् न भिद्यते, प्राणापानादीनि च प्राणात् न भिद्यन्ते इत्यादि दृष्टान्तेन कार्यस्य कारणादनन्यत्वम् अवगम्यते। तस्मात् कृत्स्नस्य जगतो ब्रह्मकार्यत्वाद् ब्रह्मव्यतिरेकेण च तस्य अभावात् सिद्धम् अद्वैतं ब्रह्म एव तात्त्विकम् इति

तदुक्तं वैयासकन्यायमालायां समासेन—भेदाभेदौ तात्त्विकौ स्तो यदि वा व्यावहारिकौ। समुद्रादाविव तयोर्बाधाभावेन तात्त्विकौ। बाधितौ श्रुतियुक्तिभ्यां तावेतौ व्यावहारिकौ। कार्य्यस्य कारणाभेदात् अद्वैतं ब्रह्मतात्त्विकम्। इति।

८. सत्कारणवादः

अद्वैतवेदान्तिनां मते कार्यकारणयोः अनन्यत्वम्। न चैवं कारणम् एव कार्यम् इति कार्यकारणयोः अभेदः, अपि तु कारणम् एव कार्य्यरूपेण प्रकाशते, इति कार्यस्य कारणव्यतिरेकेण अभावः इति। तथा च भाष्यकारः—कारणात् कार्यस्य परमार्थतः अनन्यत्वं कारणव्यतिरेकेण कार्य्यस्य स्थित्यभावः अवगम्यते इति। कार्य्यं परमार्थतः कारणात् अनन्यभूतम्, न भिन्नम्, कारणव्यतिरेकेण तस्य स्थित्यभावात्। कारणं तु कार्य्यव्यतिरेके न स्थातुं शक्नोति।

तथा च कार्य्यकारणयोः मध्ये कारणं सत्यम्, कार्यं तु आभासमात्रम् इति कारणात्मनैव तस्य सत्यत्वम्, कारणात् भिन्नत्वे तु तस्य अनृतत्वम्। एवं कार्य्यकारणयोः मध्ये कारणम् एव सत्, कार्य्यं तु असत् इति अयं सत्कारणवादः इत्युच्यते।

कार्य्यस्य कारणमात्रत्वं कारणात् अनन्यत्वं, कारणव्यतिरेकेण असत्त्वं च श्रुतौ उक्तम्। तथाहि—'सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयम्' इति अस्य जगत्प्रपञ्चस्य परमकारणं सत् इति श्रावयित्वा जगत्प्रपञ्चस्य च परमार्थतः सन्मात्रत्वं दर्शयति श्रुतिः। तत्र दृष्टान्तापेक्षायाम् आह—'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' इति। एकेन मृत्पिण्डेन परमार्थतः मृदात्मना ज्ञातेन सर्वं मृण्मयं विज्ञातं भवति। मृत्तिकायाः कार्य्यं घटशरावादिकम्। तत्र कारणभूता मृत्तिका एव सत्यम्, कार्य्यभूतं घटादिकं तु वागालम्बनमात्रं नामधेयमात्रम् इति घटादिकं कार्य्यम् अनृतम्। एवं दार्ष्टान्तिके अपि अस्य जगतः सत्कार्य्यत्वात् सन्मात्रं सर्वं, सद्व्यतिरेकेण च सर्वस्य जगतः अनृतत्वं प्रदर्शयति श्रुतिः—'ऐतदात्म्यमिदं सर्वम्' इति। पुनश्च तेजोऽबन्नानां ब्रह्मकार्यत्वम् उक्त्वा तेजोऽबन्नकार्य्याणां तेजोऽबन्नव्यतिरेकेणाभावं ब्रवीति—अपागादग्नेरग्नित्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् इति। एवं श्रुत्यन्तरमपि—'ऐतदात्म्यमिदं सर्वं तत् सत्यं स आत्मा तत्त्वमसि' इदं सर्वं यदयमात्मा, ब्रह्मैवेदं सर्वम्, आत्मैवेदं सर्वम्, नेह नानास्ति किञ्चन इत्येवं कार्यरूपस्य जगतः कारणरूपब्रह्मव्यतिरेकेण अभावः प्रदर्श्यते। तस्मात् कारणमेव सत्यं, कार्यं तु अनृतम्।

ननु कारणरूपेण एकत्वं कार्यरूपेण नानात्वम् इति कार्यकारणयोः उभयोः अपि सत्यत्वं भवतु, न केवलस्य कारणस्य, यथा समुद्रात्मना एकत्वं फेनतरंगाद्यात्मना नानात्वम्, मृदात्मना एकत्वं घटशरावादिना नानात्वम्। एवम् एकमपि ब्रह्म अनेकशक्ति-

प्रवृत्तियुक्तत्वात् यथार्थत्वेनैव नानारूपेण प्रकाशते इति चेत्। नैवं स्यात्, मृत्तिकेत्येव सत्यम् इति प्रकृतिमात्रस्य दृष्टान्ते सत्यत्वावधारणात् वाचारम्भणशब्देन च विकारजातस्य अनृतत्वाभिधानात्। दार्ष्टान्तिकेऽपि ऐतदात्म्यमिदं सर्वं तत् सत्यम् इति सन्मात्रस्य सत्यत्वावधारणात्। 'स आत्मा तत्त्वमसि श्वेतकेतो' इति च शारीरस्य ब्रह्मभावोपदेशात्। जीवो हि ब्रह्मणः अभिन्नः, एकमेव ब्रह्म जीवरूपेण विराजते इति जीवोऽपि सद्रूपं ब्रह्म एव। इदं च ब्रह्मात्मत्वम् अवगम्यमानं स्वाभाविकस्य शारीरात्मभावस्य बाधकं संपद्यते। बाधिते च शारीरात्मभावे तदाश्रयः समस्तः स्वाभाविकः व्यवहारोऽपि बाधितो भवति दर्शितं च 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत्' इत्यादिना ब्रह्मात्मदर्शिनं प्रति समस्तस्य क्रियाकारकफललक्षणस्य व्यवहारस्य अभावम्। तस्करदृष्टान्तेन च अनृताभिसन्धस्य बन्धनं सत्याभिसन्धस्य च मोक्षं दर्शयन् एकत्वमेव एकं पारमार्थिकं दर्शयति। मिथ्याज्ञानविजृम्भितं च नानात्वम्, 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' इति भेददर्शनस्य निन्दितत्वात्।

कार्य्यस्य कारणादनन्यत्वं च एवम् उपपद्यते—उत्पत्तेः प्राक् अवरकालीनस्य कार्य्यस्य कारणात्मनैव अवस्थानं श्रूयते तथा च —'सदेव सोम्येदमग्र आसीत्', 'आत्मा वा इदमग्र आसीत्' इत्यादि श्रुतौ इदंशब्दगृहीतस्य कार्य्यस्य कारणेन सामानाधिकरण्यं दर्शितम्। यच्च यदात्मना यत्र न वर्तते, न तत् ततः उत्पद्यते यथा सिकताभ्यस्तैलम्। तस्मात् प्रागुत्पत्तेः अनन्यत्वात् उत्पन्नमपि कार्यम् कारणात् अनन्यदेव इति अवगम्यते।

न तावत् उत्पत्तेः प्राक् कार्यस्य कारणात् अनन्यत्वम्, उत्पत्त्यनन्तरं तु अन्यत्वम् इति वक्तव्यम्। यथैव हि उत्पत्तेः प्राक् कार्य्यं कारणात्मना आसीत् तथैव इदानीम् अपि तत् कारणम् अन्तरेण न स्वतन्त्रम् अस्ति। अत एव इदं कार्य्यभूतं जगत् त्रिषु

कालेषु सत्त्वं न व्यभिचरति। 'सर्वं तं परादात् योऽन्यत्रात्मनः सर्वं वेद' इत्यादिः श्रुतिश्च आत्मभिन्नत्वेन जगतः दर्शनं निन्दति। तस्मात् यथा उत्पत्तेः प्राक् कार्यस्य कारणात्मना सत्त्वं तथा अधुना अपि इति अविशिष्टम्। अतोऽपि कारणात् कार्य्यस्य अनन्यत्वम्। न च कार्य्यम् उत्पत्तेः प्राक् नासीत् उत्पत्त्यनन्तरं च अस्ति इति कार्य्यं कारणात् भिन्नम् इति सत्कारणवादभंगः इति वाच्यम्, कारणव्यतिरेकेण कार्यस्य स्थित्यभावेन अनृतत्वात्। तथा च कारणभूतसद्रूपत्वेनैव जगतः सत्यत्वं स्वतंत्रकार्य्यरूपत्वेन तु अनृतत्वम् इति कारणव्यतिरिक्तं स्वतन्त्रं कार्य्यं यथा अधुनापि नास्ति, तथा उत्पत्तेः प्रागपि नासीत्। सदात्मना सत्यत्वाभ्युपगमात् सर्वं नामरूपादि विकारजातं सदात्मना एव सत्यं स्वतस्तु अनृतमेव यथा अस्य जगत्प्रपञ्चस्य सदात्मना एव सत्यत्वम्, स्वतस्तु अनृतत्वम् = प्रपञ्चो ब्रह्मात्मना सत्यः स्वरूपेण मिथ्येति स्वीकर्तव्यम्, एवं सर्वव्यवहाराणां सर्वविकाराणाञ्च कारणं सदेव इति सदात्मनैव सर्वेषां सत्यत्वम्, सतोऽन्यत्वे च अनृतत्वम् कारणव्यतिरेकेण कार्य्यस्य स्थित्यभावात् इति श्रुतिप्रमाणात् लभ्यते।

उत्पत्तेः प्राक् कार्यस्य कारणे सद्भावः इति सांख्यैरिव अद्वैतिभिः अपि अभ्युपगम्यते। अयं हि कार्यस्य कारणे सद्भावः प्रत्यक्षानुमानादिभिः अवगम्यते। तथाहि कारणस्य भावे = सत्त्वे उपलब्धौ च कार्यस्य सत्त्वम् उपलब्धिश्च भवति। यथा सत्यां मृदि घटः उपलभ्यते, सत्सु च तन्तुषु पटः। तस्मात् कार्य्यं कारणात् अनन्यभूतम्। "घटो मृदनन्यः मृत्सत्त्वोपलब्धिक्षणनियतसत्त्वोपलब्धिमत्त्वात्, मृद्वत्" इति अनुमानं रत्नप्रभायां दर्शितम्। न हि अन्यभावे अन्यस्य नियतोपलब्धिः भवति। न हि गोः भावे अश्वः उपलभ्यते। अपि च तन्तुसंस्थाने पटे तन्तुव्यतिरेकेण पटो नाम कार्य्यं नैव उपलभ्यते, केवलाः हि तन्तवः आतानवितानवन्तः प्रत्यक्षतः उपलभ्यन्ते। तथा तन्तुषु अंशवः,

अंशुषु तदवयवाः। एवं कार्यकारणयोः अनन्यत्वे प्रत्यक्षोपलब्धिः भवति। अनया प्रत्यक्षोपलब्ध्या लोहितशुक्लकृष्णानि त्रीणि रूपाणि, ततो वायुमात्रम् आकाशमात्रं चेति अनुमेयम्। "कार्य्यं विमत-कारणादभिन्नं कार्य्यत्वात् पटवत्' इति हि अनुमानम्। (भावे चोपलब्धेः, भावाच्चोपलब्धेः)

एवं दधिघटरुचकाद्यर्थिभिः क्षीरमृत्तिकासुवर्णादीनि प्रति-नियतानि कारणानि उपादीयन्ते। न हि दध्यर्थिभिः मृत्तिका उपादीयते, न च घटार्थिभिः क्षीरम्। उत्पत्तेः प्राक् कार्य्यस्य कारणे असत्त्वे नैतत् उत्पद्येत अविशिष्टे हि उत्पत्तेः प्राक् सर्वस्य सर्वत्र असत्त्वे कस्मात् क्षीरादेव दधि उत्पद्येत, न मृत्तिकायाः, मृत्तिकायाः एव च घट उत्पद्येत, न क्षीरात्। तस्मात् स्वीकरणीयः कार्य्यस्य कारणे सद्भावः। ननु एवं सति कारकव्यापारः अनर्थकः प्रसज्येत। यथैव हि प्राक्सिद्धत्वात् कारणस्वरूपसिद्धये न कश्चित् व्याप्रियते, एवं प्राक् सिद्धत्वात् अनन्यत्वाच्च कारणस्वरूपसिद्धये न कश्चित् व्याप्रियेत इति चेत्। न, कार्य्याकारेण कारणं व्यवस्थापयतः कारकव्यापारस्य अर्थवत्त्वोपपत्तेः। कार्य्याकारः अपि कारणस्य आत्मभूतः, अनात्मभूतस्य आरभ्यत्वायोगात्। न च विशेषदर्शन-मात्रेण वस्तुनः भेदः स्वीकरणीयः। न हि देवदत्तः संकोचितहस्तपादः प्रसारितहस्तपादश्च अन्यत्वं गच्छति। तस्मात् कार्य्यस्य कारणे सद्भावः नानुपपन्नः। अस्मिन् विषये सांख्यैः सह अद्वैतिनां मतभेदः नास्ति। परन्तु सांख्याः कारणस्य इव कार्यस्यापि सत्यत्वं स्वी-कुर्वन्ति, अद्वैतिनां मते तु कार्य्यम् अनृतम्, कारणम् एव सत्यम् = सत् इति इदं मतं सत्कारणवादः इत्युच्यते।

(क) एकमेवाद्वितीयम्[१०६]

कार्यम् उत्पत्तेः प्राक् कारणे अस्तीति सत्कार्यवादिनः। इदं च कार्यभूतं जगत् सृष्टेः प्राक् सद्रूपेण आसीत् इति सत्कार्यवादिनः

वेदान्तिनः। यद्यपि इदं जगत् अधुनापि सदेव, तथापि तत् नामविशिष्टं रूपविशिष्टं च सत् इदं शब्दबुद्धिविषयं भवति। प्रागुत्पत्तेस्तु नामविहीनं रूपविहीनं च सत् नेदं शब्दबुद्धिगोचरम्, अपि तु केवलसच्छब्दबुद्धिमात्रगम्यम् आसीत् इति भावः। यच्च सद् आसीत्, तस्य किं स्वरूपम् इति प्रश्ने उच्यते—'एकमेवाद्वितीयम्' इति। तत् सत् अस्तितामात्रम् एकम्, निर्विशेषं निरञ्जनं निरवयवं द्वितीयवस्त्वन्तररहितं च आसीत् इत्यर्थः।

अत्र 'एव' शब्दः अवधारणार्थः। यद् इदं जगत् नामरूपक्रियावत् विकृतम् उपलभ्यते, तत् सदेव आसीत्, न तु कदापि असत् इति अवध्रियते इत्यर्थः। तदा च स्वकार्यपतितम् अन्यत् किमपि नासीत् इति एकमित्युच्यते। न च तस्य सतः द्वितीयं वस्त्वन्तरम् आसीत् इति अद्वितीयम् इत्युच्यते। अद्वैतिनां मते अत्र अद्वितीयम् इति सत्स्वरूपे विजातीयभेदराहित्यसूचनाय, एकम् इति सजातीयभेदराहित्यसूचनाय, एव इति च, स्वगतभेदराहित्यसूचनाय। तथाहि भेदः त्रिविधः,—विजातीयवस्तुभ्यः भेदः = विजातीयभेदः, सजातीयवस्तुभ्यः भेदः = सजातीयभेदः, अवयवान्तरेभ्यः भेदः स्वगतभेदः इति। तथा चोक्तम्—वृक्षस्य स्वगतो भेदः पत्रपुष्पफलादिभिः। वृक्षान्तरात् स्वजातीयो विजातीयः शिलादिभिः॥' १०७ इति पञ्चदश्याम्। सर्वकारणकारणभूते सद्रूपे ब्रह्मणि तु एतद् भेदत्रितयं नास्तीति अस्याः श्रुतेः तात्पर्यम्। तथा च चेतनभूतस्य सतः विजातीयभेदरहितत्वात् सद्व्यतिरिक्तम् अचेतनं प्रकृतिपरमाण्वादिकं किमपि नासीत्, सजातीयभेदरहितत्वात्, नैयायिकादीनाम् इव ब्रह्मव्यतिरिक्ताः आत्मानः नासन्, स्वगतभेदरहितत्वात्, रामानुजीयादीनाम् इव ब्रह्मविशेषणभूताः चिदचिद्रूपाः पदार्थाः नासन् इति भावः।

कार्यम् उत्पत्तेः प्राक् कारणे असत् इति असत्कार्यवादिनः। सत्कार्यवादिनां मते तु उत्पत्तेः प्रागपि कार्यं कारणे सदेव इति। इदं

च जगत्सत्कार्यम् इति सृष्टेः प्रागपि इदं जगत् सदेव आसीत् इति सत्कार्यवादिनः अद्वैतवादिनः। तत्र च—'सदेव सोम्येदमग्र आसीद् एकमेवाद्वितीयम्' इति श्रुतिः प्रमाणत्वेन उपन्यस्यते। यत् इदं नामरूपक्रियावत् विकृतं जगत् उपलभ्यते, तत् उत्पत्तेः प्राक् सदेव आसीत्। न च अग्रे सत् आसीत् इत्यनेन इदानीम् इदं सद्भिन्नं सञ्जातम् इति वाच्यम्। इदानीम् अपि इदं जगत् सदेव किन्तु नामरूपविशेषणवद् इदंशब्दबुद्धिविषयं च भवति उत्पत्तेः पूर्वं तु केवलसच्छब्दबुद्धिमात्रगम्यम् इदम् आसीत् इति। यथा सुषुप्तिकाले सदपि वस्तु इदं शब्दबुद्धिगोचरं न भवति तथा उत्पत्तेः प्राक् सदपि जगत् नामवत्त्वेन रूपवत्त्वेन च इदमिति न व्यवहर्त्तुं शक्यम्। यथा च सुषुप्तेः उत्थितः सुषुप्तिकालीनसत्त्वमात्रम् स्मृत्या अवगच्छति, तथा उत्पत्तेः प्रागपि सत्त्वमात्रम् आसीत् इत्यभिप्रायः। यथा च लोके पूर्वाह्णे घटादिसिसृक्षुणा कुलालेन मृत्पिण्डं प्रसारितमुपलभ्य ग्रामान्तरं गत्वा प्रत्यागतः जनः अपराह्णे तत्रैव घटशरावाद्यनेक-वस्तुजातं कार्यमुपलभ्य इदं घटशरावादिकं पूर्वाह्णे केवलं मृदेव आसीदिति अभ्युपगच्छति तथा इहापि उत्पत्तेः प्राक् सदेव आसीत् इति अभ्युपगम्यते। एवं स्वगत-सजातीय-विजातीयभेदरहितं सत् एव जगत्कारणम् इति अद्वैतिनां मतम्।

(ख) एकविज्ञानेन सर्वविज्ञानम्[१०]

"तदनन्यत्वमारम्भणशब्दादिभ्यः" इति सूत्रभाष्ये "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इति छान्दोग्यवचनबलात् भगवता शङ्कराचार्य्येण कारणात् कार्य्यस्य अनन्यत्वं प्रदर्शितम्। कार्य्यं घटादिकं मृदादिभ्यः कारणेभ्यः न भिद्यते। एवं आकाशादिकं बहुप्रपञ्चं जगत् कार्य्यम्, तस्य कारणं च परं ब्रह्म, तस्मात् कारणात् ब्रह्मणः कार्य्यस्य प्रपञ्चस्य परमार्थतः अनन्यत्वं कारणव्यतिरेकेण कार्यस्य स्थित्यभावः अवगम्यते।

एवं कार्यस्य कारणाव्यतिरेकात् कारणे विज्ञाते सर्वं कार्यजातं विज्ञातं भवति। तथाहि कारणभूतायां मृदि ज्ञातायां घटादिकं कार्य्यजातं विज्ञातं भवति। एवम् अस्य जगतश्च कारणं सदेव इति सत्स्वरूपे ब्रह्मणि विज्ञाते सर्वं जगत् विज्ञातं भवति। तथा च छान्दोग्योपनिषदि—'येनाश्रुतं श्रुतं भवत्यमतं मतम् अविज्ञातं विज्ञातम्' इति एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय दृष्टान्तापेक्षायाम् उच्यते—'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् इति। लोके एकेन मृत्पिण्डेन कुम्भादिकारणभूतेन परमार्थतो मृदात्मना विज्ञातेन सर्वम् अन्यत् मृण्मयं मृद्विकारजातं घटशरावोदञ्चनादिकं मृदात्मकत्वाविशेषाद् विज्ञातं भवेत्। एवम् एकेन सुवर्णपिण्डेन विज्ञातेन सर्वं सुवर्णमयं विज्ञातं स्यात्; एकेन च नखनिकृन्तनेन विज्ञातेन सर्वं कार्ष्णायसं विज्ञातं स्यात्।

न च अन्यविज्ञानात् अन्यविज्ञानस्य अदृष्टत्वात् कथं मृत्पिण्डे कारणे विज्ञाते कार्य्यं घटादिकं विज्ञातं स्यात् इति वाच्यम्, कारणेन अनन्यत्वात् कार्य्यस्य। अन्यस्मिन् विज्ञाते अन्यन्न ज्ञायते इति सत्यमेवं स्यात्, यदि कारणात् कार्य्यम् अन्यत् स्यात्। नतु एवं कारणात् अन्यत् कार्य्यम्। कारणमेव कार्य्यरूपेण प्रतिभासते। अत एव पारमर्षं सूत्रं—"तदनन्यत्वमारम्भणशब्दादिभ्यः" इति। ननु कारणात् कार्य्यस्य अनन्यत्वं चेत् कथमिदं लोके उच्यते "इदं कारणम् अयं विकारः" इति? उच्यते—वाचारम्भणं विकारः नामधेयम्। वागालम्बनमात्रं—नामैव केवलं न विकारो नाम वस्तु अस्ति। परमार्थतो मृत्तिका इत्येव मृत्तिका एव तु सत्यं वस्तु अस्ति। तथा च शारीरकसूत्रभाष्ये भगवान् भाष्यकार आह—"एतदुक्तं भवति—एकेन मृत्पिण्डेन परमार्थतो मृदात्मना विज्ञातेन सर्वं मृण्मयं घटशरावोदञ्चनादिकं मृदात्मकत्वविशेषात् विज्ञातं भवेत्। यतः वाचारम्भणं विकारो नामधेयं—वाचैव केवलमस्तीति आर-

भ्यते। विकारो घटः शरावः उदञ्चनं चेति। न तु वस्तु वृत्तेनविकारो नाम कश्चित् अस्ति। नामधेयमात्रं हि एतदनृतं मृत्तिकेत्येव सत्यमिति। अतएव यद्यपि घटः पिण्डं व्यभिचरति पिण्डश्च घटम्, तथापि पिण्डघटौ मृत्त्वं न व्यभिचरतः। तस्मात् कारणमात्रस्य एव सत्यत्वम्। तस्मिन् ज्ञाते च सर्वं विकारजातं विज्ञातं स्यात् इति स्थितम्। तथा च घटादिकार्य्यजातस्य मृद्रूपकारणाभिन्नत्वात् मृदि ज्ञातायां घटादिकं ज्ञातं भवति। एवम् अस्य प्रपञ्चस्य कारणभूतसदभिन्नत्वात् सद्रूपे कारणे विज्ञाते सति कार्य्यभूतं जगदपि ज्ञातं भवति।

अत्रायं भावः—यथा कार्य्यं घटादिकं कारणरूपायाः मृत्तिकायाः न भिन्नम्, तथा अत्रापि कार्य्यम् आकाशादिकं बहुप्रपञ्चं जगत्, कारणं परं ब्रह्म, तस्मात् कारणात् परमार्थतोऽनन्यत्वं व्यतिरेकेणाभावः कार्य्यस्य अवगम्यते।

तथाहि जगतः उत्पत्तेः प्राक् इदं जगत् केवलसच्छब्दबुद्धिमात्रगम्यम् आसीत्। तत् सत् बहुभवनार्थम् ऐक्षत=संकल्पयामास। ततः तत् सत् आकाशवायुसर्गानन्तरं तेजोऽसृजत, तत् तेजः अपः असृजत, ताः आपः अन्नम् असृजन्तः इति स्थूलभूतानां कारणानि तेजोऽबन्नभूतानि त्रीणि रूपाणि। ततः सद्रूपा देवता ताः तिस्रः देवताः अनुप्रविश्य नामरूपे व्यक्ती कृतवती। अग्न्यादित्यचन्द्रविद्युतां यत् रोहितं रूपं तत् तेजः, यत् शुक्लं तदप्रपां यत् कृष्णं तद् अन्नस्य इति त्रीणि रूपाणि इत्येव सत्यम्।

जीवदेहे अपि अशितस्य अन्नस्य मध्यमः धातुः मांसं भवति अणिष्ठः धातुः मनः भवति। जलस्य मध्यमः धातुः शोणितं भवति, अणिष्ठः धातुः प्राणः भवति। तैलघृतादितेजसः मध्यमः धातुः मज्जा भवति, अणिष्ठः धातुः वाक् भवति। एवं शोणितमांसमज्जानां मनःप्राणवाचां च अन्नजलतेजोमूलकत्वात् त्रीणि रूपाणि इत्येव सत्यम्।

तथा अन्नरसादिपरिपाकात् इदं शरीररूपं कार्य्यमुत्पन्नम्। कार्य्यत्वात् शरीरं नामूलम्। अन्नं च तस्य मूलम्, अन्नस्य मूलमपः अपां तेजः तेजसः सत्। अतः स्थावरजङ्गमलक्षणाः सर्वाः प्रजाः उत्पन्ने सति प्रलीयन्ते, सति च प्रतिष्ठन्ते सति च प्रतिष्ठन्ते इति सत् एव जगतः कारणम् इति जगतः ब्रह्मसत्तातिरिक्ता सत्ता नास्त्येव। यच्च सत्जगतः मूलं तेन आत्मना आत्मवत् सर्वम् इदं जगत् इति यथा दृष्टान्ते मृत्तिकयेत्येव सत्यम् इति अवधृतं तथा दार्ष्टान्तिकेऽपि ऐतदात्म्यम् इदं सर्वं तत् सत्यम् इति परमकारणस्यैव सत्यत्वम् अवधारितम्, 'नेह नानास्ति किञ्चन'[१०९] इति श्रुत्यन्तरं च। नानात्वस्य मिथ्याज्ञानविजन्तितत्वं दर्शयति। सत्रवात्मा जगतः प्रत्येकस्वरूप इति जीवात्मा परमात्मनो न भिद्यते।

तत्रै वं सति यथा कारणभूतायाः मृत्तिकायाः ज्ञानात् कार्य्यभूतानां घटशरावादीनां ज्ञानं लभ्यते। एवम् अस्यापि जगतः यत् कारणभूतं सत्; तस्मिन् ज्ञाते सति सर्वमिदं जगत् विज्ञातं भवति। तथाहि सर्वं वस्तुजातं तेजोऽबन्नानां त्रिवृत्करणेन उत्पन्नम्। अग्न्यादीनां यद् रोहितं रूपं तद् तेजसः रूपम्, यत् शुक्लं तदपां, यत् दृष्टं तद् अन्नस्य इत्येवं सर्वत्र कारणभूतानां तेजोऽबन्नानां वर्तमानात् त्रीणि रूपाणि इत्येव सत्यम्, इति तेजोऽबन्नानां ज्ञानात् सर्वेषां वस्तुजातानां ज्ञानं लभ्यते। तेषु च त्रितयेषु अन्नम् अद्भ्यः जायते, इति अवज्ञानात् अन्नज्ञानं भवति। पुनश्च आपः तेजसः जायन्ते इति तेजोज्ञानात् सर्वाः आपः ज्ञायन्ते। तच्च तेजः वायोः उत्पद्यते, वायुश्च आकाशात्, आकाशश्च सतः आत्मनः। 'आत्मन आकाशः सम्भूतः'[११०] इति श्रुतेः। तस्मिन् सर्वकारणकारणभूते सति विज्ञाते सर्वं कार्य्यजातं विज्ञातं भवति, सर्वेषाम् सत्कार्य्यत्वात् सृष्टेः प्राक् तत् सत् एकम् अद्वितीयं 'सजातीय-विजातीय-स्वगत-भेदशून्यं आसीत्' तत एव सर्वमिदं जातम्। तत् च सत् आत्मा

इति वेदान्तिनः। तथा च आत्मा एव जगद्रूपेण भासते, 'आत्मैवेदं सर्वम्'[१११] इति श्रुतेः। तस्मिन् आत्मनि विज्ञाते सर्वं विज्ञातं भवति।

उद्धृति सूचिका

१. तै. उ. २. १. १
२. प. पा. २३
३. स. शा. १. १८६
४. तै. उ. २.१-२.५
५. के. उ. २. ३
६. श्वे. उ. ६. ११
७. बृ. उ. ३. ९. २६
८. बृ. उ. ३. ८. ८
९. के. उ. १. ४
१०. क. उ. १. ३. १५
११. श्वे. उ. ६. ११
१२. क. त. १. १. २०
१३. क. त. १. १. २०
१४. ब्र. सू. श. भा. १. १. २०
१५. गी. श. भा. उपक्रम
१६. अ. सि. ७२१
१७. छा. उ. ७. २३, २४
१८. सा. गि. टी., छा. उ. ७. १४. १
१९. श्वे. उ. ४. २०,
क. उ. २. ३. ९
२०. बृ. २. ४. १४
२१. वे. प. २३१-७
२२. तै. उ. ३. १
२३. मु. उ. १. १. ९
२४. छा. उ. ६. २. ३
२५. तै. उ. २. ६
२६. बृ. उ. २. ४. ६
२७. तै. उ. २. ६. १
२८. तै. उ. २. ६
२९. वे. प. २३७
३०. छा. उ. ६. २. २
३१. वे. प. पृ. २६२
३२. बृ. उ. २. ३. ६
३३. बृ. उ. ४. ४. १९
३४. वे. प. २२८-३०
३५. तै. उ. २. १. १
३६. बृ. उ. ३. ९. २८
३७. तै. उ. ३. ६
३८. अ. सि. ६७६
३९. प. पा. २३
४०. सि. को. १. २, ३४
४१. छा. उ. ६. २. १

४२. छा. उ. ६. २. ३
४३. ऐ. उ. १. १. १
४४. प्र. उ. ६. ३. १४
४५. छा. उ. ६. २. ३
४६. छा. उ. ६. १९
४७. ब्र. सू. १. ४. २३
४८. छा. उ. ६. १. २
४९. छा. उ. ६. १
५०. गु. उ. १. १
५१. तै. उ. ३. १
५२. मु. उ. २. २. ११
५३. छा. उ. ३. १४. १
५४. छा. उ. ७. २५. २
५५. छा. उ. ६. ८. ७
५६. तै. उ. ३. १
५७. छा. उ. १. ९. १
५८. मु. उ. ३. १. ३
५९. मु. उ. १. १. ६
६०. मु. उ. १. १. ७
६१. अ. सि. ७५७
६२. अ. सि. ७५७
६३. छा. उ. ६. २. ३
६४. ऐ. उ. ४. १. २
६५. तै. उ. २. ६
६६. तै. उ. २. ७
६७. तै. उ. ३. १
६८. अ. सि. ७६०
६९. गु. उ. १. १. ७
७०. विव. ६५२
७१. तै. उ. २. १
७२. तै. उ. २. ६
७३. गु. उ. १. १. ९
७४. श्वे. उ. ४. १०
७५. मु. उ. १. १. ९
७६. ब्र. सू. १. १. २०
७७. ब्र. सू. १. २. १
७८. श्वे. उ. ४. १०
७९. तै. उ. ३. १
८०. द्र. ब्र. सू. श. भा. २. १. ३२, ३३
८१. बृ. उ. ४. ५. ६
८२. स. वे. सि. सा. स. १२
८३. तै. उ. ३. ६
८४. छा. उ. श. भा. ६. २
८५. ब्र. सू. २. १. १७
८६. तै. उ. २. ६
८७. ब्र. सू. २. १. १४–२०
८८. छा. उ. ६. १. १
८९. छा. उ. ६. ४. १
९०. छा. उ. ६. ८. ७
९१. बृ. उ. २. ४. ६
९२. मु. उ. २. २. ११
९३. छा. उ. २. २५. २
९४. बृ. उ. ४. ४. १९

९५. बृ. उ. ४. ५. १५
९६. बृ. उ. ४. ४. १९
९७. बृ. उ. ४. ४. १९
९८. बृ. उ. ४. ४. २५
९९. बृ. उ. ३. ८. ८
१००. छा. उ. ७. २४. १
१०१. छा. उ. ६. २. १
१०२. ऐ. उ. १. १. १
१०३. छा. उ. ३. १९ १
१०४. तै. उ. २. ७. १
१०५. द्र. ब्र. सू. २. १. १
१४–२०
द्र. आरम्भणाधिकरणम् च.
१०६. द्र. छा. उ. ६. २
१०७. प. द. २. २०
१०८. छा. उ. भा. ६. २–८
द्र. ब्र. सू. शा. भा. २. १. १४
१०९. बृ. उ. ४. ४. १९
११०. तै. उ. २. १
१११. छा. उ. ७. २५. २

तृतीयः परिच्छेदः

८. कोशपञ्चकम्

अखण्डचैतन्यरूपं ब्रह्म स्वरूपतः निष्प्रपञ्चं सकलभेदरहितम्। तत् अखण्डं ब्रह्म अज्ञानोपहितं सद् इदं समग्रं जगत् निर्मिमीते। अज्ञानस्य आवरणशक्त्या ब्रह्मणः स्वरूपम् आव्रियते, विक्षेपशक्त्या च आकाशात् आरभ्य स्थूलभूतान्तं समग्रं जगत् उत्पद्यते। तथाहि, विक्षेपशक्तिमदज्ञानोपहितात् चैतन्यात् अपञ्चीकृतानि आकाशादीनि सूक्ष्मभूतानि जायन्ते। मायायाः त्रिगुणत्वात् तत्कार्याणि आकाशादीनि अपि त्रिगुणानि। तत्र सत्त्वगुणप्रधानेभ्यः रजोगुणप्रधानेभ्यश्च अपञ्चीकृतभूतेभ्यः सूक्ष्मशरीराणि उत्पद्यन्ते। तमोगुणप्रधानेभ्यः अपञ्चीकृतभूतेभ्यश्च आकाशादीनि पञ्चीकृतानि पञ्चभूतानि जायन्ते। तेभ्यः पञ्चीकृतभूतपञ्चकेभ्यः भूरादीनां सप्तानाम् अतलादीनां सप्तानां ब्रह्माण्डस्य तदन्तर्गतचतुर्विधस्थूलशरीराणां तदुचितानाम् अन्नपानादीनां चोत्पत्तिः भवति।

अज्ञानं समष्टिव्यष्ट्यभिप्रायेण एकम् अनेकम् इति च व्यवह्रियते। तत्र समष्ट्यज्ञानोपहितं चैतन्यम् ईश्वरः। तस्येदं समष्ट्यज्ञानम् अखिलकारणत्वात् कारणशरीरम्, आनन्दप्रचुरत्वात् आनन्दमयम्, कोशवत् आच्छादकत्वात् कोशरूपम्। आनन्दप्रचुरत्वम् उपहितः धर्मः, आच्छादकत्वम् अज्ञानधर्मः। तदुभयाविवेकात् कारणम् अज्ञानम् आनन्दमयकोश इत्युच्यते। एवं व्यष्ट्यज्ञानोपहितं चैतन्यं प्राज्ञः, तस्यापि इदं व्यष्ट्यज्ञानं कारणशरीरम्, आनन्दप्रचुरत्वात्, कोशवत् आच्छादकत्वात् च आनन्दमयकोशः भवति। अस्मिन् कारणशरीरे सर्वे स्थूलसूक्ष्मोपाधयः लीनं गच्छन्ति इति तत् स्थूलसूक्ष्मप्रपञ्चलयस्थानम् इति सुषुप्तिः इति च उच्यते। तत्र

समष्ट्यज्ञाने समष्टिस्थूलसूक्ष्मोपाधीनां लयः व्यष्ट्यज्ञाने व्यष्टिस्थूलसूक्ष्मोपाधीनां लयः इति विवेकः।

सूक्ष्मशरीरम् अपि समष्टिव्यष्टिभेदेन एकम् अनेकं च इति भवति। समष्टिसूक्ष्मशरीरोपहितं चैतन्यम् सूत्रात्मा हिरण्यगर्भः प्राणो वा इत्युच्यते, सर्वत्र अनुस्यूतत्वात्, ज्ञानेच्छाक्रियाशक्तिमदपञ्चीकृतपञ्चमहाभूताभिमानित्वात् च। व्यष्टिसूक्ष्मशरीरोपहितं चैतन्यं च तेजोमयान्तःकरणोपहितत्वात् तैजसम् इत्युच्यते। सूक्ष्मशरीरं च जाग्रद्वासनामयत्वात् समष्टिपक्षे विराड्रूपेण व्यष्टिपक्षे च विश्वरूपेण अनुभूतायाः स्थूलप्रपञ्चविषयकवासनायाः उत्सभूतत्वात् स्वप्न इति स्थूलप्रपञ्चलयस्थानम् इति च उच्यते। इदं सूक्ष्मशरीरं विज्ञानमयः, मनोमयः, प्राणमयश्चेति कोशत्रयात्मकम्। तत्र सूक्ष्मशरीरस्य तावत् सप्तदश अवयवाः—ज्ञानेन्द्रियपञ्चकम्, कर्मेन्द्रियपञ्चकम्, प्राणपञ्चकम् बुद्धिमनसी चेति। तत्र सत्त्वगुणप्रधानैः व्यस्तैः पञ्चभूतैः ज्ञानेन्द्रियाणि जायन्ते। तैरेव मिलितैः बुद्धिमनसी जायेते। रजोगुणप्रधानैः पञ्चभूतैः कर्मेन्द्रियाणि जायन्ते। तैरेव मिलितैः पञ्चप्राणाः जायन्ते। तत्र बुद्धिः ज्ञानेन्द्रियैः सहिता विज्ञानमयकोशो भवति। बुद्धिस्तु ब्रह्मैवाहम् इत्येवं निश्चयात्मिकान्तःकरणवृत्तिः। ज्ञानेन्द्रियाणि च श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि। बुद्धेः सत्त्वकार्य्यत्वात् ज्ञानेन्द्रियसाहित्येन प्रकाशाधिक्यात् विज्ञानमयत्वम्, आच्छादकत्वात् कोशत्वम्।

मनः ज्ञानेन्द्रियैः सहितं सत् मनोमयकोशः भवति। मनो नाम सङ्कल्पविकल्पात्मिका अन्तःकरणवृत्तिः। 'अहं चिद्रूपः देहो वा' इति संशयात्मिका अन्तःकरणवृत्तिः एव मन इत्यर्थः। एतत् मनः श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यैः ज्ञानेन्द्रियैः सहितं मनोमयकोशः भवति। मनसः सत्त्वोपहितरजोविकारेच्छारूपत्वात्, सङ्कल्पविकल्पात्मकत्वेन बुद्ध्यपेक्षया जाड्याधिक्यात् मनोमयत्वम्, आच्छादकत्वात् कोशत्वम्।

प्राणादिपञ्चकम् कर्मेन्द्रियैः सहितं सत् प्राणमयकोशो भवति। वायवः प्राणापानव्यानोदानसमानाः। कर्मेन्द्रियाणि वाक्पाणिपादपायूपस्थाख्याः। एतेषां प्राणादीनां प्राणप्रचुरत्वात् प्राणमयत्वम्, आच्छादकत्वात् कोशत्वं च भवति।

एतेषु कोशेषु मध्ये विज्ञानमयः ज्ञानशक्तिमान् कर्तृरूपः। विज्ञानमयकोश एव कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वाद्यभिमानत्वेन इहलोकपरलोकगामी व्यावहारिकः जीव इत्युच्यते। विज्ञानस्य चैतन्यं प्रति सन्निहितत्वात् ज्ञानशक्तिमत्त्वम्।

मनोमयः इच्छाशक्तिमान् करणरूपः। 'कामः सङ्कल्पः विचिकित्सा'[2] इत्यादिश्रुतेः इच्छायाः मनोवृत्तित्वावधारणात् इच्छाशक्तिमत्त्वम् मनोमयकोशस्य।

प्राणमयः क्रियाशक्तिमान् कार्य्यरूपः। 'स प्राणम् असृजत'[3] इत्यादिश्रुतेः प्राणमयकोशस्य क्रियाशक्तिमत्त्वम्। तौ मिथुनं समैतां ततः प्राणोऽजायत'[4] इति श्रुतेः प्राणस्य वाङ्मनसोः मिथुनीभूतयोः उत्पत्तिश्रवणात् प्राणमयस्य कार्य्यरूपत्वं युक्तम्।

स्थूलप्रपञ्चमपि समष्टिव्यष्टिभेदेन एकम् अनेकं च भवति। तत्र समष्टिस्थूलप्रपञ्चोपहितं चैतन्यं वैश्वानरः विराट् वा भवति। व्यष्टिस्थूलशरीरोपहितं चैतन्यं च विश्वः भवति। तत्र विराड्रूपस्य चैतन्यस्य एषा ब्रह्माण्डन्तर्गता चतुर्विधशरीरसमष्टिः अन्नविकारत्वात् अन्नविकारबाहुल्यात् वा अन्नमयः, आच्छादकत्वात् कोशः इति स अन्नमयकोशः भवति। एवम् एतेषां चतुर्विधशरीराणां या व्यष्टिः तत्तच्छरीरव्यक्तिर्वा सा अपि अन्नमयकोशः भवति। इदं सूक्ष्मशरीरं स्थलभोगायतनम्। तत्र हि इन्द्रियैः अर्थोपलम्भात् तत् जाग्रत् इत्युच्यते।

एवं च अज्ञानोपहितः आनन्दमयः, बुद्ध्युपहितः विज्ञानमयः, मन उपहितः मनोमयः, प्राणोपहितः प्राणमयः स्थूलशरीरोपहितश्च अन्नमयः इति आखण्डलार्थः

९. ईश्वरः

अनादिभावरूपं ज्ञानविरोधि यद् अज्ञानं तत् समष्ट्यभिप्रायेण एकम् इति व्यष्ट्यभिप्रायेण अनेकम् इति च व्यवह्रियते। समष्ट्यज्ञानाभिप्रायेण उक्तम्–'अजामेकाम्'[६] इति, व्यष्ट्यज्ञानाभिप्रायेण च उक्तम्—'इन्द्रो मायाभिः पुरुरूप ईयते'[७] इति। तत्र अनादिसिद्धं समष्ट्यज्ञानम् उत्कृष्टोपाधितया उपाध्यन्तराननुरक्ततया अप्रतिहतज्ञानात्मकस्य चैतन्यस्य उपाधितया वा विशुद्धं सत्त्वप्रधानं रजस्तमोभ्याम् अनभिभूतं रागद्वेषादिरहितं भवति। एतत् समष्ट्यज्ञानोपहितं (भामतीपन्थि-पक्षे समष्ट्यज्ञानावच्छिन्नं मायावच्छिन्नं वा विवरणानुसारिपक्षे मायोपाधिविशिष्टम्) समष्ट्यज्ञानोपलक्षितं वा चैतन्यम् ईश्वरः।

यद्यपि समष्टेः ईश्वरोपाधित्वे पालनार्थं सत्त्वप्राधान्यवत् सृष्टिसंहारार्थं रजस्तमःप्राधान्यम् अपि अस्ति एव इति सत्त्वस्य उक्तिः विरुद्धा; तथापि अत्र सत्त्वप्राधान्यं न पालनार्थम् उक्तम्, किन्तु ईश्वरं प्रति समष्टेः मोहानापादकत्वम्, व्यष्टेस्तु जीवं प्रति मोहापादकत्वात् मलिनसत्त्वप्राधान्यम्।

ननु ईश्वरोपाधिः अज्ञानसमष्टिः कुतः इति चेत्। उच्यते—जीवानां हि प्रत्येकम् अज्ञानव्यष्टयः स्फुरन्ति, न अज्ञानसमुदायः, ईश्वरस्य तु सकलानि अज्ञानानि स्फुरन्ति, तस्य सर्वज्ञत्वात्। अतः अज्ञानसमष्टिः ईश्वरोपाधिः।

वस्तुतस्तु न अज्ञानसमष्टिः ईश्वरोपाधिः। अज्ञानसमष्टिः हि अज्ञानसमुदायः, वनम् इव वृक्षसमुदायः। समुदायश्च समुदायिभ्यः न भिन्नः। एवं च वनम् अनेकवृक्षात्मकम्। अज्ञानसमष्टिः अपि अनेकाज्ञानात्मिका। वनावच्छिन्नश्च आकाशः अनेकवृक्षावच्छिन्नाकाशसमुदायात् न भिन्नः, अनेकवृक्षातिरिक्तोपाधेः अभावात्, उपाधिभेदाभावे उपहितभेदाभावात्। एवं च अज्ञानसमूहोपहितं

चैतन्यं न ईश्वरः, अज्ञानसमूहोपहितस्य चैतन्यस्य प्रत्येकाज्ञानोपहितसमुदायरूपत्वात्, जीवसमूहस्य च अनीश्वरत्वात्। ततश्च अज्ञानसमष्टिः न ईश्वरोपाधिः। तस्मादत्र समष्टिशब्देन अनेकाज्ञाननिरूपिता एका विषयता एव उक्ता। स एव ईश्वरोपाधिः, अज्ञातस्य ब्रह्मणः ईश्वरत्वात् प्रत्येकाज्ञानोपहितजीवानाम् अनेकत्वे अपि तद्विषयतायाः एकत्वात् तदुपहितस्य ईश्वरस्य एकत्वम् उपपद्यते। तथा च एकैकाज्ञाननाशे अपि विषयतायाः तन्निरूपितत्वमात्रं नश्यति, न अज्ञानविषयता इति तदुपहितेश्वरस्य यावत्सर्वमुक्त्यवस्थानम् उपपद्यते। चरममुक्तिदशायां तु तत्त्वज्ञानेन अज्ञाननिवृत्तौ तत्प्रयोज्या विषयता अपि निवर्तते इति चिन्मात्रम् अवशिष्यते। तस्मात् सुष्ठूक्तम्—'अज्ञानविषयतोपहितः ईश्वरः' इति। तदुक्तं कल्पतरौ—'जीवाश्रिताभिः अविद्याभिः विषयीकृतत्वम् उपाधिः इति'।[८] स च सत्त्वप्रधानाज्ञानविषयतोपहितः विष्णुः, स च अखिलस्य जगतः पालकः। रजःप्रधानविषयतोपहितः ब्रह्मा, स च अखिलस्य जगतः स्रष्टा। तमःप्रधानाज्ञानविषयतोपहितः रुद्रः स अखिलस्य जगतः संहर्ता एते त्रयः अनादिसिद्धाः, व्यापकाः सर्वज्ञाश्च।

तस्मात् समष्ट्यज्ञानोपलक्षितम् ईश्वरचैतन्यं सर्वज्ञत्व-सर्वनियन्तृत्वादिगुणकम्, अव्यक्तम्, अन्तर्यामि, जगत्कारणम् इति च व्यपदिश्यते। 'यः सर्वज्ञः सर्ववित्'[९] इति श्रुतेः। सर्वज्ञ इति सामान्यतः सर्ववित् इति विशेषतः उक्तम्। 'सदेव सोम्येदम्'[१०] 'एष सेतुर्विधरणः',[११] 'एष त आत्मान्तर्याम्यमृतः'[१२] 'महतः परमव्यक्तम्'[१३] 'यतो वा इमानि भूतानि जायन्ते'[१४] 'यः परः स सर्वेश्वरः'[१५] इत्यादि श्रुतिरपि अत्र मानम्। इदम् ईश्वरचैतन्यं सकलाज्ञानावभासकत्वात्' सर्वस्य चराचरात्मकप्रपञ्चस्य साक्षित्वात् च सर्वज्ञ इत्युच्यते। तथा सर्वेषां जीवानाम् ईशितृत्वेन कर्मानुरूपफलदातृत्वेन ईश्वरः इति उच्यते। तथा सर्वेषां जीवा-

नाम् , अन्तः=हृदये स्थित्वा बुद्धिनियामकत्वेन अन्तर्यामी इति उच्यते। प्रमाणागोचरत्वात् अव्यक्तम् इत्युच्यते। सर्वस्य चराचरात्मकप्रपञ्चस्य विवर्ताधिष्ठानत्वेन जगत्कारणम् इति व्यपदिश्यते।

ईश्वरस्य अयम् अज्ञानात्मकसमष्ट्युपाधिः अखिलकारणत्वात् कारणशरीरम्। कारणावस्थायां स्थूलसूक्ष्मकार्यप्रपञ्चस्य अभावेन आनन्दप्रचुरत्वात् आनन्दमयः, कोशवत् शरीराच्छादकचर्मवत् आच्छादकत्वात् कोशः। तत्र आनन्दप्रचुरत्वम् उपहितधर्मः, आच्छादकत्वम् अज्ञानधर्मः। तदुभयाविवेकात् कारणम् अज्ञानम् आनन्दमयकोशः इत्यर्थः। सर्वे आकाशादयः तस्मिन् उपरमन्ते इति तत् समष्ट्यज्ञानम् सुषुप्तिः महासुषुप्तिः प्रलयः इत्युच्यते। अतएव च तत् स्थूलसूक्ष्मप्रपञ्चयोः लयस्थानम्।

ईश्वरः चैतन्यप्रदीप्तस्य स्वकीयज्ञानस्य सूक्ष्माभिः वृत्तिभिः स्वात्मानन्दबाहुल्यम् स्वरूपानन्दम् अनुभवति। 'आनन्दभुक् चेतोमुखः'[१] इति श्रुतेः। चेतोमुखः=चैतन्यं मुखवत् भासमानं यस्य सः, ईश्वरो वा चैतन्यदीप्ताज्ञानवृत्तिप्रधानः। एतच्च उपलक्षणम्। ईश्वरस्य सदा आनन्दस्फुरणात् अज्ञानवृत्त्या आनन्दस्फुरणं जीवस्य एव, ईश्वरस्य तु स्वत एव इति मन्तव्यम्।

ईश्वरस्य उपाधिः यद्यपि शुद्धसत्त्वप्रधानम् अज्ञानं माया वा इत्युच्यते, तथापि तत्र शुद्धसत्त्वगुणः न रजस्तमोगुणवर्जितः, रजस्तमयोः सत्त्वे अपि तयोः सत्त्वगुणेन अभिभूतत्वात् प्रकाशस्वभावस्य सत्त्वगुणस्य प्राधान्यं वर्तते। एषा शुद्धसत्त्वप्रधाना माया, मायाधिष्ठानचैतन्यं च इत्येतद् द्वयं मिलितम् ईश्वरः इति उच्यते। ईश्वरः सर्वान्तर्यामी, सर्वजीवानाम् अन्तःस्थित्वा स एव तान् कर्मसु प्रेरयति। प्रकाशस्वभावसत्त्वगुणमयत्वात् ईश्वरः निरावरणः, तस्य स्वविषयकं जीवविषयकं जगद्विषयकं वा न किञ्चित् आवरणम् अस्ति। एवं च ईश्वरः सर्वज्ञः, तस्य निखिल-

प्रपञ्चविषयकं प्रत्यक्षज्ञानं सर्वदा अस्ति, सर्वेषु विषयेषु तस्य ज्ञानेच्छाकृत्यादयः अप्रतिहताः तिष्ठन्ति । तस्मादेव स सर्वशक्तिमान् । स हि अस्य जगतः सृष्टिस्थितिसंहारादिकं करोति, 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यं प्रयन्त्यभिसंविशन्ति'[१] इत्यादिश्रुतिबलात् ईश्वरः एव जगतः कारणम् इति 'जन्माद्यस्य'—सूत्रे भाष्यकारैः निर्धारितम् । एवं च सर्वकारणकारणत्वात् ईश्वरः सर्वैश्वर्यमयः इति तस्य सगुणत्वम् । न हि निर्गुणस्य सर्जनपालनादिकं सम्भवति । ईश्वरस्य निरावरणत्वात्, अप्रतिहतज्ञानादिमत्त्वात् च स नित्यमुक्तः, नित्यमुक्तत्वात् च जन्ममरणादिरहितः । ईश्वरस्य मायोपहितत्वात् सृष्टिस्थित्यादिकं मायोपहितस्य चिदाभासस्य कर्म, न तु असङ्गस्य अधिष्ठानचैतन्यस्य । मायोपहितचिदाभासश्च मिथ्या इति ईश्वरोऽपि मिथ्या । परब्रह्मणः मायिकाभिव्यक्तिरूपः अयं सगुणः ईश्वरः न परमार्थसत्यरूपः । तदुक्तं 'तस्मान्मायी सृजते विश्वमेतत्'[१८] इति । वस्तुतः स्वरूपतः ब्रह्मणो अभिन्नः ईश्वरः सर्वोपधिवर्जितः नित्यशुद्धबुद्धमुक्तस्वभावः मायातीतः । न हि तस्मिन् मायायाः कार्यं सम्भवति । अपि तु मायासहायः सन् मायावी इव स जगत् कार्यं करोति । "अविद्याकृतनामरूपोपाध्यनुरोधीश्वरो भवति, व्योमेव घटकरकाद्युपाध्यनुरोधि । .... तदेवम् अविद्यात्मकोपाधिपरिच्छेदापेक्ष्यम् एव ईश्वरस्य ईश्वरत्वं सर्वज्ञत्वं सर्वशक्तित्वं च, न परमार्थतो विद्ययापास्तसर्वोपाधिस्वरूपे आत्मनि ईशित्रीशितव्यसर्वज्ञत्वादिव्यवहार उपपद्यते ।"[१९] तथा चोक्तम्—'यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा'[२०] इति । 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत्'[२१] इति च । अयमेव परमेश्वरः एकोऽपि स्वोपाधिभूतमायानिष्ठानां सत्त्वरजस्तमोगुणानां भेदेन ब्रह्मविष्णु-महेश्वरादि-शब्दवाच्यतां भजते ।

१०. प्राज्ञः[२२]

सकलप्रपञ्चकारणस्य अज्ञानस्य समष्ट्यभिप्रायेण एकत्वे अपि अहङ्कारादिकारणीभूतानां जीवगताज्ञानानां व्यष्ट्यभिप्रायेण प्रत्येकविवक्षायां अनेकम् इति व्यवह्रियते। यथा वृक्षसमुदायस्य वनरूपत्वेन एकत्वव्यवहारे अपि व्यष्ट्यभिप्रायेण चूतादयः बहवः वृक्षाः इति अनेकत्वव्यपदेशः। यथा वा, वापीतडागादिषु समुदायविवक्षया जलाशयः इति एकत्वव्यवहारे अपि प्रत्येकं वाप्यादिविवक्षया बहूनि जलानि इति व्यवह्रियते। तथा च श्रुतिः 'इन्द्रो मायाभिः पुरुरूप ईयते'[२३] इति। इन्द्रः परमेश्वरः मायाविक्षेपशक्तिभिः विक्षिप्तेषु देहेन्द्रियान्तःकरणेषु प्रतिबिम्बितः बहुरूपः सन् प्रकाशते इत्यर्थः। एवं 'य एको जालवान् ईशते ईशनीभिः'[२४] इत्यादि श्रुतिरपि अत्र मानम्।

अयम् अभिप्रायः—जीवभेदः तावत् आवश्यकः, बद्धमुक्तप्रतिभासात्—बद्धाः अस्मदादयः, मुक्ताश्च वामदेवादयः। न हि एकस्य जीवस्य बद्धत्वं मुक्तत्वं च सम्भवति। 'न तस्य प्राणा उत्क्रामन्ति'[२५] इत्यादिशास्त्रात् इहैव च मुक्तिः श्रूयते। क्रममुक्तिफलानि च श्रूयन्ते। जीवभेदे सत्येव हि एतत् सर्वम् उपपद्यते। जीवभेदे अज्ञानभेदोऽपि वक्तव्यः, अन्यथा कस्यचित् तत्त्वज्ञानेन अज्ञाने निवृत्ते जीवान्तरस्य बन्धानुपपत्तेः। तत्त्वज्ञानेन अज्ञाननिवृत्तौ तत्त्वज्ञानिनः अपि मोक्षः न स्यात्, अज्ञानसत्त्वात्। तस्मात् अज्ञानभेदः वक्तव्यः 'अजामेकाम्' इत्यादि श्रुतौ तु समष्ट्यभिप्रायेण जात्यभिप्रायेण वा एकत्वव्यपदेशः। इयं जीवगता व्यष्ट्यविद्या सुषुप्त्यवस्थापन्ना, अहङ्कारादिविक्षेपसंस्कारादिरूपा, निकृष्टोपाधितया मलिनसत्त्वप्रधाना। ज्ञानप्रतिबन्धकावरणवान् जीवः निकृष्टः, तस्य उपाधिभूतायाम् अविद्यायां मलिनं = रजस्तमोभ्याम् अभिभूतं सत्त्वं प्राधान्यं न वर्तते।

एतद्व्यष्ट्यज्ञानोपहितं (अवच्छेदवादपक्षे व्यष्ट्यज्ञानावच्छिन्नम्, प्रतिबिम्बवादपक्षे अविद्याप्रतिबिम्बितं) चैतन्यम् अल्पत्वानीश्वरत्वादिगुणकं प्राज्ञः जीवः इत्युच्यते, एकाज्ञानावभासकत्वात्। अज्ञानैकदेशावभासकत्वात्। ननु अविद्याधीनं जीवत्वं, जीवाश्रिता च अविद्या इति अन्योन्याश्रयः इति चेत्। न, अविद्याजीवयोः बीजाङ्कुरवत् अनादित्वेन अदोषात्। प्राज्ञत्वं च अस्पष्टोपाधितया अनतिप्रकाशकत्वम्। संस्काररूपास्पष्टोपाधितया तदा आवृतत्वेन, रजस्तमोभ्याम् अभिभूतसत्त्वप्रधानव्यष्ट्यज्ञानोपाधिकत्वेन हेतुना अतिप्रकाशकत्वाभावात् प्राज्ञत्वम् इत्यर्थः। तथा च प्रायेण अज्ञः प्राज्ञः इति व्युत्पत्तिः।

व्यष्ट्यज्ञानस्यापि अहङ्कारादिकारणत्वात् कारणशरीरत्वम्। प्रलयकाले हिरण्यगर्भादिप्रपञ्चोत्पादकेश्वरगतमूलप्रकृतिवत् सुषुप्तिकाले अहङ्कारादिशरीरोत्पादकसंस्कारमात्रावशिष्टजीवगताज्ञानस्यापि कारणशरीरत्वम् इति अर्थः। तस्यापि इन्द्रियतद्विषयाभावेन व्यासङ्गाभावात् आनन्दप्रचुरत्वात् आनन्दमयत्वम्, कोशवत् आत्माच्छादकत्वात् च कोशत्वम् इति तद् आनन्दमयकोश इत्युच्यते। तच्च सर्वोपरमत्वात् सुषुप्तिः, अतएव स्थूलसूक्ष्मशरीरप्रपञ्चलयस्थानम् इति च उच्यते। पञ्चीकृतस्थूलशरीरस्य व्यावहारिकस्य अपञ्चीकृतसूक्ष्मशरीरे प्रातिभासिके प्रविलापितत्वात् तस्यापि प्रातिभासिकस्य स्वाप्नप्रपञ्चस्य स्वकारणे अज्ञाने लीनत्वात् सर्वोपरतिः इत्यर्थः। तदुक्तं वाक्यसुधायाम्—

> व्यावहारिकजीवस्य लयः स्यात् प्रातिभासिके।
> तल्लये सच्चिदानन्दाः पर्यवस्यन्ति साक्षिणि ॥[२६] इति।

अयं प्राज्ञः चैतन्यप्रदीप्ताभिः अतिसूक्ष्माभिः संस्कारमात्रावशिष्टाज्ञानवृत्तिभिः स्वानन्दबाहुल्यम् अनुभवति। यथा स्वच्छत्वेन अन्तःकरणस्य वृत्तिः अङ्गीक्रियते, तथा चैतन्यप्रदीप्ताज्ञानस्य

अपि सूक्ष्माः वृत्तयः स्वीक्रियन्ते। 'आनन्दभुक् चेतोमुखः प्राज्ञः'[२७] इति श्रुतेः। ननु सुषुप्तिदशायां किम् अज्ञानवृत्त्या, आनन्दस्फुरणस्य ईश्वरवत् जीवे अपि स्वत एव सम्भवात् इति चेत्। उच्यते—'सुखमहम् अस्वाप्सम् न किञ्चिदवेदिषम्' इति उत्थितस्य परामर्शोपपत्तेः। तथा च उत्तरकालीनसुखपरामर्शोपपत्तिः पूर्वानुभूतसुखबाहुल्यानुभवसद्भावे प्रमाणम्। 'सुखमहमस्वाप्सम्' इति आनन्दपरामर्शः, 'न किञ्चिदवेदिषम्' इति अज्ञानपरामर्शः। स्मरणं च संस्कारजन्यम्, संस्कारश्च अनुभवजन्यः इति नित्यसुखस्य सुषुप्तौ अनुभवः वक्तव्यः। स च चिद्रूपः। तस्य नित्यत्वेन संस्कारानाधायकत्वात् प्रकारान्तरस्य च असम्भवात्। अतः अविद्यावृत्त्या एव नित्यानन्दस्फुरणं वक्तव्यम्। तया च संस्कारजनने उत्थितस्य स्मरणसम्भवात्। स्वरूपचैतन्येन एव आनन्दस्फुरणे तस्य नित्यत्वेन संस्कारानाधायकत्वात् स्मरणानुपपत्तिप्रसङ्गात्। तस्मात् सुषुप्तौ अविद्यावृत्तिः आवश्यकी। ईश्वरस्य तु स्मरणं नास्ति किन्तु केवलं सुखानुभवः स च स्वरूपचैतन्येन एव सम्भवति इति। ईश्वरे अज्ञानवृत्तिः न स्वीकार्य्या।

समष्टिव्यष्ट्यज्ञानोपहितयोः ईश्वरप्राज्ञयोः अपि (अवच्छेदवादे) वनवृक्षावच्छिन्नाकाशयोः इव (प्रतिबिम्बवादे) जलाशयतद्गतप्रतिबिम्बाकाशयोः इव वा तत्त्वतः अभेदः। ईश्वरस्य वनावच्छिन्नाकाशवत्त्वम्, प्राज्ञस्य च वृक्षावच्छिन्नाकाशवत्त्वम्, यद्वा ईश्वरस्य जलाशयजलोपाधिविशिष्टाकाशवत्त्वम् प्राज्ञस्य च तद्गतप्रतिबिम्बाकाशवत्त्वम्। इति कार्योपाध्यवच्छिन्नप्राज्ञस्य कारणोपाध्यवच्छिन्नेश्वरस्य च वस्तुतः अभेद इत्यर्थः। 'एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्य्यामी एष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम्'[२८] इत्यादि श्रुतेः 'अथ य एष सम्प्रसादः अस्मात् शरीरात् समुत्थाय परं ज्योतिः उपसम्पद्य स्वेन रूपेण

अभिनिष्पद्यते'[29] इति श्रुतेश्च (छा.)। उक्तं च अनुभूति-प्रकाशे—

कार्य्योपाधिरयं जीवः कारणोपाधिरीश्वरः।
कार्य्यकारणतां हित्वा पूर्णबोधोऽवशिष्यते॥[30] इति।

ननु जीवेश्वरयोः औपाधिकयोः अभेदो न युक्तः, उपाध्योः भेदात्। न च तयोः अपि अभेदः युक्तः, तथा सति उपाध्योः अभेदे उपहितयोः अपि अभेदात् सर्वज्ञत्व-किञ्चिज्जत्वादि-धर्मसंकरात्। 'एष सर्वेश्वरः' इति श्रुतौ तु न उपहितयोः अभेदः उच्यते, किन्तु विरुद्धधर्मत्यागेन स्वरूपचैतन्यस्य अभेद उच्यते। उपहितयोः अभेदे 'तत्त्वमसि'[31] इति वाक्ये लक्षणावैयर्थ्य-प्रसङ्गाच्च। तस्मात् न उपहितयोः अभेद इति चेत्। उच्यते—अत्र 'भेदशब्देन भेदयति इति व्युत्पत्त्या भेदकत्वम् उच्यते, तदभावः अभेदः'। भेदकत्वाभावः अभेदः इत्यर्थः। अत्रायं भावः—उपाधिभ्यां हि वस्तुतः वस्तु न भिद्यते। न हि घटपटाभ्याम् आकाशः भिद्यते। तस्मात् उपाध्योः न वास्तवं भेदकत्वम्। उपाध्योः वास्तवभेद-कत्वाभावे च उपहितयोः वास्तवः अभेदः इति पर्यवस्यति।

११. हिरण्यगर्भः[32]

समष्टिलिङ्गशरीरोपहितं चैतन्यं हिरण्यगर्भः इत्युच्यते। तथा हि, विक्षेपशक्तिमदज्ञानोपहितचैतन्याद् आकाशः, आकाशाद्वायुः, वायोः तेजः, तेजसः आपः, अद्भ्यः च पृथिवी उत्पद्यते। इमानि सूक्ष्मरूपाणि पञ्चभूततन्मात्राणि अपञ्चीकृतानि। एतेभ्यः अपञ्ची-कृतभूतेभ्यः, सूक्ष्मशरीराणि उत्पद्यन्ते।

सूक्ष्मशरीरं च विज्ञानमयः, मनोमयः, प्राणमयः इत्येतत्कोशत्रयं मिलितं सत् भवति। कोशत्रयात्मकस्य सूक्ष्मशरीरस्य सप्तदशा-वयवाः—पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, प्राणादिपञ्चकं

बुद्धिमनसी च। अखिलसूक्ष्मशरीरं च एकबुद्धिविषयतया वनवत् जलाशयवत् च समष्टिः, अनेकबुद्धिविषयतया च वृक्षवत् जलवद् वा व्यष्टिः अपि भवति।

तत्र समष्टिसूक्ष्मशरीरोपहितं चैतन्यं हिरण्यगर्भः। चराचरप्राणिमात्रस्य यावन्ति अनन्तानि सूक्ष्मशरीराणि तेषां सर्वेषां सूक्ष्मशरीराणां सूत्रात्मना हिरण्यगर्भाख्येन स्वीयैकबुद्धया विषयीकृतत्वात् समष्टित्वम् इत्यर्थः।

ननु यथा वृक्षसमुदायः वनम्, तथा लिङ्गशरीरसमुदायः न समष्टिः, तथा सति वृक्षावच्छिन्नाकाशसमुदायः यथा वनावच्छिन्नाकाशः, न तु अतिरिक्तः, अतिरिक्तोपाधेः अभावात्, एवं समष्टिलिङ्गशरीरोपहितः हिरण्यगर्भः अपि परिच्छिन्नलिङ्गशरीरोपहितास्मदाद्यनेकजीवसमूहः इति आपद्येत, अतिरिक्तोपाधेः अभावात्। न चैतद् युक्तम्, हिरण्यगर्भस्य प्रभूतपुण्यजीवविशेषस्य अस्मदादिभ्यः भिन्नत्वेन श्रूयमाणत्वात्। हिरण्यगर्भलिङ्गशरीरस्य व्यापकत्वम् एकत्वं चावगम्यते शास्त्रात्। परिच्छिन्नलिङ्गशरीरोपहितास्मदाद्यनेकजीवसमूहस्य हिरण्यगर्भत्वे न तत् युज्यते किं च 'ज्ञानमप्रतिहतं यस्य' इत्यादिना हिरण्यगर्भस्य सर्वज्ञत्वादि प्रतीयते। यदि च जीवसमूहस्य हिरण्यगर्भत्वं तदा समूहस्य समूहिभ्यः अतिरिक्तत्वाभावेन अस्मदादीनाम् एव हिरण्यगर्भत्वेन सर्वज्ञत्वादिप्रसङ्गः। न चैतद् युक्तम्, अनुभवविरोधात्। तस्मात् न लिङ्गशरीरसमुदायः समष्टिः इति चेत्। उच्यते—सत्यम्, न लिङ्गशरीरसमुदायः समष्टिः किन्तु व्यापकं लिङ्गशरीरम् समष्टिशब्देन उच्यते। तदुपहितश्च हिरण्यगर्भः इति तस्य व्यापकत्वम् एकत्वं च युज्यते। अयं च आधिकारिकः कश्चित् जीवः एव, न तु ईश्वरः, 'सोऽबिभेत्'[33] इत्यादिना भयवत्त्वादिश्रवणात्।

इदं समष्टिसूक्ष्मशरीरोपहितं चैतन्यं सर्वत्र अनुस्यूतत्वात् सूत्रात्मेति उच्यते, 'वायुना वै गौतमसूत्रेण अयं च लोकः परश्च

लोकः सर्वाणि भूतानि संदृब्धानि'[34] इति वचनात्। ज्ञानेच्छाक्रियाशक्तिमत्कोशत्रयोपहितत्वात् अन्तःकरणोपहितत्वाद् वा हिरण्यगर्भः। क्रियाशक्तिमदधिदैवतप्राणरूपत्वात् प्राणः, तादृगध्यात्मप्राणरूपत्वाद् वा। यद्वा ज्ञानक्रियाशक्तिमत् समष्टिप्राणेन्द्रियसमुदायात्मकं समष्टिलिङ्गशरीरम्, तदुपहितत्वाद् ज्ञानशक्तिप्राधान्येन हिरण्यगर्भः, क्रियाशक्तिप्राधान्येन प्राणः इति च व्यपदिश्यते। स च कः प्रजापतिः ब्रह्मा इति च उच्यते। विज्ञानमयादिकोशत्रयं सूक्ष्मशरीरम् तस्य स्थूलप्रपञ्चापेक्षया सूक्ष्मत्वात्। विराडनुभूतस्थूलप्रपञ्चविषयकवासनामयत्वात् अस्य स्वप्नत्वम्। यतः स्वप्नत्वं सूक्ष्मत्वं च, अतएव स्थूलप्रपञ्चलयस्थानम्। 'अस्य लोकस्य सर्वावतो मात्राम् उपादाय स्वयं विहत्य'[35] इत्याद्या, 'स्वप्नेन शारीरमभिप्रहत्य'[36] इत्याद्या च श्रुतिः स्थूलशरीरस्य स्वप्ने लयं दर्शयन्ति।

अयं च सूत्रात्मा स्वप्नावस्थायां सूक्ष्माभिः मनोवृत्तिभिः जाग्रद्वासनामयान् शब्दादिसूक्ष्मविषयान् अनुभवति। यद्यपि स्वाप्निकपदार्थानां साक्षिणि अध्यस्तत्वेन सुखादिवत् साक्षिवेद्यत्वम्, तथापि मनसि वृत्तिः वर्तनं येषां ते निद्रादिदोषाः, तैः स्वयं विषयान् अनुभवति इति ज्ञातव्यम्।

अयं हिरण्यगर्भो ब्रह्मविष्णुरुद्रलक्षणात् मूर्तित्रयात् अन्यः प्रथमः जीवः, 'स वै शरीरः प्रथमः स वै पुरुष उच्यते। आदिकर्त्ता स भूतानां ब्रह्माग्रे समवर्तत॥ इति।

१२. तैजसः[37]

व्यष्टिलिङ्गशरीरोपहितं चैतन्यं तैजसः भवति। तथाहि लिंगशरीरं द्विविधं भवति—समष्टिभूतं व्यष्टिभूतं च। समष्टिभूतम् अपरिच्छिन्नम्, व्यष्टिभूतं परिछिन्नम् तत्र अनेकेषां जीवानां

प्रत्येकं स्व-स्वलिङ्गशरीरस्य स्वस्वबुद्धिविषयत्वेन अनेकबुद्धिविषयतया भिन्नभिन्नतया वा परिच्छिन्नत्वात् व्यष्टित्वम्। एतद् व्यष्टिसूक्ष्मशरीरोपहितं चैतन्यं तैजसः इत्युच्यते। सूक्ष्मशरीरस्य तावत् सप्तदश अवयवाः। ते च अवयवाः विज्ञानमयादिकोशत्रयात्मकाः। एतत् कोशत्रयमिलितं व्यष्टिसूक्ष्मशरीरम् एव कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वाद्यभिमानित्वेन इहलोकपरलोकगामी व्यावहारिकः जीवः इत्युच्यते।

विज्ञानमयादिकोशत्रयात्मकम् इदं शरीरम्। तेजोमयत्वात् तेजोमयान्तःकरणोपहितत्वात् वासनामयत्वाद् वा तैजसः इति स्थूलशरीरापेक्षया सूक्ष्मत्वात् सूक्ष्मशरीरम् इति उच्यते। तदेव जाग्रद् वासनामयत्वात् स्वप्नः इत्युच्यते, विश्वचैतन्येन अनुभूतस्थूलशरीरविषयकवासनामयत्वात् तस्य स्वप्नत्वम् इत्यर्थः। अतएव च तत् स्थूलशरीरत्रयस्थानमित्युच्यते।

अयं तैजसः स्वप्नावस्थायां सूक्ष्माभिः मनोवृत्तिभिः जाग्रद्वासनामयान् शब्दादिसूक्ष्मादिविषयान् अनुभवति, 'प्रविविक्तभुक् तैजस':[३८] इत्यादिश्रुतेः। यद्यपि स्वाप्निकपदार्थानां साक्षिणि अध्यस्तत्वेन सुखादिवत्साक्षिवेद्यत्वम्, तथापि मनसि वृत्तिः वर्तनं येषां ते निद्रादिदोषाः, तैः स्वयं विषयान् अनुभवति इत्यर्थः इति ज्ञातव्यम्।

अत्रापि समष्टिव्यष्ट्योः तदुपहितसूत्रात्मतैजसयोः वनवृक्षवत् तदवच्छिन्नाकाशवत् च जलाशयजलवत् तद्गतप्रतिबिम्बाकाशवच्च अभेदः। विज्ञानमयादिकोशत्रयस्य समष्टिरूपस्य तदवच्छिन्नसूत्रात्मनश्च, व्यष्टिरूपविज्ञानमयादिकोशत्रयस्य तदवच्छिन्नस्य तैजसचैतन्यस्य च वनवृक्षादितदवच्छिन्नाकाशादिदृष्टान्तमुखेन अभेदः।

समष्टिव्यष्ट्युपाध्योः वनवृक्षवत् जलाशयजलवत् अभेदः, उपाधिद्वयावच्छिन्नचैतन्ययोः सूत्रात्मतैजसयोः अपि वनवृक्षावच्छिन्नाकाशवत् जलाशयजलगतप्रतिबिम्बाकाशवत् च अभेदः।

बालबोधिनीकाराणां मते व्यष्टिसमष्टिलिङ्गशरीरयोः तु न अभेदः। तथा सति तदुपहितयोः अपि अभेदे सर्वज्ञत्वादिधर्मसाङ्कर्य्य-प्रसङ्गात्। तथा च अत्र अभेदः नाम भेदकत्वाभावः। उपाधिभ्यां हि वस्तु वस्तुतः न भिद्यते इति उपाधीनां वास्तवभेदकत्वाभावः। उपाधीनां वास्तवभेदकत्वाभावे च उपहितयोः वास्तवः अभेदः इति पर्य्यवस्यति।

१३. विराट्[३९]

समष्टिस्थूलशरीरोपहितं चैतन्यं विराट् इति उच्यते। तथाहि आकाशादिसूक्ष्मभूतपञ्चकेभ्यः पञ्चीकरणद्वारा आकाशादिस्थूल-भूतानि उत्पद्यन्ते। पञ्चीकृतेभ्यः भूतेभ्यः भूर्भुवादीनां उपर्य्युपरि-विद्यमानानां अतलवितलादीनां अधोऽधःविद्यमानानां लोकानां तदन्तर्गतचतुर्विधस्थूलशरीराणां तदुचितानां अन्नपानादीनां च उत्पत्तिः भवति। चतुर्विधस्थूलशरीराणि तु जरायुजाण्डजस्वेद-जोद्भिज्जानि। तत्र चतुर्विधस्थूलशरीरम् एकानेकबुद्धिविषयतया वनवत् जलाशयवत् वा समष्टिः, वृक्षवत् जलवत् वा व्यष्टिरपि भवति। चतुर्विधस्थूलशरीरमपि शरीरमिति एकबुद्धिविषयतया वनवत् समष्टित्वम्, प्रत्येकम् तत्तच्छरीरविषयतया अनेकबुद्धिविषय-व्यष्टित्वं च लभते।

इदम् भूरादिचतुर्दशभुवनान्तर्गतचतुर्विधस्थूलशरीरोपहित-चैतन्यं सर्वनरेषु सर्वप्राणिनिकायेषु अहमिति अभिमानवत्त्वात् वैश्वानरः इति उच्यते, विविधं=नानाप्रकारेण राजमानत्वात् प्रकाशमानत्वाद् वा विराट् इति उच्यते।

एषा स्थूलशरीरसमष्टिः अन्नविकारत्वात्=पृथिवीविकार-बाहुल्यात् अन्नमयः इति आत्माच्छादकत्वाच्च कोशः इति अन्नमय-कोशः इत्याख्यां लभते, स्थूलभोगायतनत्वात्, स्थूलशरीरम् इत्यु-च्यते, इन्द्रियैः अर्थोपलब्धेश्च जाग्रदिति उच्यते।

वस्तुतस्तु न स्थूलशरीरसमुदायः समष्टिः, तथा सति स्थूलशरीरोपहितास्मदादिजीवसमुदायः एव विराट् स्यात्, न च एतद् युक्तम्, विराजः भिन्नतया श्रवणात्। नापि व्यापकं स्थूलशरीरं समष्टिः, तदुपहितश्च विराट् इति युक्तम्, अस्मदादिवत् विराजः प्रत्यक्षत्वप्रसङ्गात् तस्मात् न समष्ट्युपहितः विराट्, किन्तु परिच्छिन्नचतुर्मुखस्थूलशरीरोपहितः, सत्यलोकाधिपतिः सर्वज्ञः हिरण्यगर्भात् शतगुणापकृष्टानन्दभुक् जीवविशेषः एव विराट्। तस्य च समष्ट्युपहितत्वम् अस्मदादिसकलस्थूलशरीराभिमानात् क्वचित् व्यपदिश्यते, न तु वस्तुतः समष्ट्युपहितत्वम्। स च अस्मदादिभ्यः भिन्नः, अन्यथा सर्वज्ञत्वादिधर्मसांकर्यं स्यात्।

वैश्वानरः श्रोत्रादिज्ञानेन्द्रियपञ्चकेन शब्दस्पर्शरूपरसगन्धान् वागादिकर्मेन्द्रियपञ्चकेन वचनादानगमनविसर्गानन्दान्, मनोबुद्ध्यहङ्कारचित्ताख्येन अन्तरिन्द्रियेण सङ्कल्पनिश्चयाहङ्कार्यचैतान् च सर्वान् स्थूलविषयान् अनुभवति, 'जागरितस्थानः बहिःप्रज्ञः'[४०] इति श्रुतेः।

१४. विश्वः[४१]

चतुर्विधशरीराणां या व्यष्टिः = तत्तच्छरीरव्यक्तिः, तदुपहितं चैतन्यं विश्वः इत्युच्यते। कारणशरीराभिमानं लिङ्गशरीराभिमानं च अपरित्यज्य स्थूलशरीरादिषु प्रविश्य तत्तत्स्थूलशरीरेषु सर्वेषु प्रत्येकम् 'अहमहम्' इति अभिमानवत्त्वात्, तस्य विश्वत्वम् इति भावः। तथाहि जीवस्य त्रयः उपाधयः—सुषुप्त्यादौ बुद्ध्यादिसंस्कारोपरञ्जितम् अज्ञानमात्रम् उपाधिः, स्वप्ने जाग्रद्वासनामयं लिङ्गशरीरमुपाधिः, जाग्रदवस्थायां तु सूक्ष्मशरीरसंसृष्टस्थूलशरीरमुपाधिः, तथा च पूर्वपूर्वोपाधिविशिष्टस्यैव उत्तरोत्तरोपाधिप्रवेशात् सर्वशरीरप्रवेष्टृत्वेन स्थूलभोगायतनाभिमानिनः चैतन्यस्य

विश्वः इति संज्ञा। यद्वा लिंगशरीरम् अपरित्यज्य स्थूलशरीरादीनां चक्षुरादिवृत्तीनां तत्तद्विषयाणां च प्रवेष्टृत्वात् तस्य विश्वत्वम्।

तस्य एषा तत्तच्छरीरव्यक्तिविशेषलक्षणा व्यष्टिः स्थूलशरीरम्। तस्य अन्नविकारबाहुल्यात् अन्नमयत्वम्, चैतन्याच्छादकत्वात् कोशत्वमिति तस्य अन्नमयकोशः इति संज्ञा। स्थूलभोगायतनत्वात्, इन्द्रियैः अर्थोपलम्भात् च तस्य जाग्रदिति संज्ञा।

अयं विश्वः श्रोत्रादीन्द्रियपञ्चकेन शब्दस्पर्शरूपरसगन्धान् वागादीन्द्रियपञ्चकेन वचनादानगमनविसर्गानन्दान् मनोबुद्ध्यहङ्कारचित्ताख्येन अन्तरिन्द्रियचतुष्केन संकल्पविकल्पाहङ्कार्यचैत्तान् च सर्वान् स्थूलविषयान् अनुभवति 'जागरितस्थानः बहिःप्रज्ञः'[४२] इति श्रुतेः।

अत्रापि अनयोः स्थूलव्यष्टिसमष्ट्योः तदुपहितयोः विश्ववैश्वानरयोः वनवृक्षवत् तदवच्छिन्नाकाशवत् च जलाशयजलवत् तद्गतप्रतिबिम्बाकाशवत् च वा अभेदः। एतत् एकदेशिमतम्, औपाधिकयोगात् विराजः समष्ट्युपहितत्वाभावात् चेति केचित्। बालबोधिनीकाराणां ते मतु अत्रापि अभेदः भेदकत्वाभावः। तथा चोपाध्योः वास्तवभेदकत्वाभावात् उपहितयोः वास्तवः अभेदेति पर्यवस्यति। समष्ट्युपहितत्वं स्थूलाभिमानित्वात् इति वा अर्थः।

१५. तुरीयचैतन्यम्

शरीरं तावत् त्रिविधम्—कारणशरीरं, सूक्ष्मशरीरं, स्थूलशरीरं च। एवं च तत्तच्छरीरोपहितं चैतन्यमपि त्रिविधं भवति। तत्र समष्टिव्यष्टिभेदेन एकैकस्य शरीरस्य द्विविधत्वात् एकैकं चैतन्यमपि समष्टिव्यष्टिभेदेन द्विविधं भवति। यथा वृक्षाणां समष्ट्यभिप्रायेण वनम् इति एकत्वव्यपदेशः, व्यष्ट्यभिप्रायेण च वृक्षाः इति अनेकत्वव्यपदेशः, यथा वा जलानां समष्ट्यभिप्रायेण जलाशयः इति एकत्व-

व्यपदेशः, व्यष्टयभिप्रायेण च वापीतडागादिविवक्षया जलानि इति अनेकत्वव्यपदेशः। एवं शरीराणां तदुपहितचैतन्यानां च समष्टय-भिप्रायेण एकत्वव्यपदेशः व्यष्टयभिप्रायेण च बहुत्वव्यपदेशः। एतत् त्रिविधचैतन्यम् अतिक्रम्य यत् चतुर्थम् अनुपहितं शुद्धचैतन्यं विराजते तत् तुरीयं चैतन्यम्।

तथाहि—नानात्वेन प्रतिभासमानानां जीवगताज्ञानानां समष्टयभिप्रायेण तदेकत्वव्यपदेशः, 'अजामेकाम्'[४४] इत्यादिश्रुतेः। एतत् समष्टयज्ञानोपहितं चैतन्यम् ईश्वरः। व्यष्टयभिप्रायेण च अज्ञानस्य नानात्वम्, 'इन्द्रो मायाभिः पुरुरूप ईयते'[४५] इत्यादि श्रुतेः। एतद्व्यष्टयज्ञानोपहितं चैतन्यं च प्राज्ञ इत्युच्यते।

सूक्ष्मशरीरं नाम सप्तदशावयवकम्। ते चावयवाः—ज्ञानेन्द्रिय-पञ्चकम्, कर्मेन्द्रियपञ्चकम्, प्राणादिपञ्चकम् बुद्धिमनसी च। सकलानां सूक्ष्मशरीराणां समष्टिभूतं यत् सूक्ष्मशरीरम्, तदुपहितं चैतन्यं हिरण्यगर्भः, प्राणः सूत्रात्मेति वा उच्यते। व्यष्टिसूक्ष्मशरीरोपहितं चैतन्यं च तैजसः इत्युच्यते।

एवं स्थूलभूतात्मकानां भूरादिलोकसप्तकानाम्, अतलादिलोक-सप्तकानाम् तदन्तर्गतस्थूलशरीराणां तदुचितानाम् अन्नपानादीनां च समष्टिभूतः यः प्रपञ्चः तदुपहितं चैतन्यं विश्वानरः विराट् इति वा उच्यते। व्यष्टिस्थूलशरीरोपहितं चैतन्यं च विश्वः इत्युच्यते।

एतेषां स्थूलसूक्ष्मकारणशरीरप्रपञ्चानामपि समष्टिः एकः महान् प्रपञ्चः, यथा धवपलाशखदिराद्यवान्तरवनानां समष्टिः समुदाय-विवक्षया एकं महद् वनं भवति, यथा वा वापीकूपतडागाद्यवान्तर-जलाशयानां समुदायविवक्षया एकः महान् जलाशयः भवति। एतदु-पहितं विश्ववैश्वानरादारभ्य ईश्वरपर्य्यन्तं चैतन्यमपि अवान्तर-वनावच्छिन्नाकाशवत् अवान्तरजलाशयप्रतिबिम्बिताकाशवत् च एकम् एव। एतयोः अज्ञानादिमहाप्रपञ्चतदुपहितचैतन्ययोः कार्य्यकारणोपाधितावच्छिन्नचैतन्ययोर्वा आधारभूतम् अधिष्ठानभूतं

वा अनवच्छिन्नम् अनुपहितं सर्वव्यापि विशुद्धं चैतन्यं तुरीयम्। वनवृक्षतदवच्छिन्नाकाशयोः जलाशयतद्गतप्रतिबिम्बाकाशयोर्वा आधारभूतानुपहिताकाशवत् अनयोः प्रपञ्चतदुपहितचैतन्ययोः आधारभूतं यत् अनुपहितं चैतन्यं तत् तुरीयम् इत्यर्थः। 'शान्तं शिवमद्वैतं चतुर्थं मन्यते स आत्मा स विज्ञेयः'[४६] इत्यादिश्रुतेः। श्रुत्यन्तरं च—'त्रिषु धामसु यद् भोग्यं भोक्ता च भोगश्च यद्भवेत्। तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदाशिवः'।[४७] इति। इदमेव तुरीयम् अनुपहितं शुद्धचैतन्यम् अज्ञानादितदुपहितचैतन्याभ्यां तप्तायःपिण्डवत् अविविक्तं सत् 'सर्वं खल्विदं ब्रह्म'[४८] 'तत्त्वमसि'[४९] इत्यादिमहावाक्यानां वाच्यं भवति, विविक्तं सत् लक्ष्यमपि भवति। 'अयो दहति' इत्यत्र लोहाभिन्नः अग्निः इति अर्थबोधश्चेत् वाच्यत्वम्, लोहभिन्नः अग्निः इति अर्थबोधश्चेत् लक्ष्यत्वम्। एवं 'तत्त्वमसि' इत्यादौ अज्ञानाद्युपाधिभ्यः अभिन्नं चैतन्यम् इत्यर्थे वाच्यत्वम् अज्ञानाद्युपाधिभ्यः भिन्न इत्यर्थे लक्ष्यत्वम्। त्रयाणां चैतन्यानां चैतन्येन रूपेण एकत्वे अपि अवच्छिन्नावच्छिन्नत्वेन रूपेण वाच्यत्वलक्ष्यत्वे सम्भवतः।

१६. साक्षी[५०]

स्थूलसूक्ष्मभूतयोः देहयोः साक्षाद् द्रष्टा निर्विकारत्वात् साक्षीत्युच्यते। "लोकेऽपि हि औदासीन्यबोधाभ्यामेव साक्षित्वं सिद्धम्।" सिं ने इति (साक्षात् + द्रष्टरि – 'इन्') साक्षी = द्रष्टा = दर्शनकर्ता इत्यर्थः। ननु साक्षिणः कर्तृत्वात्, कर्तृत्वसत्त्वे च विकारसत्त्वस्य अवश्यम्भावित्वात् कथं साक्षी निर्विकारः भवेत् इति चेत्। उच्यते- साक्षिणि कर्तृत्वम् आरोपितम् न तु वास्तवम्। प्रकाशात्मके अकर्तरि सवितरि यथा 'सविता प्रकाशते' इति प्रकाशकर्तृत्वम् आरोप्यते, तथैव दृशिस्वरूपे साक्षिणि द्रष्टृत्वं दर्शनकर्तृत्वं वा

आरोप्यते। वस्तुतस्तु साक्षी अकर्ता, अभोक्ता, उदासीनश्च। स एव साक्षी कूटस्थ इत्युच्यते, कूटे = मिथ्याबुद्धौ चिदाभासे वा निर्विकाररूपेण असङ्गरूपेण वा यत् चैतन्यम् अवतिष्ठते तस्यैव चैतन्यस्य साक्षित्वात्। स च स्वप्रकाशः साक्षी स्थूलसूक्ष्मात्मकं शरीरद्वयम् अवभासयति। तदुक्तं कूटस्थदीपे—'देहद्वयाधिष्ठानभूतं कूटस्थचैतन्यं स्वावच्छेदकस्य देहद्वयस्य साक्षाद्दीक्षणान्निर्विकारत्वाच्च साक्षीत्युच्यते'[५१] इति। न च जीवचैतन्यस्यैव साक्षित्वमस्तु किं कूटस्थचैतन्येन इति वाच्यम्, लौकिकवैदिकव्यवहारकर्तुः तस्य औदासीन्यद्रष्टृत्वासम्भवेन 'साक्षी चेता केवलो निर्गुणश्च'[५२] इति श्रुत्युक्तसाक्षित्वायोगात्। अयं च साक्षी सर्वदा अनावृतः सन् तिष्ठतीति स्वीक्रियते। अनावृतस्वरूपेण साक्षिणा सह सम्बन्धाद् एव अज्ञानान्तःकरणतद्धर्माणां प्रकाशः भवति। तेन च तत्तत्सत्ताविषयकम् अज्ञानं संशयादिकं च न वर्तते।

(क) साक्षिस्वीकारे प्रयोजनम्

ननु साक्षिस्वीकारे किं प्रयोजनम् इति चेत्। उच्यते—स्थूलसूक्ष्मात्मकस्य जीवशरीरद्वयस्य अवभासार्थं साक्षी स्वीक्रियते इति। एतयोः जीवशरीरयोः जडत्वेन अप्रकाशरूपत्वात् तयोः अवभासार्थं साक्षिरूपं स्वप्रकाशात्मकं चैतन्यम् अङ्गीक्रियते इत्यर्थः। ननु प्रकाशस्वरूपया अन्तःकरणवृत्त्या एव जीवदेहस्य अवभासः उपपद्यते इति साक्षिस्वीकारे किं प्रयोजनम् इति चेत्। उच्यते—अन्तःकरणस्य जडत्वात् अन्तःकरणवृत्त्याख्यः अन्तःकरणपरिणामोऽपि जडः। जडत्वेन च अप्रकाशात्मिका अन्तःकरणवृत्तिः स्वप्रकाशार्थमेव चैतन्यम् अपेक्षते, कथं तया जीवदेहस्य अवभासः सम्भवेत्। तस्मात् जीवस्य स्थूलसूक्ष्मदेहयोः अवभासार्थं साक्षी स्वीकरणीयः एव। अपि च, यथा जडभूता अन्तःकरणवृत्तिः जीवशरीरं न भासयति, तथा अन्तःकरणधर्मभूतं सुखदुःखादिकमपि न भासयति।

तथा च सुखदुःखादीनाम् अवभासार्थं च साक्षी स्वीकरणीयः। अन्तःकरणम्, अन्तःकरणवृत्तिः, अन्तःकरणधर्मभूतं सुखदुःखादिकं च साक्षिणः एव विषयः भवति, नान्तःकरणवृत्तेः, नापि इन्द्रियाणाम्। अन्तःकरणवृत्तेः साक्षिविषयत्वात् च साक्षिचैतन्यालोकेन आलोकिता सत्येव सा प्रकाशते। वृत्तौ वृत्तिभासकं साक्षिचैतन्यं प्रतिबिम्बते इति चैतन्यप्रतिबिम्बेन उज्ज्वला अन्तःकरणवृत्तिः जडा अपि प्रकाशात्मिका इव लक्ष्यते। एवं साक्षिचैतन्यालोकेन आलोकिता अन्तःकरणवृत्तिः वृत्तिग्राह्यान् विषयान् प्रकाशयति अस्या वृत्तेः भासकस्य स्वप्रकाशस्य साक्षिचैतन्यस्य अनभ्युपगमे जडान्तःकरणवृत्त्या वृत्तिग्राह्यविषयाणाम् अवभासः नोपपद्येत इति वृत्तेः भासकः साक्षी अभ्युपगन्तव्यः। जीवानाम् अहंत्वाभिमानस्य सदातनप्रकाशश्च साक्षिस्वीकारेणैव उपपद्यते। तथाहि न कस्यापि जीवस्य 'अहं न वा' 'अहम् प्रणिमि न वा' इत्यादिकः संशयः उदेति इति अहंत्वस्य सदाप्रकाशमानत्वं स्वीकरणीयम्। अहंत्वस्य च जडत्वात् साक्षिचैतन्याभ्युपगमं विना तस्य प्रकाशमानत्वं नोपपद्यते इति अहंत्वप्रकाशस्य उपपादनार्थं साक्षी स्वीकरणीयः॥ तथा च ज्ञानादिविषयग्रहणान्यथाऽनुपपत्त्या साक्षी कल्प्यते। तथाहि ज्ञानेच्छादयस्तावत् सर्ववादिसिद्धाः दृश्यन्ते। न च तेषां प्रमाणगम्यत्वम्। न हि बाह्यं प्रत्यक्षं तद्ग्राहकं बाह्यमात्रग्राहकानां तेषाम् आन्तरग्राहकत्वायोगात्, ज्ञानादीनां च आन्तरत्वात्। नापि मानसं प्रत्यक्षम्, अस्माभिः तदनभ्युपगमात्, अस्वयंप्रकाशस्य च तस्य=मनसः प्रकाशकत्वायोगात्, प्रकाशमानस्यैव प्रकाशकत्वात्। तथा चोक्तं तत्त्वशुद्धौ—'प्रतिभासमानस्यैव ज्ञानस्य तत्साधकत्वं वक्तव्यम्' इति। न च तत् प्रत्यक्षान्तरप्रकाश्यं, तस्य अप्रकाशमानत्वात्, तस्यापि प्रत्यक्षान्तरप्रकाश्यत्वे तस्यापि तथेति ज्ञानमालाप्रसङ्गात्। न च चक्षुरादिवद् अप्रकाशमानमेव तत्प्रकाशकम्, विषयादेरपि प्रकाशकत्वापातात्, अप्रकाशमानत्वा-

विशेषात्, इन्द्रियादीनाम् प्रकाशकत्वानभ्युपगमात्, अन्यथा तेषाम् आत्मत्वप्रसङ्गात्, ज्ञानावगमात् प्राग् व्यवहारासिद्धेश्च। नापि जीवः तद्ग्राहकः, तस्य आवृतत्वात्, सहकारिप्रमाणम् अन्तरेण तदावरणनिवृत्त्ययोगात्। तस्माद् ज्ञानेच्छादीनां प्रमाणग्राह्यत्वा-सम्भवात् तद्ग्राहकः कश्चित् कल्पनीयः। यश्च तद्ग्राहकः, स साक्षी, अन्यथा ज्ञानादिव्यवहारविलोपप्रसङ्गात्। तथा चोक्तं तत्त्वशुद्धौ—'सर्वैरपि साक्षिस्वरूपम् अभ्युपगन्तव्यम्, अन्यथा व्यवहारानुपपत्तेः' इति।

(ख) साक्षिणः जीवेश्वरभिन्नत्वम्

साक्षिणः औदासीन्यात् न स जीवः, नापि ईश्वरः। कर्मी संसारी जीवः यथा न उदासीनः, सृष्टिस्थितिलयकर्त्ता ईश्वरोऽपि तथा नोदासीनः इति न जीवस्य ईश्वरस्य वा साक्षित्वम्। तथा च 'साक्षी यथा जीवकोटिर्न भवति, जीवस्य उदासीनत्वाभावात्, तथा ईश्वरकोटिरपि न भवति, जगत्सृष्टिनियमनादिव्यापारकर्त्तुः तस्य उदासीनत्वाभावात्।[५३] जीवस्य साक्षित्वाभावः पञ्चदश्याम् अपि दर्शितः—'यः साक्षी जीवाद्भेदेन दर्शितः' इति। जीवकोटौ ईश्वरकोटौ च साक्षिणः प्रवेशो नास्तीति अद्वैतसिद्धिकारैरपि दर्शितम्। "जीवात् विवेचितोऽयं साक्षी न ब्रह्मकोटिरपि। किन्तु अस्पृष्टजीवेश्वरविभागं चैतन्यम्।"[५४] इति। ईश्वरत्वजीवत्वा-दिधर्मरहितं जीवाधिष्ठानं शुद्धब्रह्मचैतन्यम् एवं जीवेन अभिन्नं सत् साक्षिपदवीं लभते। मायाशबलिते सगुणे परमेश्वरे केवलो निर्गुण इति विशेषणानुपपत्तेः सर्वप्रत्यग्भूतं विशुद्धं ब्रह्म जीवाभेदेन साक्षीति प्रतिपाद्यते।

तत्त्वकौमुदीकाराणां मते परमेश्वरस्य रूपभेदः कश्चित् जीवप्रवृत्तिनिवृत्त्योः अनुमन्ता स्वयम् उदासीनः साक्षी। तदुक्तं—

'ईश्वरस्य रूपभेदोऽसौ कारणत्वादिवर्जितः'[५५] इति। अयं च ईश्वरसाक्षी सर्वभूतान्तरात्मा, सर्वभूताधिवासः, सर्वान्तर्यामी, सर्वकार्य्याध्यक्षः अपि उदासीनः। उक्तं च—एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा। कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च ॥[५६] इति श्रुतौ। 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति'[५७] इति च। सुषुप्तौ इन्द्रियाणां बुद्धिवृत्तेश्च उपरमे सति जीवगतव्यष्ट्यज्ञानस्य भासकः अयम् ईश्वरसाक्षी जीवेन सह अभिन्नः सन् प्राज्ञः इत्युच्यते। एतन्मते उदासीनः परमेश्वरः एव साक्षी इति ईश्वरकोटौ साक्षिणः अन्तर्भावः।

एवं च जीवकोटौ साक्षिणः अन्तर्भावोऽपि युक्तः। आध्यासिक-वस्तुनोः एकस्य धर्मः अन्यस्मिन् संक्रमते इति तावत् दृश्यते। अतएव इदं रजतम् इति भ्रमज्ञाने शुक्तिगतः इदन्तारूपः धर्मः रजते अवभासते। तथा जीवाभिन्नस्य जीवाधिष्ठानस्य परमेश्वरस्य साक्षित्वम् अपि जीवे प्रतिभासते। एवं च 'अहं सुखम् अनुभवामि' 'दुःखम् अनुभवामि' इत्येवं सुख-दुःखादिसाक्षिभास्य-पदार्थानां जीवे भानमपि उपपद्यते। अतएव केचन वेदान्तिनः सुखदुःखज्ञानादीनां साक्षात् द्रष्टुः अविद्योपाधिकस्य जीवस्य एव साक्षित्वं ब्रुवन्ति। तथा च तेषां मते साक्षी जीवकोटौ अन्तर्भुक्तः। ननु कर्तृ-भोक्तृरूपस्य जीवस्य कथम् उदासीनसाक्षित्वम् इति चेत्। उच्यते—जीवः स्वरूपतः असङ्गः उदासीनश्च इति असङ्गो-दासीनरूपेणैव जीवस्य साक्षित्वम् इति। जीवस्य कर्तृत्वभोक्तृत्वा-दिकं च अन्तःकरणजीवचैतन्ययोः तादात्म्याध्यासेन एव जीवे आरोप्यते। आरोपस्य मिथ्यात्वेन जीवस्य कर्तृत्व-भोक्तृत्वादिक-मपि मिथ्या, तस्य असङ्गोदासीनं रूपम् एव सत्यम्, तदेव च साक्षिभूतम् इति। तदुक्तं सिद्धान्तलेशसंग्रहे—'अविद्योपाधिको जीव एव साक्षात् द्रष्टृत्वात् साक्षी। लोकेऽपि ह्यकर्तृत्वे सति द्रष्टृत्वं साक्षित्वम् इति प्रसिद्धम्। तच्चासङ्गोदासीनप्रकाशे जीवे

एव साक्षात् सम्भवति, जीवस्य अन्तःकरणतादात्म्यापत्त्या कर्तृत्वाद्यारोपभाक्त्वेऽपि स्वयमुदासीनत्वात्,[५८] इति ।

केषाञ्चित् मते नाविद्योपहितस्य जीवस्य साक्षित्वम्, अपि तु अन्तःकरणोपाधिकस्य जीवस्य । तेषाम् अयमाशयः—एकस्यां सर्वगतायाम् अविद्यायाम् उपहितस्य चैतन्यस्य साक्षित्वे सर्वव्यापिन्या अविद्यया सह सर्वेषाम् अन्तःकरणानां सम्बन्धसद्भावात् पुरुषविशेषगतसुखदुःखादीनां पुरुषान्तरेण उपलब्धिप्रसङ्गः । अन्तःकरणोपहितस्य जीवस्य साक्षित्वे तु "प्रतिपुरुषं साक्षिभेदात् पुरुषान्तरान्तःकरणादेः पुरुषान्तरसाक्ष्यसंसर्गात् वा तदयोग्यत्वात् वा अप्रकाशः उपपद्यते ।"[५९] ननु अन्तःकरणोपहितचैतन्यस्य प्रमातृत्वात्, प्रमातुश्च उदासीनत्वाभावात् कथं तस्य साक्षित्वम् ? अपि च सुषुप्तौ प्रमात्रभावेऽपि साक्षिसत्त्वेन तयोः भेदश्च अवश्यं स्वीकरणीयः इति चेत् । उच्यते—अन्तःकरणस्य विशेषणत्वे चैतन्यस्य प्रमातृत्वम्, उपाधित्वे च साक्षित्वम् इति सिद्धान्तितत्वेन प्रमातृसाक्षिणोः भेद उपपद्यते इति ।

१७. साक्षिद्वैविध्यम्

केषांचित् मते साक्षी द्विविधः—जीवसाक्षी ईश्वरसाक्षी चेति ।

जीवसाक्षी

जीवो नाम अन्तःकरणावच्छिन्नम् अन्तःकरणतादात्म्यापन्नं वा चैतन्यम् । अज्ञानतादात्म्यापन्नं चैतन्यं यदा अन्तःकरणेन तादात्म्यम् आपद्यते, तदा तदन्तःकरणच्छुरितम् अन्तःकरणानुप्रविष्टं चैतन्यं जीव इति व्यपदिश्यते इति भावः इति वाचस्पतिमिश्राणाम् आशयः । विवरणमते तु अविद्याप्रतिबिम्बितं चैतन्यमेव जीवः । तदुक्तं—'ननु कोऽयं जीवो नाम ? यस्य स्वरूपं त्वंपदेन लक्ष्यमाणं ब्रह्मैव वाक्यार्थः सम्पद्यते । ब्रह्मैव अविद्याप्रतिबिम्बितम् इति वदामः'[६०] इति ।

जीवसाक्षी तु अन्तःकरणोपहितचैतन्यम्। यच्चैतन्यम् अन्यस्मात् चैतन्याद् अन्तःकरणैः व्यावृत्तम् अपि अन्तःकरणानुप्रविष्टम्, तच्चैतन्यं जीवसाक्षी इत्यभिधीयते इति भावः। प्रतीयमानकर्तृत्वादिनिर्वाहाय यथा अन्तःकरणावच्छिन्नचैतन्यरूपः जीवः पृथक् अङ्गीकर्त्तव्यः, तथा ज्ञानसुखादिविषयप्रकाशनिर्वाहाय जीवसाक्षी अपि।

ननु एकमेव अन्तःकरणं जीवचैतन्यं यथा व्यावर्तयति, तथा साक्षिणमपि इति कथं जीवसाक्षिणोः भेदः इति चेत्। उच्यते—अन्तःकरणस्य विशेषणत्वोपाधित्वाभ्याम् अनयोः जीवसाक्षिणोः भेदः इति। तथाहि अन्तःकरणं साक्षिचैतन्यस्य उपाधिः, जीवचैतन्यस्य तु विशेषणम्। व्यावर्तकयोः उपाधिविशेषणयोः भेदात् जीवसाक्षिणोः भेदः इत्यर्थः। तथा च अन्तःकरणोपहितं चैतन्यं साक्षी, अन्तःकरणविशिष्टं चैतन्यं जीवः। यत् वस्तु (यः धर्मः वा) स्वयं पृथक्त्वेन वर्तमानं सत् स्वस्थानावस्थितं वस्त्वन्तरं ज्ञापयति स उपाधिः। तदुक्तम् 'उपाधिस्तु कार्य्यानन्वयी व्यावर्त्तको वर्तमानश्च'[६२] इति। अन्तःकरणं साक्षिचैतन्यात् पृथग्भूतं सदपि स्वस्थानावस्थितं साक्षिरूपं चैतन्यं विज्ञापयतीति अन्तःकरणं साक्षिणः उपाधिः। यत् वस्तु (यः धर्मो वा) स्वसम्बद्धं वस्त्वन्तरं ज्ञापयत् स्वम् अपि विज्ञापयति तद् विशेषणम्। तदुक्तम्—'विशेषणं नाम कार्य्यान्वयी व्यावर्तकं वर्तमानम्'[६३] इति। अन्तःकरणसम्वलितं चैतन्यं कर्ता भोक्ता संसारी जीवः इत्युच्यते इति चैतन्यम् अन्तःकरणम् च इति द्वयमेव अत्र 'संसारी' इत्यनेन ज्ञाप्यते। अतएव अन्तःकरणं कर्तृरूपजीवचैतन्यस्य विशेषणम्। उपाधिः उपहितं नानुगच्छति; विशेषणं तु विशिष्टम् अनुगच्छति। तथा च, यदा अन्तःकरणम् उपाधिः, तदा तदुपहितस्य ब्रह्मचैतन्यस्य साक्षीति संज्ञा, यदा तु अन्तःकरणं विशेषणं तदा तद्विशिष्टं ब्रह्मचैतन्यं जीवः इत्युच्यते। जीवे अन्तःकरणस्य प्रवेशोऽस्ति, साक्षिणि तु तस्य प्रवेशो नास्ति। तथा च जीवः इति अन्तःकरणसहितस्य

चैतन्यस्य संज्ञा, साक्षी इति केवलं चैतन्यस्य। साक्षिणः उदासीनत्वात् तस्मिन् रागद्वेषादिकं नास्ति संसारिजीवे तु अस्ति। संसारिजीवस्य पुनः विशेषणभूते अन्तःकरणे एव रागद्वेषादिकम् अस्ति, विशेष्यभूते चैतन्यांशे तु नास्ति। एवं च संसारिजीवस्य विशेष्यभूतेन चैतन्यांशेन सह साक्षिणः न भेदोऽस्ति। एकमेव चैतन्यम् अन्तःकरणसहितं सत् जीव इत्युच्यते, अन्तःकरणोपावृतं सत् साक्षी इत्युच्यते।

यद्यपि संसारिजीवस्य विशेष्यांशेन सह साक्षिणः न भेदोऽस्ति, तथापि विशेषणभूतान्तःकरणस्य रागद्वेषादिभिः सुखदुःखादिभिश्च धर्मैः संसारिजीवः क्लिष्टः भवति, साक्षी तु रागद्वेषादिरहितः उदासीनः। श्रुतिश्च कर्मफलभोक्तुः जीवात् पृथग्भूतः साक्षी अस्तीति प्रमाणयति। तथाहि—'तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति'[१४] इति। कूटस्थचैतन्यात् साक्षिचैतन्याद् वा पृथग्भूतः जीवः विविधं कर्मफलं भुङ्क्ते, जीवात् पृथग्भूतं कूटस्थं साक्षिचैतन्यं तु कर्मफलं न भुङ्क्ते, अपितु जीवस्य विषयभोगं साक्षात् परिपश्यति इत्यर्थः।

जीवस्य जाग्रदवस्थायाम् अपि साक्षिचैतन्यं जीवस्य अन्तःकरणेन्द्रियादिकं भासयति, सुषुप्त्यवस्थायाम् अपि निर्विषयं सत् स्वयं भासते। तदुक्तं पञ्चदश्याम्—

"नाट्यशालास्थितो दीपः प्रभुं सभ्यांश्च नर्त्तकीम्।
दीपयेदविशेषेण तदभावेऽपि दीप्यते॥" इति[१५]

ननु जीवपक्षे अन्तःकरणं विशेषणम्, साक्षिपक्षे तु उपाधिः इत्यत्र किं कारणम् इति चेत्। उच्यते—शुद्धचैतन्यस्य निर्विकारत्वात्, केवलस्य च चेतनेन अनधिष्ठितस्य अन्तःकरणस्य जडत्वात् कर्त्तृत्वलक्षणजीवत्वान्वयासम्भवे अपि अन्योन्यतादात्म्यापन्नयोः तयोः जीवत्वान्वये बाधकाभावात् अन्तःकरणस्य स्वान्वितचैतन्यांशे विधेयेन जीवत्वेन अन्वयाद् व्यावर्तकत्वाच्च विशेषणत्वं युक्तम्।

साक्षिपक्षे तु तस्य अन्तःकरणस्य विशेषणत्वं नैव युक्तम्। विषयावभासकत्वं हि साक्षित्वम्। न चान्तःकरणस्य तद् युज्यते, जडत्वाद् विकारित्वाच्च। अतएव उक्तं विवरणे—'सर्वं वस्तु ज्ञाततया अज्ञाततया वा साक्षिचैतन्यस्य विषय एव'[६६] इति। तस्मात् स्वान्वितचैतन्यांशे विधेयेन साक्षित्वेन अन्तःकरणस्य अनन्वयात् तस्य उपाधित्वं युक्तम्। 'अन्तःकरणस्य जडतया विषयभासकत्वायोगेन विषयभासकचैतन्योपाधित्वम्। अयं च जीवसाक्षी प्रतिशरीरं नाना। यद्यपि साक्षिचैतन्यं स्वरूपेण एकम्, तथापि भेदकस्य तदुपाधिभूतान्तःकरणस्य प्रतिशरीरं भेदात् तदुपधेयसाक्षिचैतन्यस्यापि भेदः इति भावः। तस्य प्रतिशरीरम् एकत्वे चैत्रावगते मैत्रस्यापि स्मरणप्रसङ्गः।

ईश्वरसाक्षी

मायावच्छिन्नं चैतन्यम् ईश्वरः इति वाचस्पत्यनुयायिनः। मायोपहितं चैतन्यम् ईश्वरः इति विवरणानुयायिनः साक्षिणः भेदविवक्षायां तु मायाविशिष्टं चैतन्यम् ईश्वरः इति वक्तव्यम्। स च एकः अनादिश्च ईश्वरसाक्षी तु मायोपहितं चैतन्यम्। विवरणसिद्धान्ते मायाऽविद्ययोः भेदाभावात् मायोपहितम् इति अविद्योपहितम् इति च समार्थकम्। मायाऽविद्ययोः भेदपक्षे तु मायोपहितम् इति विशुद्धसत्त्वप्रधानोपहितम् इत्यर्थः। विशुद्धसत्त्वप्रधाना माया मलिनसत्त्वप्रधाना तु अविद्या इति तयोः भेदात्। तथा चोक्तं पञ्चदश्यां—"तमोरजःसत्त्वगुणा प्रकृतिर्द्विविधा च सा। सत्त्वशुद्ध्यविशुद्धिभ्यां मायाऽविद्ये च ते मते।"[६७] इति सा चाविद्या अनादिभावरूपा ज्ञाननिवर्त्या। ईश्वरसाक्षिचैतन्यं च एकं, तदुपाधिभूतायाः मायायाः एकत्वात्। 'इन्द्रो मायाभिः पुरुरूप ईयते'[६८] इत्यादि श्रुतौ 'मायाभिः' इति बहुवचनेन तु मायाशब्दात् लक्षणया मायागतविक्षेपशक्तिविशेषस्य उपस्थितिः भवति इति एषा

श्रुतिः न मायायाः बहुत्वं ब्रवीति, किन्तु तद्गतायाः विक्षेपशक्तेः। यद्वा मायाघटकसत्त्वरजस्तमोगुणानामेव बहुत्वम् अनेन ज्ञाप्यते। अजामेकाम् इत्यादिश्रुतिबलेन च मायायाः एकत्वं निश्चीयते। एतन्मायोपहितं चैतन्यम् ईश्वरसाक्षि एकम्, तदुपाधिभूतायाः मायायाः एकत्वात्। तच्च ईश्वरचैतन्यम् अनादि, अजन्यं ईश्वरस्य ईश्वरसाक्षिणश्च कार्य्यत्वे तयोः किमपि कारणम् अभ्युपगन्तव्यम्। ततश्च यस्मात् कारणात् ईश्वरस्य ईश्वरसाक्षिणश्च उत्पत्तिः, तस्माद् एव सर्वजगदुत्पत्तिः कल्प्यताम्, किमन्तर्गणना ईश्वरेण इति तस्य जगत्कर्तृत्वोपपत्तये अनादित्वम् अभ्युपगन्तव्यम्, ईश्वरसाक्ष्युपाधेः मायायाः अनादित्वात्। मायायाः विशेषणत्वे ईश्वरत्वम्, उपाधित्वे साक्षित्वम् इति ईश्वरत्वसाक्षित्वयोः भेदः। ननु धर्मयोः ईश्वरत्वसाक्षित्वयोः भेदे तद्धर्मिणोः ईश्वरसाक्षिणोः अपि भेदः स्यात् इति चेत्। न, नहि धर्मिणोः ईश्वरसाक्षिणोः भेदः। नहि धर्मभेदः धर्मिभेदे हेतुः सत्यपि एकधर्मिगतानां नानाधर्माणां पाचकत्वपाठकत्वादीनां भेदे धर्मिणः देवदत्तस्य भेदादर्शनात्। किन्तु विरुद्धधर्मः एव धर्मिभेदकः। ईश्वरत्वसाक्षित्वे तु न विरुद्धे, तयोः एकचैतन्यवृत्तित्वात्। तस्मात् तयोः न भेदः इति भावः।

उद्धृति सूचिका

१. वे. सा. पृ. १०१–१३७
२. बृ. उ. १. ५. ३
३. प्र. उ. ६. ४
४. बृ. उ. १. ५. १२
५. वे. सा. पृ. ६६–७५
६. श्वे. उ. ४. ५
७. ऋ. वे. ६. ४७. १८
८. बा. बो. वे. सा. पृ. ७३
९. गु. उ. १. १. ९
१०. छा. उ. ६. २. १
११. बृ. उ. ४. ४. २२
१२. बृ. उ. ३. ७. ३
१३. कठ. १. ३. ११
१४. तै. उ. ३. १

१५. महा. उ. १०. ८
१६. मा. उ. ५
१७. तै. उ. ३. १
१८. श्वे. उ. ४. ९
१९. श. भा. २. १. १४
२०. छा. उ. ७. २४. १
२१. बृ. उ. ४. ५. १५
२२. वे. सा. पृ. ७७–८६
२३. ऋ. वे. ६. ४७. १८
२४. श्वे. उ. ३. १
२५. बृ. उ. ४. ४. ६
२६. वा. सु. ४७
२७. मा. उ. ५
२८. मा. उ. ६
२९. छा. उ. ८. ३. ४
३०. अनुभूतिप्रकाशः १०. ६१
३१. छा. उ. ६. ८. ७
३२. वे. सा. पृ. ११९–२०
३३. बृ. उ. १. ४. २
३४. बृ. उ. ३. ७. २
३५. बृ. उ. ४. ३. ९
३६. बृ. उ. ४. ३. ११
३७. वे. सा. पृ. १२१–१२४
३८. मा. उ. ३
३९. वे. सा. पृ. १३४–५
४०. म. उ. ३
४१. वे. सा. पृ. १३६–४२
४२. मा. उ. ३
४३. वे. सा. ८५
४४. श्वे. उ. ४. ५
४५. ऋ. वे. ६. ४७. १८
४६. मा. उ. ७
४७. कैव. उ. ७
४८. छा. उ. ३. १४. १
४९. छा. उ. ६. ८. ७
५०. सि. ले. पृ. २३४–२६१
५१. सि. ले. पृ. २३४
५२. श्वे. उ. ६. ११
५३. सि. ले. जीवा.कृत टी.पृ.२४३
५४. सि. ले. पृ. २४३
५५. वेदान्तसूक्ति कारिका ९४
५६. श्वे. उ. ६. ११
५७. गी. १८. ६१
५८. सि. ले. पृ. २४९–५०
५९. सि. ले. पृ. २५३
६०. वे. प. पृ. ६९–७६
६१. विव. पृ. ७६०
६२. वे. प. पृ. ७२
६३. वे. प. पृ. ७१
६४. मु. उ. ३. १. १
६५. प. द. १०. ११
६६. विव. पृ. ८३–४
६७. प. द. १. १५–१६
६८. ऋ. वे. ६. ४७. १८

चतुर्थः परिच्छेदः

१. आत्मस्वरूपे मतभेदः[1]

आत्मस्वरूपविषये दार्शनिकानां मतभेदः अस्ति। तथाहि अतिप्राकृतः पुरुषः स्वस्मिन् इव स्वपुत्रे अपि प्रेमदर्शनात्, पुत्रे पुष्टे नष्टे च अहमेव पुष्टो नष्टश्च इत्याद्यनुभवात् च 'पुत्र आत्मा' इति वदति। 'आत्मा वै पुत्र नामासि' इत्यादिश्रुतिवचनम् अपि अत्र अनुधावनीयम्।

केचन चार्वाकाः 'स्थूलशरीरम् आत्मा' इति वदन्ति। 'एषः पुरुषोऽन्नरसमयः'[2] इत्यादिश्रुतौ अन्नरसमयस्य देहस्य आत्मत्व-श्रवणात्। आत्मा हि पुत्रवित्तादिभ्यः प्रियतरः 'तदेतत् प्रेयः पुत्रात् प्रेयो वित्तात्'[3] इत्यादि श्रुतेः। सा च प्रीतिः पुत्रादपि देहे अधिक-तरा निरतिशया च दृश्यते, प्रदीप्तगृहात् स्वपुत्रं परित्यज्य अपि स्वस्य निर्गमदर्शनात्। अपि च अहं प्रत्ययः आत्मानम् एव अवगाहते। स च 'स्थूलोऽहं कृशोऽहम्' इत्येवं देहालम्बनः अनुभूयते इति देहः एव आत्मा इत्यर्थः। केचन चार्वाकाः इन्द्रियाणि एव आत्मा इति वदन्ति। 'ते ह प्राणाः प्रजापतिं पितरमेत्योचुः'[4] इत्यादिश्रुतेः प्राणानाम् = इन्द्रियाणां चेतनत्वम् आश्रयणीयम्, अन्यथा वचनासम्भवात्। इन्द्रियाणाम् अभावे शरीरचलनाभावात् इन्द्रियाणाम् उपजीव्यत्वेन आत्मत्वम्। 'काणोऽहं बधिरोऽहम्' इत्यादौ अहंप्रत्ययस्य इन्द्रियालम्बनत्वाच्च इन्द्रियाणि आत्मा। स्थूलदेहस्य आत्मत्वे बाल्यदेहकौमारदेहयोः भेदात् बाल्यचेष्टानां कौमारादौ स्मरणं न स्यात्, अनुभवस्मरणयोः समानकर्तृकत्वात्। 'स्थूलोऽहम्' इत्यादि अनुभवस्तु देहस्य तादात्म्याध्यासात्।

'स वा एषः' इत्यादि श्रुतिः तावत् स्थूलदृष्ट्यभिप्राया; अन्यथा उत्तरश्रुतिविरोधः स्यात्। केचित् चार्वाकाः प्राणः आत्मा इति वदन्ति। 'अन्योऽन्तर आत्मा प्राणमयः' इत्यादिश्रुत्या अन्नमयात् आभ्यन्तरस्य प्राणस्य आत्मत्वकथनात्। मरणकाले प्राणाभावे सति इन्द्रियादिचलनायोगात्, अन्नाद्यभावेन प्राणस्य कृशीभावे च विद्यमानानामपि इन्द्रियाणां स्वस्वविषये प्रवृत्त्यदर्शनात्, प्राणे पुष्टे च इन्द्रियप्रवृत्तिदर्शनात् प्राणस्य इन्द्रियोपजीव्यत्वेन आत्मत्वम्। 'अहम् अशनायावान्' अहं पिपासावान् इत्याद्यनुभवात् च प्राणस्य आत्मत्वम्। अशनायापिपासयोः प्राणधर्मत्वं प्रसिद्धम्, तादृग्धर्मकश्च प्राणः अहंप्रत्ययविषयः इति प्राणः आत्मा इत्यर्थः। इन्द्रियाणां चैतन्यान्वयव्यतिरेकः करणत्वेन अपि उपपद्यते। तेषामेव कर्तृत्वे करणाभावप्रसङ्गः। इन्द्रियाणाम् एव आत्मत्वे 'यश्चक्षुषा रूपमद्राक्षं स एव अहं त्वगिन्द्रियेण स्पर्शम् अनुभवामि इत्याद्यनुभवविरोधः 'पुरुषं प्राप्य अन्तं यन्ति' इत्यादि श्रुतिविरोधश्च स्यात्। 'ते ह प्राणाः' इत्यादि श्रुतिस्तु इन्द्रियाधिष्ठातृदेवताभिप्राया। 'बधिरोऽहम्' इत्याद्यनुभवो हि बधिरत्वादिधर्माध्यासात्, बधिरत्वादिना इन्द्रियाणां तादात्म्याध्यासाद् वा भवति। अपरे केचन चार्वाकाः मन आत्मा इति वदन्ति। 'अन्योऽन्तर आत्मा मनोमयः' इत्यादिश्रुत्या प्राणमयात् अभ्यन्तरस्य आत्मनः श्रवणात्। मूर्च्छादौ मनसि विलीने प्राणादेः अभावात्, यद्वा प्राणनापाननादिव्यापारे उपसंहृते अपि केवलेन मनसा स्वप्नादेः उपलम्भात् मन एव आत्मा। प्राणप्रवृत्तेः मनोऽधीनत्वं च विवरणे उपधृतम्—'मनोऽधीनतादर्शनात् प्राणप्रवृत्तेः' इति। अतः प्राणोपजीव्यत्वात् मनसः आत्मत्वम्। 'अहं विकल्पवान्' 'अहं सङ्कल्पवान्' इत्याद्यनुभवाच्च मनसः आत्मत्वम्, सङ्कल्पविकल्पादेः मनोधर्मत्वात्। प्राणस्य आत्मत्वे अपानादेः अपि आत्मत्वप्रसङ्गः तथा च अनेकात्माधिष्ठितस्य शरीरस्य युगपत् विरुद्धप्रवृत्तिप्रसङ्गेन उन्मथनं स्यात्। अहम्

अशनायावान् इत्याद्यनुभवस्तु अशनायात्वादिधर्माध्यासात्, अशनायात्वादिना प्राणस्य तादात्म्याध्यासाद् वा भवति। 'प्राणमयः' इत्यादिश्रुतिः तु स्थूलदृष्ट्यभिप्राया।

योगाचारबौद्धास्तावत् 'बुद्धिः आत्मा' इति वदन्ति। तेषां मते क्षणिकविज्ञानम् एव बुद्धिः इत्युच्यते। सा एव आत्मा इत्यर्थः। तथा च श्रुतिः—'अन्योऽन्तर आत्मा विज्ञानमयः' इति। मनोमयात् आभ्यन्तरः क्षणिकविज्ञानमयः आत्मा इत्यर्थः। 'अहं कर्त्ता' 'अहं भोक्ता' इत्याद्यनुभवः बुद्धेः आत्मत्वे मानम्। न च मनसः कर्तृत्वं, सुखादिज्ञानकरणत्वेन हि मनः अनुमीयते इति मनसः करणत्वात्। ततश्च तदतिरिक्तः कश्चन कर्ता स्वीकरणीयः। कर्ता च आत्मा, स च बुद्धिः। मनसः कर्तृत्वे सर्वेन्द्रियाणां स्व-स्वविषयैः युगपत् सम्बन्धे सति युगपत् ज्ञानोदयप्रसक्तिः दुर्वारा, कर्तुः मनसः सर्वैः इन्द्रियैः अधिष्ठातृत्वेन युगपत् सन्निहितत्वात् कस्यचिदन्यस्य कर्तृरूपस्य अपेक्षाभावात् च।

माध्यमिकबौद्धाः 'शून्यम् आत्मा' इति वदन्ति। श्रुतिश्चास्ति—'असदेवेदमग्र आसीत्'[९] इति। इदं नामरूपात्मकं जगत् अग्रे = सृष्टेः प्राक् असत् = शून्यम् एव आसीत् इति हि बौद्धाभिप्रायेण श्रुतेः अर्थः। सुषुप्तौ सर्वाभावात्, उत्थितस्य च 'अहं (सुप्तः) सुषुप्तौ न आसम्' इति स्वकीयाभावज्ञानविषयकानुभवात् च शून्यम् आत्मा सर्वाभावरूपः।

इदं मतमपि वेदवादिभिः खण्डितम्। श्रुतेर्हि वस्तुतः अनभिव्यक्तनामरूपतया आत्मनः अवस्थाने तात्पर्यम् 'सदेव सोम्येदमग्र आसीत्'[१०] इति श्रुतेः। असतः सज्जननायोगात् च सृष्टेः प्राक् असत्त्वम् अव्यक्तत्वम्। वस्तुतस्तु शून्यवादिभिः बौद्धैः अपि आत्मनः अभावरूपत्वं न उक्तम्, शून्यपदस्य अद्वितीये मनोऽगोचरे, अचिन्तनीये परमतत्त्वे एव तात्पर्यात्।

एतेषु मतेषु यथायोगं श्रुतेः प्रमाणत्वेन यः उपन्यासः, तत्र इदं

ज्ञातव्यम्—एतेषु मतेषु यद्यपि श्रुतिः प्रमाणत्वेन न उपन्यस्यते, तथापि वेदेषु एवम् उक्तत्वात् वेदवादिभिरपि तत्तत् मतं ग्रहणीयम् इत्यभिप्रायेण यथायोगं श्रुतिवाक्यम् अवतार्य्यते इति। '—श्रुत्युपन्यासः न युक्तः, तत्प्रामाण्यानङ्गीकारात्, तथापि सिद्धान्तिना तत्तत्प्रामाण्याङ्गीकारेण तं प्रति तदुपन्यासः युक्त इति भावः'।

प्राभाकराणां तार्किकानां च मते अज्ञानम् आत्मा इति सदानन्दयोगीन्द्राः वदन्ति। यद्यपि प्राभाकरैः तार्किकैश्च आत्मा न आनन्दरूपत्वेन स्वीक्रियते, तस्य सुखाश्रयत्वेन स्वीकारात्, नापि अज्ञानरूपत्वेन स्वीक्रियते, ज्ञानाश्रयत्वेन स्वीकारात्, ज्ञानाश्रयस्य च अज्ञानत्वायोगात्, वेदान्ताभिमतस्य अज्ञानस्य च तैः अनङ्गीकारात्, तथापि तैः न चिद्रूपः आत्मा स्वीक्रियते, किन्तु अनादिः ज्ञानाश्रयः जडः द्रव्यरूपः एव तैः आत्मत्वेन स्वीक्रियते। एवंभूतः अनादिः जडपदार्थश्च वेदान्तिनां मते वस्तुतः न आत्मा, अपि तु अज्ञानम् एव, तस्य जडत्वे सति अनादित्वात्। अतः तेषाम् अज्ञाने एव आत्मत्वभ्रमः इति भावः। विज्ञानमयादपि आभ्यन्तरे आत्मनि 'अन्योऽन्तर आत्मा आनन्दमयः'[2] इत्यादि श्रुतिः मानम्। 'यदा वै पुरुषः स्वपिति'[3] इत्यादि श्रुतिषु सुषुप्तौ बुद्ध्यादीनां=ज्ञानसुखदुःखेच्छादीनाम् अज्ञाने=ज्ञानभिन्ने आत्मनि लयदर्शनात्=अभावदर्शनात् न ज्ञानस्य आत्मत्वम्। अहम् अज्ञः=ज्ञानहीनः, अहं ज्ञानी=ज्ञानवान् इत्याद्यनुभवश्च ज्ञानात्मनोः धर्मधर्मिभावेन भेदं द्रढयति।

प्राभाकरतार्किकमतयोः अयं भेदः—प्राभाकराणां मते संवित् स्वयंप्रकाशा। आत्मा च तदाश्रयत्वेन भासते, न तु विषयत्वेन भासते। तार्किकानां मते तु आत्मा ज्ञानस्य आश्रयो विषयोऽपि भवितुम् अर्हति—'अहं जानामि', 'आत्मानं जानामि' इत्याद्यनुभवात्।

भाट्टानां मते अज्ञानोपहितं अज्ञानावच्छिन्नं वा चैतन्यम्

आत्मा। तथा चोक्तं—'जडबोधात्मकं भाट्टाः' इति। भाट्टैः हि आत्मनः द्रव्यबोधात्मकत्वं स्वीक्रियते। अत्र अयं भावः—अज्ञानोपहितत्वम् अज्ञानसंवलितत्वं ज्ञानाज्ञानरूपत्वम्, तदपि द्रव्यबोधरूपत्वम् इति। अत्र श्रुतिः 'प्रज्ञानघन एव आनन्दमयः'[१८] इति। प्रज्ञानघनः = प्रज्ञानैकरसः ज्ञानस्वरूपः वा आनन्दमयः = आनन्दप्रचुरः आत्मा इत्यर्थः। आत्मनः द्रव्यबोधात्मकत्वं च सुषुप्तौ प्रकाशाप्रकाशसद्भावात् युज्यते। तथाहि—सुषुप्तौ आत्मनः प्रकाशकत्वं स्वीकार्य्यम्। सुषुप्तौ प्रकाशाभावे सति सुप्तोत्थितस्य सुखमहम् अस्वाप्सम् इति परामर्शो न स्यात्। न हि तदा इन्द्रियमनसां व्यापारः वर्तते इति तज्जन्यज्ञानेन तत्परामर्शं न सम्भवतीति आत्मा एव बोधांशः प्रकाशकः इति प्रकाशसद्भावसिद्धिः। जडत्वम् अपि आत्मनः वक्तव्यम्, अन्यथा सुषुप्तौ अपि दर्शनश्रवणादिकम् उदियात्। 'न किञ्चिद् अवेदिषम्' इति परामर्शात् च आत्मनि एव सुषुप्तौ अशेषविज्ञानाभाववत्त्वम् अपि कल्प्यते, अतः तत्र अप्रकाशः द्रव्यांशश्च अस्ति इति स्वीकार्य्यम्। अपि च 'मामहं न जानामि' इत्याद्यनुभवेषु अहम् इति प्रकाशरूपे बोधरूपे वा कर्त्तरि भासमाने अपि 'मां न जानामि' इति आत्मनः कर्मत्वेन आत्मनः ज्ञेयत्वं सिध्यति। ज्ञेयत्वं च प्रकाश्यत्वं जडत्वं द्रव्यात्मत्वं वा। अतः प्रकाशाप्रकाशस्वभावः बोधद्रव्यरूपः वा आत्मा इति सिध्यति। अतः तेषाम् अज्ञानोपहिते चैतन्ये एव आत्मत्वभ्रमः इति भावः।

एतेषु मतेषु न किमपि मतं श्रद्धेयम् इति वेदान्तिनः। यतः उत्तरोत्तरा स्मृतिः पूर्वां पूर्वां श्रुतिम् आभासीकरोति। एवमेव पूर्वा पूर्वा युक्तयः, पूर्वे पूर्वे अनुभवाश्च उत्तरोत्तरयुक्तिभिः उत्तरोत्तरानुभवैः च आभास्यन्ते। किञ्च आत्मस्वरूपविषये प्रबलतरानेकश्रुतिसद्भावः अपि शक्यते प्रदर्शयितुम्। तथा हि 'प्रत्यगस्थूलोऽचक्षुरप्राणोऽमनाऽकर्त्ता चैतन्यं चिन्मात्रं स्यात्',

'अस्थूलमनणु—'[15] 'अशब्दमस्पर्शमरूपमव्ययम्'[16] 'साक्षी चेता केवलो निर्गुणश्च'[17] इत्याद्याः अपि उदाहार्य्याः। एतेषाम् अनात्मत्वे युक्तिः अपि प्रदर्श्यते—पुत्रदेहादिकं न नित्यं जडत्वात् घटादिवत्, नित्यश्च आत्मा तदनित्यत्वे अकृताभ्यागमकृतविनाशप्रसङ्गात्। अतो न पुत्रादीनाम् आत्मत्वम् इति। 'अहं ब्रह्म' इति विद्वदनुभवप्राबल्यात् च पुत्रादीनाम् अनात्मत्वं सर्वथा स्पष्टम् एव। एतैश्च श्रुतियुक्त्यनुभवैः पूर्वेषां श्रुतियुक्त्यनुभवानां बाधितत्वात् पुत्रादीनाम् अनात्मत्वम्।

न चैवं पुत्रादिश्रुतीनां सर्वथा अप्रामाण्यम् इति वक्तुं युज्यते। तेषां स्वार्थे प्रामाण्याभावे अपि अरुन्धतीनिदर्शनन्यायेन पूर्वपूर्वनिराकरणद्वारा सूक्ष्मसूक्ष्मवस्तूनाम् उद्देशे तात्पर्य्यम् इति न सर्वथा अप्रामाण्यम्। अथवा प्रतिपत्तृबुद्ध्यनुसारम् सोपानारोहणन्यायः आश्रितः इति वक्तुं शक्यम्।

एतेषु नवसु मतेषु यद् यद् आत्मत्वेन उपन्यस्तं तत् सर्वं जडम् अचेतनं परप्रकाश्यं वा इति न तेषाम् आत्मत्वम् इति वेदान्तिनः। वेदान्तिनां मते तु आत्मा चैतन्यरूपः विज्ञानघनः स्वयंप्रकाशरूपः।

२. अद्वैतवादे आत्मस्वरूपम्

जीवब्रह्मणोः ऐक्यम् इति वेदान्तसिद्धान्तम्। ब्रह्मवित् जीवात्मा अपि सच्चिदानन्दरूपः सत्स्वरूपः चित्स्वरूपः आनन्दस्वरूपश्च इत्यर्थः। न च तस्य चात्मनः त्रैकालिकी सत्ता अस्तीति स नित्यः शाश्वतः सनातनः। स च कूटस्थः सर्वविकारवर्जितः इति न तस्य उत्पत्तिः विनाशो वा अस्ति। आत्मनः ज्ञानरूपत्वात् न तस्य परमार्थतः बन्धनं सम्भवति इति स नित्यमुक्तः। बन्धनस्य पारमार्थिकत्वे तस्य निवृत्त्यभावात् मोक्षलाभः न स्यात्, न हि स्वभावस्य निराकरणं सम्भवति। स चात्मा विभुः भूमास्वरूपः, सर्वभूतः, देशकालादिपरिच्छेदशून्यः, आकाशवत् सर्वव्यापी। स

चात्मा एकः, सर्वदेहेषु एकः एव आत्मा वर्त्तते। 'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा'[१८] इति श्रुतेः। "भेदस्तु उपाधिनिमित्तो मिथ्याज्ञानकल्पितो न पारमार्थिकः।"[१९] आत्मनः स्वरूपतः सुखदुःखादिरहितत्वे अपि अन्तःकरणरूपोपाधिभेदात् सुखदुःखादिमान् इव उपलभ्यते। एवं च आत्मनः एकत्वे एकजीवगतसुखदुःखादीनां जीवान्तरेण उपलब्धिप्रसङ्गः नास्ति, उपाधिभेदेन सुखदुःखादिभेदोपपत्तेः। ब्रह्मणः निर्धर्मकत्वेन यद्यपि जीवात्माऽपि स्वरूपतः निर्धर्मकः एव, तथापि जीवोपाधीनां जीवे स्वधर्माधानात् औपाधिकधर्मवत्त्वं जीवस्य उपपद्यते। एवम् आत्मा यद्यपि निर्गुणः निष्क्रियश्च तथापि उपाधियोगात् सगुणः सक्रियश्च इव उपलभ्यते। न हि नित्यस्य आत्मनः क्रिया सम्भवति, सक्रियत्वे विकारस्य अवश्यम्भावित्वात् विकारसद्भावे च अनित्यत्वप्रसङ्गात्। एवं नित्यस्यात्मनः कर्तृत्वभोक्तृत्वादिकमपि परमार्थतः न सम्भवति पूर्णस्य क्रियाभोगादौ निमित्तानुपपत्तेः, कर्तृत्वभोक्तृत्वसद्भावे विकारप्रसङ्गेन अनित्यत्वस्य अवश्यम्भावित्वात् च। न हि कूटस्थस्य नित्यस्य आत्मनः विकारः सम्भवति। तथापि मनःप्रभृतीनाम् कर्तृत्वभोक्तृत्वादिकम् आत्मनि आरोप्य आत्मा कर्त्ता भोक्ता इति व्यवह्रियते। एतदेव आध्यासिकं कर्तृत्वभोक्तृत्वादिकम् अभ्युपगम्य सूत्रकारैः जीवात्मनः कर्तृत्वभोक्तृत्वादिकं व्यवस्थापितम्—'कर्त्ता शास्त्रार्थवत्त्वात्' इति। जीवस्य कर्तृत्वे एव 'यजेत', 'जुहुयात्', 'दद्यात्' इत्येवं विधं विधिशास्त्रम् अर्थवद् भवति, तत्र तत्र कर्त्तुः कर्तव्यविशेषोपदेशात्। अन्यथा तदनर्थकं स्यात्। एवम् एष हि द्रष्टा श्रोता गन्ता बोद्धा कर्त्ता विज्ञानात्मा पुरुष इतीदं शास्त्रमपि अर्थवत् भवति। एवं 'विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि च'[२०] इत्याद्याः श्रुतयः जीवस्य लौकिकीषु वैदिकीषु च क्रियासु कर्तृत्वं व्यपदिशन्ति इति जीवस्य कर्तृत्वं स्वीकरणीयम्। न च असङ्गस्य आत्मनः कर्तृत्वासम्भवात् बुद्धेः एव परिणामित्वेन क्रिया-

वेशात्मकं कर्तृत्वं भवतु इति वाच्यम्, करणत्वेन क्लृप्तशक्तिकायाः बुद्धेः कर्तृशक्तिर्न कल्पयितुं शक्या। कुठारादौ अदर्शनात्। बुद्धेः कर्तृत्वे करणान्तरस्य कल्पनीयत्वाच्च। वस्तुतस्तु परमार्थतः आत्मनः न कर्तृत्वम् 'असङ्गो ह्ययं पुरुषः'[२१] इति श्रुत्या कर्तृत्वविरोधात्। अतो यथा जपाकुसुमसन्निधिवशात् स्फटिके रक्तत्वम् अध्यस्तं, तथा अन्तःकरणसन्निधिवशात् आत्मनि कर्तृत्वम् अध्यस्यते।

आत्मा अविकारी। आत्मनः विकारस्वीकारे श्रुतिविरोधश्च स्यात्। "पुरुषो हि विनाशहेत्वभावाद् अविनाशी विक्रियहेत्वभावाच्च कूटस्थनित्यः। अतएव नित्यशुद्धबुद्धमुक्तस्वभावः"[२२] अपि च आत्मनः विकारित्वे तस्य अनित्यत्वप्रसङ्गः।

जीवस्य ब्रह्माभिन्नत्वात्, तत्त्वमस्यादिवाक्यैः जीवब्रह्मणोः त्रैकालिकैक्यप्रतिपादनात् ब्रह्माभिन्नस्य जीवस्य नित्यत्वम्। 'तत्सृष्ट्वा तदेवानुप्राविशत्'[२३] इत्यादिश्रुतौ च अद्वयस्य ब्रह्मणः स्वरूपेण एव बुद्धौ जीवरूपेण प्रवेशश्रवणात्। ननु 'एकमेवाद्वितीयम्' इति सृष्टेः प्राक् अद्वयं ब्रह्म श्रूयते। तथा च तदा जीवः नासीत्। सृष्ट्यनन्तरं च जीवः सत्तामापन्नः इति जीवस्य उत्पत्तिः स्वीकरणीया। श्रुतिश्च विस्फुलिङ्गदृष्टान्तेन जीवस्य उत्पत्तिं प्रतिपादयति 'यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति, एवमेतस्माद् आत्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे वेदाः सर्वाणि भूतानि, सर्वे एव आत्मानो व्युच्चरन्ति'[२४] इति। तस्मात् वियदादिवत् जीवस्य उत्पत्तिः तथा अनित्यत्वं च स्वीकरणीयमिति चेत्। न। जीवस्य उत्पत्तिस्वीकारे कृतनाशाकृताभ्यागमादिदोषप्रसङ्गात्। जीवस्य तत्त्वाभिप्रायेण नित्यत्वं बहुशः श्रुतौ दृश्यते—'नित्यो नित्यानाम्'[२५] 'स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्म'[२६] 'न जायते म्रियते वा विपश्चित्',[२७] 'अजो नित्यः शाश्वतोऽयं पुराणः',[२८] इत्यादिकम्।

विस्फुलिङ्गश्रुतिस्तु औपाधिकजन्माभिप्राया प्रवृत्ता इति न अद्वयश्रुतिविरोधः।

आत्मा चिद्रूपः, 'योऽयं विज्ञानमयः'[२९] 'प्रज्ञानघन एव'[३०] इत्यादिश्रुतेः। आत्मनः अन्तर्बहिश्च न चैतन्यात् अन्यत् किञ्चित्, चैतन्यमेव निरन्तरम् अस्य स्वरूपम् इति भावः।

चिद्रूपस्य एव ब्रह्मणो जीवरूपेण प्रवेशश्रवणात्, नित्यत्वात् च आत्मा चिद्रूपः। तथा च सूत्रम् 'ज्ञोऽत एव'[३१] यस्मात् आत्मा न उत्पद्यते, परमेव ब्रह्म अविकृतम् उपाधिसम्पर्कात् जीवभावेन अवतिष्ठते, अतएव नित्यचैतन्योऽयमात्मा। परमात्मनः चैतन्यरूपत्वं च 'विज्ञानमानन्दं ब्रह्म'[३२] 'सत्यं ज्ञानमनन्तं ब्रह्म'[३३] इत्यादौ श्रूयते। तस्यैव ब्रह्मणः जीवरूपेण प्रवेशश्रवणाच्च जीवोऽपि नित्यः। न च सुषुप्तिमूर्च्छासमाधिषु चैतन्याभावात् अचिद्रूपः जीव इति वक्तव्यम्। सुषुप्त्यादौ अपि चैतन्यस्य साक्षित्वेन अवस्थानात्। अन्यथा सुषुप्त्यादीनां परामर्शः न स्यात्। लोपवादिना अपि निःसाक्षिकस्य लोपस्य वक्तुम् अशक्यत्वात्। तस्मात् सुषुप्त्यादौ अपि चैतन्यं विद्यते एव इति आत्मनः चिद्रूपत्वम्।

ननु चिद्रूपत्वं नाम अनुभवरूपत्वम्, आत्मनः अनुभवरूपत्वे अहम् अनुभवामि इति अनुभवाश्रयं विषयीकुर्वतः प्रत्ययस्य निर्विषयत्वापत्तिः, अनुभवस्य अनुभवं प्रति आधारत्वायोगात् इति चेत्। उच्यते—अनुभवामि इति व्यवहारस्तु वृत्तिप्रतिबिम्बितचैतन्यम् आदाय उपपद्यते। यद्यपि अनुभवरूपो जीवः नानुभवाश्रयः, एकस्य आधाराधेयत्वायोगात्, तथापि अनुभवामि इत्यनुभवाश्रयत्वं जीवस्य नानुपपन्नम्, अनुभवामि इत्यनुभवस्य वृत्तिप्रतिबिम्बितचैतन्यात्मकत्वात्, तस्य च वृत्तिप्रतिबिम्बितचैतन्यस्य चिद्रूपानुभवभिन्नत्वाद् बिम्बप्रतिबिम्बयोः अभेदे अपि उपाधिसत्त्वदशायां तयोर्भेदात्, अस्मदर्थस्य प्रमातुः वृत्त्याश्रयत्वेन वृत्तिप्रतिबिम्बितचैतन्याश्रयत्वसम्भवात्। तथा चोक्तं विवरणे—'यथा अयो दहतीत्यत्र दग्धृत्वायसोः एकाग्निसम्बन्धात् परस्परसम्बन्धावभासः, तथा अनुभवान्तःकरणयोः एकात्मसम्बन्धात् तथा अवभासः।' इति।

चिद्रूपत्वात् च आत्मा स्वयं ज्योतिः=स्वयं प्रकाशः। जीवस्यैव स्वप्नावस्थाम् अधिकृत्य 'अत्रायं पुरुषः स्वयं ज्योतिः'[३६] इति श्रुतेः। स जीवः स्वयंज्योतिः बाह्याऽध्यात्मिकभूतभौतिकसंसर्गरहितः स्वप्रकाशः इत्यर्थः।

'बालाग्रशतभागस्य शतधा कल्पितस्य च। भागो जीवः स विज्ञेयः'[३७] इत्यादि श्रुतिषु जीवस्य अणुत्वकीर्त्तनाद् अणुपरिमाणत्वं जीवस्य इति केचित्। तन्न, 'बुद्धेर्गुणेनात्मगुणेन चैवाराग्रमात्रो-ह्यवरोऽपि दृष्टः'[३८] इत्यादौ बुद्धिशब्दवाच्यान्तःकरण-परिमाणो-पाधिकस्य परमाणुत्वश्रवणात्। बुद्धिरूपस्य अन्तःकरणरूपस्य वा उपाधेः परिच्छिन्नत्वरूपगुणेन तीक्ष्णमुखसूचेः अग्रभागः इव अति-सूक्ष्मः, आत्मनः अपरिच्छिन्नत्वलक्षणगुणेन च अवरः=अपरि-च्छिन्नोऽपि इति सूक्ष्मभूतमयस्य अन्तःकरणस्य सूक्ष्मतया तदुपाधि-कस्य एव आत्मनः परमाणुत्वश्रुतिः। तथा च अस्यां श्रुतौ बुद्धिगुणेन आराग्रमात्रत्वोक्तेः स्वाभाविकमेव विभुत्वम्, औपाधिकं तु सूक्ष्मत्वम् इति भावः। न च उत्क्रान्तिमत्त्वात् गतिमत्त्वात् क्रियावत्त्वात् जीवो न व्यापक इति वाच्यम्, बुद्धिगतानाम् उत्क्रमणादीनां तदुपहिते श्रुत्या प्रतिपादनात्।

३. आत्मनः चिद्रूपत्वम्[३७]

अनुभूतेः स्वप्रकाशत्वे सिद्धे अनुभूतिस्वरूपस्य आत्मनोऽपि स्वप्रकाशत्वं सिद्धम्। तथापि आत्मनः अनुभूतिस्वरूपत्वे मतभेदात् आत्मनः अनुभूतिस्वरूपत्वम् अनुमानेनैव प्रतिष्ठाप्यते—'आत्मा संविद्रूपः, संवित्कर्मतामन्तरेण अपरत्वात्, संवेदनवत्।'[३८] आत्मा संविद्रूपः, संविदकर्मत्वे सति अपरोक्षव्यवहारविषयत्वात्, यथा संवेदनम् इत्यर्थः, इदं चानुमानम् प्राभाकरमीमांसकम् उद्दिश्य प्रदर्श्यते। प्राभाकराणां मते प्रत्यक्षे ज्ञानं, ज्ञाता, ज्ञेयं चेति त्रिपुटी भासते। तत्र ज्ञेयं विषयः, तच्च संविदः कर्मरूपेण भासते; ज्ञाता

संविदः आश्रयरूपेण भासते, संवित् च स्वाभिन्नत्वेन भासते। तथा च आत्मा=ज्ञाता वा संवित् च इति उभयम् अपि संविदः अकर्मत्वे सति अपरोक्षव्यवहारस्य विषयः भवति। तथा च पक्षे दृष्टान्ते च हेतुः वर्तते। संवेदनरूपे दृष्टान्ते च संविद्रूपत्वरूपं साध्यं वर्तते इति अनुमानं सिद्धम्।

यद्वा—घटतज्ज्ञानयोः सम्बन्धः (पक्षः) आत्मनिष्ठः (साध्यः) ज्ञाननिष्ठत्वात् (हेतुः) पदविषयत्ववत् (दृष्टान्तः) इत्यनुमानम्।[३९] घटः, घटज्ञानं च इत्यनयोः सम्बन्धः, आत्मनिष्ठः ज्ञाननिष्ठत्वात्, यथा पदविषयत्वम् इत्यर्थः। नैयायिकम् उद्दिश्य अनुमानम् इदम्। पदात् ज्ञानं ज्ञायते इति ज्ञानं पदविषयः। तथा च ज्ञाने पदविषयत्वं विद्यते एवं आत्मनोऽपि पदजन्यज्ञानं जायते इति आत्मा पदविषयः, तथा च आत्मनि पदविषयत्वं विद्यते, पदविषयत्वम् आत्मनिष्ठम् इत्यर्थः। तथा च पदविषयत्वरूपे दृष्टान्ते आत्मनिष्ठत्वरूपं साध्यमपि वर्तते इति व्याप्तिः सिध्यति। घटतज्ज्ञानयोः सम्बन्धरूपे पक्षे च ज्ञाननिष्ठत्वरूपः हेतुः विद्यते। सिद्धान्तिनां मते सम्बन्धस्य आध्यासिकत्वं सम्बन्धिमात्रनिष्ठत्वं सम्बन्धिस्वरूपत्वं वा। सम्बन्धस्य च उभयनिष्ठत्वेन घटतज्ज्ञानयोः सम्बन्धस्य घटे इव ज्ञाने अपि वर्तमानत्वम्। तथा च घटतज्ज्ञानयोः यः सम्बन्धः घटज्ञाननिष्ठः स एव आत्मनिष्ठः इति घटज्ञानस्य आत्मत्वं सिद्धम्।

विपक्षबाधकेन तर्केणापि आत्मनः अनुभूतिस्वरूपत्वं व्यवस्थाप्यते। आत्मनः ज्ञानरूपत्वाभावे यथा आत्मविषयकप्रमा उत्पद्यते तथा आत्मविषयकसंशयविपर्ययौ अपि उत्पद्येते। 'न हि आत्मनि अहमनहं वेति कश्चित् सन्दिग्धे नैवाहमिति वा विपर्यस्यति'।[४०] "न हि जातु कश्चिदत्र सन्दिग्धे अहं वा नाहं वेति, न च विपर्यस्यति नाहमेवेति"[४१] तथा आत्मनि अयं सन्देहविपर्यासाभावश्च आत्मनः स्वप्रकाशज्ञानरूपत्वं विना न सम्भवति। 'विज्ञानमानन्दं

ब्रह्म'[42] 'प्रज्ञानघन एव'[43] इत्यादि श्रुतेः अपि आत्मनः चिद्रूपत्वं सिद्धम्।

न च सुषुप्तिमूर्च्छासमाधिषु चैतन्याभावात् अचिद्रूपः जीव इति मन्तव्यम्। चिद्रूपस्य ब्रह्मणः एव जीवरूपेण प्रवेशश्रवणात्; जीवो नोत्पद्यते, न च म्रियते, परमेव ब्रह्म अविकृतम् उपाधिसम्पर्कात् जीवभावेन अवतिष्ठते इति च श्रुत्या प्रतिपादितत्वात्। तथा च श्रुतिः 'आत्माऽजरोऽमरोऽमृतोऽभयः' 'न जायते म्रियते वा विपश्चित्',[44] 'अजो नित्यः शाश्वतोऽयं पुराणः',[45] 'तत् सृष्ट्वा तदेवानुप्राविशत्',[46] 'अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि,[47] 'तत्त्वमसि'[48] 'अहं ब्रह्मास्मि'[49] इत्यादिः परस्य तु ब्रह्मणः चिद्रूपत्वं श्रूयते 'विज्ञानमानन्दं ब्रह्म' 'सत्यं ज्ञानमनन्तं ब्रह्म'[50] 'प्रज्ञानघन एव' इत्यादिश्रुतिषु। तस्य च ब्रह्मणः जीवाभिन्नत्वात् जीवोऽपि चिद्रूपः अवगन्तव्यः। अतएव पारमर्षं सूत्रं 'ज्ञोऽतएव' इति। न च सुषुप्त्यादौ चैतन्यं लुप्यते, सुषुप्त्यादिसाक्षित्वेन अवस्थानात्। अन्यथा जागरणान्तरं सुषुप्त्यादिपरामर्शायोगात्। चैतन्यलोपवादिनाऽपि निःसाक्षिकस्य लोपस्य वक्तुम् अशक्यत्वात्।

आत्मा न कदापि ज्ञानक्रियायाः कर्म भवति इति अकर्मत्वहेतुनाऽपि आत्मनः स्वप्रकाशत्वं सिध्यति। ननु सुखादिविषयके मानसप्रत्यक्षे 'अहं सुखी' इति ज्ञानविशिष्टस्य आत्मनः कर्मत्वम् इति चेत्। न, आत्मनः ज्ञानकर्तृत्वं तावत् स्वीकरणीयम्। तस्य आत्मनः ज्ञानकर्मत्वे च स्वीकृते ज्ञानक्रियायाः कर्ताऽपि आत्मा कर्मापि आत्मा इति कर्मकर्तृभावरूपविरोधप्रसङ्गात्। आत्मनः ज्ञानकर्मत्वं न स्वीक्रियते। ननु, एकस्यापि आत्मनः उपाधिभेदवशात् कर्तृत्वं कर्मत्वं च सम्भवेत्, तथा च सुखादिविषयके ज्ञाने सुखादिविशिष्टः आत्मा कर्म, तदविशिष्टः आत्मा च कर्ता इति चेत्। न, तथात्वे गमनादिक्रियायाम् अपि गमनादिविशिष्टस्य आत्मनः

कर्तृत्वकर्मत्वस्वीकारेण 'देवदत्तः स्वं गच्छति' इति प्रयोगापत्तिः। तथा च कर्मकर्तृविरोधस्य दृष्टान्तः एव न स्यात्। तत्र नैयायिकाः वदन्ति—ननु, आत्मनः अकर्मत्वं न स्वीकरणीयम्, आत्मनि कर्मलक्षणसम्भवात्। तथाहि, यत् क्रियायाः फलभाग् भवति तत् कर्म। आत्मा च ज्ञानक्रिययोः फलभाग् भवतीति तस्य कर्मत्वं स्वीकरणीयम् इति चेत्। उच्यते—मैवम्, परसमवेतत्वे सति परसमवेतक्रियाफलशालित्वं क्रियाफलाश्रयत्वं कर्मत्वम्। आत्मनस्तु ज्ञानक्रिययोः फलशालित्वे अपि ज्ञानक्रियाभ्यां सह समवेतत्वाभावः परसमवेतत्वाभावः वा, अपि तु स्वसमवेतत्वसद्भावः इति आत्मनः कर्मत्वं न स्वीकरणीयम्।

तत्र प्राभाकराः वदन्ति—भवतु तावत् आत्मनः ज्ञानक्रियां प्रति अकर्मत्वम्। तेन तु आत्मनः स्वप्रकाशत्वं कथं सिध्येत्। संविदः आश्रयत्वेनाऽपि आत्मा प्रकाशमानो भवितुम् अर्हति। तथाहि, प्राभाकराणां मते संवित् स्वप्रकाशरूपा, ज्ञेयरूपविषयस्तु संविदः कर्मत्वेन ज्ञातृरूपः आत्मा च संविदः आश्रयत्वेन प्रकाशते इति विषयस्य आत्मनश्च न स्वप्रकाशत्वम्। तथा च आत्मा न स्वप्रकाशत्वेन भासते, अपि तु संविदः आश्रयत्वेन इति चेत्। न, 'संवेदिता संविदाश्रयतया अपरोक्षो न भवति, अपरोक्षत्वात् संवेदनवत् इति अनुमानेन आत्मनः संविदाश्रयत्वबाधात्। विपक्षे बाधकतर्कश्च अस्ति। तथाहि, 'संवेदिता' यदि संविदाश्रयः प्रकाशान्तराधीनः वा सन् अपरोक्षः स्यात्, तर्हि तस्य नित्यज्ञानं न स्वीकरणीयं भवेत्। तथा च कदाचित् तस्य सत्तायां सत्यामपि प्रकाशो न भविष्यति इति कदाचित् अहमहं न वा इत्येवम् आत्मविषयकः संशयः 'अहं नाहम्' इत्येवं विपर्यासो वा सम्भविष्यति। न त्वेवं भवति। तस्मात् संविदाश्रयत्वेन आत्मा प्रकाशते, न तु स्वप्रकाशत्वेन इति प्राभाकरमतं न स्वीकरणीयम्। अपरश्च बाधकः तर्कः अस्ति। तथाहि—घटादीनां चाक्षुषज्ञाने यदि आत्मनः

ज्ञानाश्रयत्वनिबन्धनम् अपरोक्षत्वं स्यात्, तर्हि आत्मनोऽपि घटादिवत् चाक्षुषत्वं स्यात्, चाक्षुषज्ञाने भासमानस्य चाक्षुषत्वप्रसङ्गात्। आत्मनस्तु नीरूपत्वात् चाक्षुषत्वं न भवतीति चाक्षुषज्ञाने आत्मनः ज्ञानाश्रयत्वेन प्रकाशः न स्वीकरणीयः। अपि तु स्वप्रकाशत्वेन संवित्स्वरूपत्वेन वा प्रकाशः स्वीकरणीयः। एवं च ज्ञानक्रियायाः अकर्मभूतः आत्मा स्वप्रकाशः इति स्वीकरणीयम्।

(३) 'अत्रायं पुरुषः स्वयंज्योतिः'[५१] इत्यादिश्रुतिभ्यश्च आत्मनः स्वप्रकाशत्वं सिध्यति। ननु स्वप्नावस्थाम् अधिकृत्यैव इयं श्रुतिः। स्वप्नावस्थायां च मनसः विद्यमानत्वात् मनसैव ज्ञानस्य उपपत्तिर्भवेत् इति आत्मनः स्वप्रकाशत्वस्वीकारे न प्रयोजनम् इति चेत्। न, मनः एव स्वाप्नगजादिरूपेण परिणतं सत् ज्ञानकर्मत्वेन भासते। तथा च मनसः अस्मिन् प्रतिभासे कारणान्तराभावात् आत्मनः स्वप्रकाशत्वं सिध्यति।

तदुक्तम्—

चिद्रूपत्वादकर्मत्वात् स्वयं ज्योतिरिति श्रुतेः।
आत्मनः स्वप्रकाशत्वं को निवारयितुं क्षमः।[५२] इति चि. सु.।

एवम् अनुभूतेः तदभिन्नस्य आत्मनः च स्वप्रकाशत्वं सिद्धम् इति ज्ञानात्मभ्यां भिन्नस्य ब्रह्मणोऽपि स्वप्रकाशत्वं सिद्धम्। ब्रह्मण इदं स्वप्रकाशत्वं च श्रुतिः उद्घोषयति—'साक्षादपरोक्षाद् ब्रह्म'।[५३]

४. जीवात्मपरिमाणम्

रामानुज-मध्वाचार्य-निम्बार्कादीनां वैष्णववेदान्तिनां मते जीवात्मा परमाणुस्वरूपः, जैनानां मते जीवात्मा देहपरिमाणः। अद्वैतवेदान्तिनां मते जीवः ब्रह्मणः अभिन्नः। ब्रह्म च आकाशवद् भूमारूपम् विभुरूपं वा इति जीवात्मा अपि विभुरूपः।

(क) मध्यमपरिमाणत्वखण्डनम्[५४]

न तावत् जैनसम्मतम् आत्मनः देहपरिमाणवत्त्वं स्वीकरणीयम्। आत्मनः देहपरिमाणवत्त्वे परिच्छिन्नपरिमाणवत्त्वे, मध्यमपरिमाणवत्त्वे वा घटादिवत् विनाशप्रसङ्गः अनित्यत्वप्रसङ्गः वा। न तु आत्मनः अनित्यत्वं जैनैरपि स्वीक्रियते। अपि च जीवात्मनः जन्मान्तरग्रहणं नानायोनिभ्रमणं च जैनैरपि स्वीक्रियते। आत्मनः देहपरिमाणत्वे हस्तिशरीरपरिमाणस्य आत्मनः पतङ्गशरीरे प्रवेशो न सम्भवेत्, मनुष्यशरीरपरिमाणः आत्मा वा हस्तिशरीरं न व्याप्येत। एकस्मिन् एव वा जन्मनि शिशुदेहपरिमाणेन आत्मना यौवनदेहस्य व्याप्तिः न सम्भवेत्। आत्मनः प्रदीपवत् आधारानुरूपं संकोच-विकासशालित्वेन एतत् सम्भवतीति जैनमतम् अपि न स्वीकरणीयम्, यथा गृहविशेषौज्ज्वल्यसाधकस्य प्रदीपस्य बृहत्तरे गृहे आलोकमान्द्यम्, क्षुद्रतरगृहे च आलोकप्राखर्यं दृश्यते, तथा देहविशेषपरिमाणस्य आत्मनोऽपि बृहत्तरे देहे चैतन्यमान्द्यप्रसङ्गात्, क्षुद्रतरे देहे च चैतन्यप्राखर्यप्रसङ्गात्। न च जीवात्मनि अवयवानाम् आगमापगमाभ्याम् एतत् सम्भवति, अवयवानाम् आगमापगमस्वीकारे जीवात्मनः विकारित्वेन विनाशप्रसङ्गात्। अपि च जीवात्मनः अवयवे अभ्युगम्यमाने किम् आत्मा अवयवैः आरब्धः, अवयवसमुदायो वा। नाद्यः, तथा सति सावयवानां ध्वंसस्य अनिवार्यत्वेन आत्मनोऽपि देहवत् अनित्यत्वप्रसङ्गात्। नापि द्वितीयः। तथाहि अवयवसमुदायपक्षे किं चैतन्यम् एकैकस्य अवयवस्य धर्मो वा, अवयवसमुदायस्य वा? नाद्यः, एकस्यैव आत्मनः प्रत्यवयवं चैतन्ये स्वीकृते चैतन्यनानात्वेन ऐकमत्याभावप्रसङ्गात्। स्वतन्त्राणां चैतन्यानां विरुद्धदिक्क्रियतया च शरीरस्य उन्मथनप्रसङ्गात्, क्रियाभावप्रसङ्गाद् वा।

किं पुनः समुदायचैतन्यपक्षे समुदायापत्तिः शरीरोपाधिको वा, स्वतः एव वा, काकतालीया वा। नाद्यः, एकस्मिन् अवयवे वृक्णे

चिदात्मनोऽपि अवयवः वृणः इति चैतन्याभावप्रसङ्गात्। न द्वितीयः, न हि बहूनाम् अवयवानां परस्पराविनाभावनियमो दृष्टः। नापि तृतीयः, यादृच्छिकसंश्लेषः इव यादृच्छिकविश्लेषोऽपि स्यात् इति स्वस्थानाम् अपि जनानाम् अकस्मात् अचेतनत्वापत्तेः।

अपि च अवयवसमुदायचैतन्यपक्षे एकस्यैव आत्मनः देहान्तरपरिग्रहे सति देहभेदेन अवयवभेदस्य अवश्यमेव स्वीकरणीयत्वात् आत्मभेदः अपि स्वीकरणीयः भवेत्। तेन कृतनाशाकृताभ्यागमप्रसङ्गः। अपि च जैनैः मुक्तौ शरीरसम्बन्धविहीनस्य आत्मनः स्वाभाविकावस्थायाम् अवस्थितिः स्वीक्रियते। तत्कालीनम् आत्मनः परिमाणं च नित्यपरिमाणम् इति उच्यते। नित्यस्य च अविकारित्वात् संसारदशायाम् अपि तस्य नित्यपरिमाणस्य अनुवृत्तिः स्वीकरणीया इति आत्मनः मध्यमपरिमाणत्वं देहपरिमाणत्वं वा न स्वीकरणीयम्।

(ख) अणुपरिमाणत्वखण्डनम्[५५]

वैष्णववेदान्तिनां मते आत्मा अणुपरिमाणः। तत्र च 'एषोऽणुरात्मा चेतसा वेदितव्यः'[५६] इति, 'बालाग्रशतभागस्य शतधाकल्पितस्य च। भागो जीवः स विज्ञेयः'[५७] इत्यादिश्रुतिवचनं प्रमाणत्वेन उपन्यस्यते। अपि च श्रुतौ जीवात्मनः देहात् उत्क्रान्तिः, लोकान्तरगतिः इहलोके आगतिः इत्यादिकं सविशदं वर्णितम्। तथा च श्रुतिः—'तेन प्रद्योतेन एष आत्मा निष्क्रामति चक्षुषो वा मूर्ध्नो वा अन्येभ्यो वा शरीरदेशेभ्यः'[५८] इति, 'ये वै के चास्मात् लोकात् प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति'[५९] इति 'तस्मात् लोकात् पुनरेति तस्मै लोकाय कर्मणे'[६०] इति च। न च सर्वव्यापिनः विभोः एतादृशं गमनागमनं सम्भवति। ('उत्क्रान्तिगत्यादीनाम्)[६१] 'जीवो न व्यापकः, उत्क्रान्तिमत्त्वात्, गतिमत्त्वात्, क्रियावत्त्वात्, खगशरीरवत्'[६२]। तस्मात् "परमाणुरेवायं जीवः, न

विभुः। कुतः उत्क्रान्त्यादिभ्यः। न च सर्वगतस्य तस्य ताः सम्भवेयुः"[६३]। यद् यद् गतिमत्त्वे सति न मध्यमपरिमाणवत् तत् अणुपरिमाणवत्, यथा परमाणुः इति हि अनुमानप्रयोगः।

तत्रोच्यते—जीवात्मनः अणुपरिमाणवत्त्वे तेन शरीरं व्याप्य अवस्थितिः न सम्भवेत् इति तदीयधर्मस्य चैतन्यस्यापि सर्वशरीरे उपलब्धिर्न स्यात्। भवति तु चैतन्यस्य सर्वशरीरं व्याप्य उपलब्धिः। तत्र धर्मस्य धर्मिव्यतिरेकेण स्थित्यभावात् आत्मनः सर्वशरीरव्यापित्वं स्वीकरणीयम्। तस्य च मध्यमपरिमाणवत्त्वा-सम्भवात्, विभुपरिमाणवत्त्वं स्वीकरणीयम्। ननु, यथा हरिचन्दन-बिन्दुः देहैकदेशवर्त्यपि सकलदेहव्यापिनम् आह्लादं जनयति तद्वद् आत्मापि देहैकदेशवर्ती सन् अपि सकलदेशवर्तिनीं वेदनाम् अनुभवति इति चेत् (अविरोधश्चन्दनवत्)[६४]। न, चन्दनबिन्दोः देहैकदेशावस्थितिः प्रत्यक्षगम्या, आत्मनः देहैकदेशावस्थितिस्तु प्रत्यक्षागम्यत्वात् सन्दिग्धा। सर्वशरीरव्यापि चैतन्यं तु प्रत्यक्ष-ग्राह्यम् इति चैतन्यरूपगुणाधारस्य आत्मनोऽपि सर्वशरीरव्यापित्वं सिद्धम्। "गुणिव्यतिरेकेण अस्यासम्भावितत्वाद् अन्यथा घटव्यति-रेकेणापि घटरूपं स्यात्"[६५]।

यद्यपि श्रुतौ क्वचित् क्वचित् आत्मनः अणुपरिमाणवत्त्वं दृश्यते, तथापि आत्मनः विभुत्वम् एव भूयशः अभ्यस्तम्। तथाहि—'स वा एष महानज आत्मा'[६६], 'सत्यं ज्ञानमनन्तं ब्रह्म'[६७] 'आकाशवत् सर्वगतश्च नित्यः'[६८], 'नित्यं विभुं सर्वगतम्'[६९] 'महतो महीयान्' इत्यादिकम्। परस्यैव ब्रह्मणः 'जीवेनात्मना प्रविश्य'[७०] इति प्रवेशश्रवणात्, 'तत्त्वमस्यादिश्रुत्या तादात्म्यश्रवणाच्च परम् एव ब्रह्म जीवाभिन्नम् इति जीवस्य विभुत्वम्। ननु तथापि अणुपरिमाणवत्त्वं वदन्त्याः श्रुतेः अप्रामाण्यं नाभ्युपगन्तव्यम्। उच्यते—बाढम्, तत्र बुद्धिरूपोपाधिवशादेव जीवस्य अणुत्वेन निर्देशः इति बोद्धव्यम्। बुद्धिर्हि अतिसूक्ष्मत्वेन अणुपरिमाणवती

इति तदुपहितस्य जीवात्मनोऽपि अणुपरिमाणवत्त्वम् अभिप्रेतम् इत्यर्थः। तथा च श्रुतिः—"बुद्धेर्गुणेनात्मगुणेन चैव आराग्रमात्रो ह्यवरोऽपि[७१] दृष्टः" इति। आत्मनः अवरत्वेऽपि विभुत्वेऽपि बुद्धिकल्पितगुणेन आराग्रप्रमाणत्वं अतिसूक्ष्मपरिमाणवत्त्वं वा अभ्युपगन्तव्यम् इत्यर्थः। अपि च उपनिषदि जीवहृदयः ब्रह्मणः 'गुहा' इति जीवदेहश्च 'ब्रह्मपुरम्' इति उच्यते। तस्मिन् जीवदेहे ब्रह्मपुरे वा अतिसूक्ष्मम् एकं पद्मं विद्यते। तस्मिन् अवच्छिन्नः आकाशः दहराकाशः इत्युच्यते। स च दहराकाशः 'ब्रह्मकोषः' इत्युच्यते। स च ब्रह्मकोषः जीवस्य उपाधिः 'कोषोपाधिविवक्षायां याति ब्रह्मैव जीवताम्' (प० द० ३।४१)। तस्य ब्रह्मकोषस्य अतिसूक्ष्मत्वात्, अणुतुल्यत्वात् वा तदुपहितस्य जीवस्यापि अणुत्वं विवक्षितम्। एवम् उपाधिपरिमाणम् आत्मनि आरोप्य आत्मनः अणुपरिमाणवत्त्वं अङ्गुष्ठप्रमाणत्वं वा उच्यते इति अवगन्तव्यम्।

ननु भूमारूपः परममहान् विश्वात्मा अपि आत्मशब्देन व्यपदिश्यते इति यत्र आत्मनः अणुत्वं श्रुतं तत्र जीवात्मा, यत्र च विभुपरिमाणवत्त्वं श्रुतं तत्र विश्वात्मा अभिप्रेतः इति स्वीकारे सर्वं समञ्जसं भवेत् इति चेत्। उच्यते—तथा सति जीवब्रह्मणोः अभिन्नत्वं वदत् तत्त्वमस्यादिवाक्यं पीड्येत।

तस्मात् आत्मनः अणुपरिमाणवत्त्वम् अपि न स्वीकरणीयम् इति तस्य विभुपरिमाणवत्त्वमेव अभ्युपगन्तव्यम्।

५. अवच्छेदवादः[७२]

जीवेश्वरयोः औपाधिको भेदः, न पारमार्थिकः इति अद्वैतिनां सिद्धान्तः। तत्र अज्ञानान्तःकरणरूपोपाधिभिः चैतन्यस्य अवच्छेदः, तत्र उपाधौ प्रतिबिम्बनम् इति पक्षद्वयम्। तत्र आद्यः अवच्छेदवादः द्वितीयः प्रतिबिम्बवादः इत्युच्यते। अवच्छेदवादे अन्तःकरणावच्छिन्नं चैतन्यं जीवः, अविद्यावच्छिन्नं चैतन्यम् ईश्वरः। ईश्वरस्य उपाधिः

माया, जीवस्य उपाधिः अन्तःकरणम्। अत्र अवच्छेदवादिनां मते जीवो नाम अखण्डस्य ब्रह्मणः सखण्डाभिव्यक्तिः। तेषां मते जीवब्रह्मणोः सम्बन्धः, घटाकाशमहाकाशयोः इव। तथाहि अनन्तः अखण्डः आकाशः यथा घटादिना अवच्छिन्नः सन् घटाकाशाद्याख्यां लभते, तथा अखण्डं सच्चिदानन्दरूपं ब्रह्म अपि अन्तःकरणरूपेण उपाधिना अवच्छिन्नं सत् जीवसंज्ञां लभते। 'अंशो नाना व्यपदेशात्'[७३] इत्यादि सूत्रेषु च सूत्रकारेण परमात्मनः अंशत्वेन जीवस्वरूपकथनात् अयम् अवच्छेदवादः अंशवादो वा सूत्रकाराणाम् अभिप्रेतः इति अवगम्यते। अपि च जीवः ब्रह्मरूपाग्नेः स्फुलिङ्गरूपः इति वचनादपि जीवः ब्रह्मणः अंशः इति निश्चीयते। श्रीमद्भगवद्गीतायामपि—'ममैवांशो जीवलोके जीवभूतः सनातनः'[७४] इति उक्तत्वात् जीवस्य ब्रह्मांशत्वम् प्रतिपाद्यते। एवं च परमात्मनः अखण्डत्वे अपि उपाधिपरिच्छिन्नत्वेन विभिन्नत्वात् 'आत्मा वा अरे द्रष्टव्यः'[७५], 'सोऽन्वेष्टव्यः स विजिज्ञासितव्यः'[७६] इत्यादिश्रुतौ उपदिष्टः ज्ञातृज्ञेययोः जीवपरमात्मनोः भेदोऽपि उपपन्नः भवति, वह्निस्फुलिङ्गयोः इव अंशांशिनोः भेदस्य स्पष्टत्वात्। अवच्छेदवादे बुद्ध्यन्तःकरणादिकं चैतन्यस्य अवच्छेदकं विशेषणं वा भवति समष्टिमायायाः समष्ट्यन्तःकरणम् उत्पद्यते, तेन विशिष्टं चैतन्यं च हिरण्यगर्भ इत्युच्यते व्यष्ट्यविद्यायाः व्यष्ट्यन्तःकरणम् उत्पद्यते, तेन विशिष्टं चैतन्यं च हिरण्यगर्भ इत्युच्यते व्यष्ट्यविद्यायाः व्यष्ट्यन्तःकरणम् उत्पद्यते, तेन विशिष्टं चैतन्यं च जीव इत्युच्यते। विशेष्यविशेषणयोः सम्बन्धस्तु आध्यासिकः, अविवेकप्रसूतः वा, न तु वास्तविकः। जीवस्य घटाकाशतुल्यत्वात्, घटस्य यथा आकाशेन न कश्चित् वास्तविकः सम्बन्धः इति घटेन आकाशः न परिच्छिद्यते, तथा अविद्यायाः अन्तःकरणस्य वा चैतन्येन सह न कश्चन सम्बन्ध इति अविद्यया अन्तःकरणेन वा ब्रह्मणः वास्तविकः परिच्छेदः न सम्भवतीति। एवं च ज्ञानोदये सति अन्तःकरणादीनाम् अवच्छेद-

कानां तिरोधानेन आविद्यकभेदबुद्धौ तिरोहितायां जीवब्रह्मणोः अभेदज्ञानम् आगच्छति, जीवः ब्रह्मस्वरूपत्वेन आत्मानम् उपलभते।

एतेषां मते 'न स्थानतोऽपि'[७७] इत्यादिसूत्रोक्ताधिकरणे भाष्यकारेण स्वयं प्रतिबिम्बवादः निराकृतः। अस्यैव अधिकरणस्य 'अतएव चोपमा सूर्यकादिवत्'[७८] इति सूत्रे जलसूर्यदृष्टान्तग्रहणात् प्रतिबिम्बवाद एव सूत्रकारसम्मतः इति प्रतिबिम्बवादिभिः उच्यमाने अवच्छेदवादिभिः उच्यते—"अम्बुवदग्रहणात्तु न तथात्वम्'[७९] इति उत्तरसूत्रे एव भाष्यकारेण सर्वगतस्य आत्मनः प्रतिबिम्बत्वं निराकृतम्। अम्बु सूर्यादिभ्यो गर्तेभ्यः विप्रकृष्टे देशे वर्तते। आत्मा तु अमूर्तः, तस्य च सर्वव्यापित्वात् तस्मात् विप्रकृष्टदेशे वर्तमानं प्रतिबिम्बनयोग्यं न किमपि वस्तु-अस्ति। अतो न क्वाप्यात्मनः सर्वगतस्य प्रतिबिम्बो युक्तः। अत्र यथा सूर्यः जले प्रतिबिम्बितः सन् जलगतकम्पनाद्युपाध्यधीनो भवति, तथा ब्रह्मापि अन्तःकरणादिपरिच्छिन्नं सत् अन्तःकरणगतसुखदुःखादिभाग् भवति इत्यत्रैव तात्पर्यं, न तु ब्रह्मणः सूर्य्यवत् प्रतिबिम्बत्वे तात्पर्य्यम्। एवम् 'आभास एव च'[८०] इति सूत्रस्यापि न ब्रह्मप्रतिबिम्बे तात्पर्य्यम् इति मन्तव्यम्। एवं 'जीवेशावभासेन करोति' इत्यत्रापि आभासपदस्य अवच्छिन्नपरत्वात् नानुपपत्तिः।

तस्मात् अन्तःकरणावच्छिन्नं चैतन्यं जीवः, अविद्यावच्छिन्नचैतन्यम् ईश्वरः। 'मायोपाधिर्जगद्योनिः सर्वज्ञत्वादिलक्षणः' इति वाक्यवृत्तिगतं वचनम् उपपद्यते। 'कार्य्योपाधिरयं जीवः, कारणोपाधिरीश्वरः' इति अपि उपपन्ना। वाचस्पतिमिश्रैः अवच्छेदवादम् अवलम्ब्य नीरूपस्य चैतन्यस्य नीरूपे अन्तःकरणाद्युपाधौ प्रतिबिम्बनं निराकृतम्। तथा चोक्तम्—'रूपवद्धि द्रव्यम् अतिस्वच्छतया रूपवतो द्रव्यान्तरस्य तद्विवेकेन गृह्यमाणस्यापि छायां गृह्णीयात्। चिदात्मा तु अरूपो विषयो न विषयच्छायाम् उद्ग्राहयितुम् अर्हति। यथाहुः 'शब्दगन्धरसादीनां कीदृशी प्रतिबिम्बता"[८१] इति। उदके तु न

गगनस्य प्रतिबिम्बः, किन्तु आलोकस्य नक्षत्रादीनां वा। प्रतिध्वनेरपि शब्दविशेषत्वेन न सा शब्दप्रतिबिम्बः। 'अविद्योपधानकल्पितावच्छेदो जीवः परमात्मप्रतिबिम्बकल्पः'[८२] इत्यत्र 'अविद्योपधानं च यद्यपि विद्यास्वभावे परमात्मनि न साक्षादस्ति, तथापि तत्प्रतिबिम्बकल्पजीवद्वारेण परस्मिन् उच्यते'[८३] इत्यत्र च जीवस्य प्रतिबिम्बसादृश्यकथनात् प्रतिबिम्बवादः असम्मतः इति ज्ञायते। एवं 'प्रतिबिम्बानामिव श्यामतादिः जीवानामेव नानावेदनाभिसम्बन्धः। ब्रह्मणस्तु बिम्बस्येव न तदभिसम्बन्धः'[८४] इत्यत्र च 'प्रतिबिम्बानामिव' 'बिम्बस्येव' इत्युक्त्या मुख्यः प्रतिबिम्बवादः न सम्मत इति ज्ञायते।

अपि तु 'यथा घटाकाशो नाम न परमाकाशादन्यः' इत्यादिग्रन्थे,[८५] घटाकाशोदाहरणेन 'स एव तु (परमात्मा) अविद्योपधानभेदात् घटकरकाद्याकाशवत् भेदेन प्रथते'[८६] इत्यत्र 'औपाधिकत्वाच्च (जीवब्रह्म) भेदस्य घटकरकाद्याकाशवत् विरुद्धधर्मसंसर्गस्योपपत्तेः'[८७] इत्यत्र च जीवस्य घटकरकाद्याकाशवदवच्छिन्नत्वोक्त्या अवच्छेदवादः समर्थितः इति ज्ञायते। तथा च, वाचस्पतीनां मते अनाद्यविद्यावशात् सच्चिदानन्दं ब्रह्म देहेन्द्रियादिभिः आबद्धं सत् जीवभावं प्राप्नोति। स्वप्रकाशः निर्गुणः निर्विशेषः निरंशः परमात्मा अखण्डः, अनवच्छिन्नः, अकर्त्ता, अभोक्ता अपि सखण्डः अवच्छिन्नः कर्त्ता, भोक्ता इव सन् जीवाख्यां लभते। यथा अनन्तः आकाशः अभिन्नः अखण्डः अपि घटाद्युपाधिभेदेन विभिन्नः, सखण्डः इव सन् विभिन्नधर्मयुक्तत्वेन प्रतिभाति तथा अद्वितीयः सच्चिदानन्दः परमात्मा अपि बुद्धिमनःदेहेन्द्रियादिभिः उपाधिभिः परिच्छिन्नः सन् नानाधर्मविशिष्टत्वेन प्रतिभाति। अहं प्रत्यये हि चिदात्मा कर्तृत्वेन भोक्तृत्वेन च प्रत्यवभासते। न हि उदासीनस्य निष्क्रियस्य आत्मनः क्रियाशक्तिः भोगशक्तिर्वा सम्भवति। यस्य च बुद्ध्यादेः कार्य्यकारणसंघातस्य

क्रियाभोगशक्ती न तस्य चैतन्यम्। तस्मात् चिदात्मा एव कार्य्यकारणसंघातेन ग्रथितः लब्धक्रियाभोगशक्तिः स्वयंप्रकाशः अपि बुद्ध्यादिविषयविच्छुरणात् कथंचित् अस्मत्प्रत्ययविषयः अहंकारास्पदं जीव इति च जन्तुरिति च क्षेत्रज्ञ इति च आख्यायते।"[८८]

अनेन प्रबन्धेन वाचस्पतिमिश्राः अवच्छेदवादिनः इति प्रतिभाति, घटाकाशादिदृष्टान्ताः हि अवच्छेदवादे एव उपयुज्यन्ते। परं तु तैरेव 'अवस्थितेरिति काशकृत्स्नः'[८९] इति सूत्रभाष्यस्य व्याख्यानप्रसङ्गे जीवः ब्रह्मप्रतिबिम्बः इति स्पष्टतया उक्तम्। यथा निर्मलाद् बिम्बात् प्रतिबिम्बानां तात्त्विके अभेदे अपि नीलमणि-कृपाण-काचाद्युपाधिभेदात् एकस्यैव मुखस्य प्रतिबिम्बानाम् इदं श्यामलम् इदं निर्मलम् इदं वृत्ताकारकम् इदं दीर्घम् इत्यादि भेदबुद्धिः जायते, तथैव शुद्धस्वभावात् परमात्मनः जीवानाम् अभेदे ऐकान्तिके अपि अनिर्वचनीयानाद्यविद्योपाधिभेदात् जीवानां काल्पनिकी भेदबुद्धिः आगच्छति, जीवाश्च शोकदुःखजन्ममरणादिभिः उपद्रुताः इति मन्यते। "अविद्योपधानं च यद्यपि विद्यास्वभावे परमात्मनि न साक्षादस्ति, तथापि प्रतिबिम्बकल्पजीवद्वारेण परस्मिन्....यथा प्रतिबिम्बेषु भासमानेषु बिम्बं तदभिन्नमपि गुह्यम्",[९०] एवं जीवेषु भासमानेषु तदभिन्नमपि ब्रह्म गुह्यम्।" इति 'अंशो नाना व्यपदेशात्',[९१] इत्यादिसूत्रभाष्याणां व्याख्यानप्रसङ्गे अपि वाचस्पतिमिश्रैः जीवस्य ब्रह्मप्रतिबिम्बत्वं समाहितम्। 'तस्मादद्वैते भाविके स्थिते जीवभावस्तस्य ब्रह्मणोऽनाद्यनिर्वचनीया विद्योपधानभेदात् एकस्यैव बिम्बस्य दर्पणाद्युपाधिभेदात् तत्प्रतिबिम्बभेदाः।...न च मोक्षस्य अनर्थबहुलता, यतः प्रतिबिम्बानाम् इव श्यामतावदाततादिः जीवानामेव नानावेदनाभिसम्बन्धो ब्रह्मणस्तु बिम्बस्येव न तदभिसम्बन्धः। यथा च दर्पणापनये तत्प्रतिबिम्बं बिम्बभावे अवतिष्ठते, न कृपाणे

प्रतिबिम्बितम् अपि, एवम् अविद्योपधानविगमे जीवे ब्रह्मभावः”[२८] इति। इति सूत्रस्य प्रसङ्गे अपि वाचस्पतिना जीवस्य ब्रह्मप्रतिबिम्बत्वं समर्थितम्। अतएव वाचस्पतिमिश्राः अपि प्रतिबिम्बवादिनः इति केचन वदन्ति। परिमलकारैः समन्वयाधिकरणग्रन्थस्य उपसंहारे इदं मतद्वयम् सविस्तरम् आलोचितम्। परं तु तैरपि वाचस्पतिमिश्राणाम् अवच्छेदवादे एव आग्रहः इति न वज्रलेपायितम्। तैः हि प्रथमतः प्रतिबिम्बवादम् उपस्थाप्य तदनन्तरम् अवच्छेदवादः उपस्थापितः, न तु अवच्छेदवादपक्षम् अवलम्ब्य प्रतिबिम्बवादः खण्डितः। अपि च अवच्छेदपक्षे न सूत्रादिविरोधाशंका इति तैः मैत्रीभावेन समाधानं कृतम्। तथापि अवच्छेदवादेन समापनात् तत्रैव मिश्राणाम् आग्रहः इति प्रतिभाति। साम्प्रदायिकाश्च वाचस्पतिमिश्राः अवच्छेदवादिनः इति वदन्ति।

६. प्रतिबिम्बवादः[९३]

प्रतिबिम्बवादिनां मते तु न हि अन्तःकरणेन अवच्छिन्नः जीवः, अपि तु अन्तःकरणे प्रतिबिम्बितः एव। तेषां मते, प्रतिबिम्बवादे अपि जीवानां भेदः प्रतिपद्यते, अन्तःकरणानां भेदात् अन्तःकरणोपाधिभिः परिच्छिन्नानाम् इव अन्तःकरणोपाधौ प्रतिबिम्बितानाम् अपि अन्तःकरणभेदेन भेदाभ्युपगमात्। एवं जीवानाम् अंशत्वं च प्रतिबिम्बवादे अपि उपपद्यते। अन्तःकरणावच्छिन्नचैतन्यं यथा महाचैतन्यस्य अंशत्वेन परिगण्यते, तथा अन्तःकरणप्रतिबिम्बितस्यापि महाचैतन्यस्य अंशत्वं कथं न स्यात्। वस्तुतः चैतन्यस्य निरवयवत्वात् निरंशत्वात्, तस्मिन् अंशत्ववचनं कल्पनामात्रं, न वास्तविकम्। तथा च भाष्यकारः–अंश इव अंशः, नहि निरवयवस्य मुख्योऽशः सम्भवति।’ इति। एवं च ‘अंशो नाना व्यपदेशात्’[२६]

इत्यादिसूत्राणि प्रतिबिम्बवादे अपि प्रतिपद्यन्ते । एतेषां मते 'आभास एव च'[९५] इति सूत्रे एवशब्दप्रयोगात् प्रतिबिम्बवाद एव सूत्रकारैः अभिप्रेत इति अवगम्यते । 'अंशो नानाव्यपदेशात्' इति सूत्रे अवच्छेदवादे अभ्युपगमे अपि 'आभास एव च' इति उत्तरसूत्रे 'एव' शब्दप्रयोगेण आभासत्वस्य प्रतिबिम्बत्वस्य वा दृढीकरणात् 'अंशो नाना' इति सूत्रे अवच्छेदवादं पूर्वपक्षत्वेन उपस्थाप्य उत्तर-सूत्रे प्रतिबिम्बवादः एव सिद्धान्तितः इति अवगम्यते इति केचित् । तथा चोक्तं भाष्यरत्नप्रभायाम्—'अंशेत्यादिसूत्रे जीवस्य अंशत्वं घटाकाशस्येव उपाध्यवच्छेदबुद्ध्या उक्तम्, सम्प्रति एवकारेण अवच्छेदपक्षारुचिं सूचयन् 'रूपं रूपं प्रतिरूपो बभूव'[९६] इत्यादि श्रुतिसिद्धं प्रतिबिम्बपक्षम् उपन्यस्यति भगवान् सूत्रकारः "आभास एव चेति"।[९७] इति । तथा च पञ्चपादिकायाम्—'तत्त्वमिति बिम्ब-स्थानीयब्रह्मस्वरूपता प्रतिबिम्बस्थानीयस्य जीवस्य उपदिश्यते' इति 'शास्त्रीयोऽपि व्यवहारः प्रतिबिम्बस्य पारमार्थिकमेव बिम्बैक-रूपत्वं दर्शयति'[९८] इति, 'जीवः पुनः प्रतिबिम्बकल्पः सर्वेषां नः प्रत्यक्ष श्चिद्रूपः नान्तःकरणजाड्येनास्कन्दितः'[९९] इति च प्रतिबिम्बवादः प्रकाशितः। विवरणेऽपि 'ननु कोऽयं जीवो नाम यस्य स्वरूपं त्वं पदेन लक्ष्यमाणं ब्रह्मैव वाक्यार्थः सम्पद्यते । ब्रह्मैव अविद्या-प्रतिबिम्बितमिति वदामः'[१००] इति प्रतिबिम्बवादः उपसंहृतः।

ननु रूपवत एव पदार्थस्य प्रतिबिम्बः सम्भवति, न अरूपस्य इति नीरूपस्य ब्रह्मणः प्रतिबिम्बः न सम्भवति इति चेत् । न, रूपस्य गुणपदार्थत्वात्, गुणे च गुणाभावात् रूपे रूपं नास्ति । तस्य तु नीरूपस्य रूपस्य दर्पणादौ प्रतिबिम्बदर्शनात् । ननु, नीरूपस्य द्रव्यस्य एव प्रतिबिम्बः न सम्भवति रूपस्य तु द्रव्यत्वाभावात् रूपा-भावत्वे अपि न हानिरिति चेत् । उच्यते—रूपवतः द्रव्यस्य दृश्यत्वात् प्रतिबिम्बस्यापि दृश्यत्वम् । नीरूपस्य तु अप्रत्यक्षत्वात् प्रतिबिम्बस्यापि अदृश्यत्वम् इति तावत् वक्तुं शक्यते । नीरूपस्य

द्रव्यस्य प्रतिबिम्बो नास्तीति तु नैव वक्तुं शक्यम्, यतः नीरूपस्य द्रव्यस्य अप्रत्यक्षत्वेऽपि प्रमाणान्तरसिद्धत्वेन तस्य अस्तित्वं यथा स्वीक्रियते तथा नीरूपद्रव्यस्य प्रतिबिम्बोऽपि श्रुतिरूपप्रमाणान्तर-सिद्धत्वेन स्वीक्रियतां नाम। अपि च शब्दो द्रव्यपदार्थः, तस्य तु नीरूपत्वे अपि प्रतिध्वनिरूपः प्रतिबिम्बः अनुभूयते। नक्षत्रमण्डितस्य आकाशस्य अपि नीरूपद्रव्यस्य जले प्रतिबिम्बो दृश्यते। न चायं प्रतिबिम्बः सूर्य्यकिरणस्य एव, न तु आकाशस्य इति वक्तव्यम्, प्रतिबिम्बस्य कटाहस्य दृश्यमानत्वेन आकाशप्रतिबिम्बत्वोपपत्तेः। एवं नीरूपस्य आत्मनः अपि प्रतिबिम्बः उपपद्यते एव।

'रूपं रूपं प्रतिरूपो बभूव' [१०१] इत्यादि श्रुतिभिः, 'एकधा बहुधा चैव दृश्यते जलचन्द्रवत्' इत्यादि स्मृतिभिः, 'अतएव चोपमा सूर्य-कादिवत्' [१०२] इत्यादि सूत्रैः च जीवस्य प्रतिबिम्बभावः दर्शितः।

ननु घटाकाशवत् उपाध्यवच्छिन्नो जीवः किं न स्यात्? न—उपाधिभिः अण्डान्तर्वर्तिब्रह्मणः सर्वात्मना जीवभावेन अवच्छिन्न-त्वात् अनवच्छिन्नस्य ब्रह्मणः अण्डाद् बहिरेव सद्भावप्रसङ्गात् तत्र सर्वगतत्वसर्वनियन्तृत्वादि ब्रह्मणो न स्यात्। अवच्छिन्नप्रदेशेषु अनवच्छिन्नस्य द्विगुणीकृत्य वृत्त्ययोगात्। प्रतिबिम्बपक्षे तु जलगत-स्वाभाविकाकाशे सत्येव प्रतिबिम्बाकाशदर्शनात् एकत्रैव द्विगुणीकृत्य वृत्त्युपपत्तेः जीवावच्छेदेषु ब्रह्मणोऽपि नियन्तृत्वादिरूपेण अवस्थानम् उपपद्यते इति प्रतिबिम्बपक्षः एव श्रेयान्।

ननु प्रतिबिम्बस्य अवस्तुत्वाभ्युपगमात् न जीवः प्रतिबिम्बम् इति चेत्। न, मुखचित्स्वरूपयोः प्रतिबिम्बेषु नावस्तुत्वम् इष्यते, भेदविपर्य्यासादीनाम् अवस्तुत्वाभ्युपगमेऽपि न मुखचैतन्ययोः काचित् क्षतिः, मुखचित्स्वरूपयोश्च बिम्बात्मतां प्रमिमीमहे मिथ्यांश-पर्युदासेन।

(क) अविद्याप्रतिबिम्बितचैतन्यम् ईश्वरः, अन्तःकरणप्रतिबिम्बितं चैतन्यं जीवः ।

संक्षेपशारीरककाराणां सर्वज्ञात्ममुनीनां मते ईश्वरस्य उपाधिः माया । मायाप्रतिबिम्बितचैतन्यम् एव ईश्वरः । स चेश्वरः सर्वज्ञः, सर्वशक्तिमान् जगतः स्रष्टा पालकश्च । मायारूपोपाधिविगमे सति ईश्वरस्यापि ब्रह्मणि विलयो भवति । ईश्वरस्य अज्ञानसम्बन्धे सत्त्वे अपि अज्ञानम् अस्पष्टम् अप्रकटं वा । जीवस्य उपाधिः अन्तःकरणम् । अन्तःकरणे प्रतिबिम्बितं चैतन्यम् एव जीवः । जीवः अविद्याधीनः अल्पज्ञः अल्पशक्तिश्च । 'अहमज्ञः' इति जीवस्य अज्ञानानुभवः स्पष्टः । जीवस्य जीवभावोऽपि मिथ्या अविद्यानाशे जीवोऽपि ब्रह्मभावं लभते ।

जीवपरमेश्वरसाधारणं बिम्बत्वादिभिः अविशिष्टं निरुपाधिकं चैतन्यमात्रम् एव बिम्बम् । यद्यपि अनादेः मायायाः तत्सम्बन्धस्य च विद्यमानत्वात् निरुपाधिकचैतन्यं दुर्लभम्, तथापि तत्त्वज्ञदृष्ट्या तत् सुलभम्, तदा निखिलोपाधेः निरासाद् इति भावः । तस्य निरुपाधिकचैतन्यस्य बिम्बस्य अविद्यात्मिकायां मायायां प्रतिबिम्बम् ईश्वरचैतन्यम् । निरुपाधिकचैतन्यस्य अविद्यायां प्रतिबिम्बोदयात् बिम्बत्वेन अभिधानम् इति भावः । तस्यैव निरुपाधिकचैतन्यस्य अन्तःकरणेषु प्रतिबिम्बं जीवचैतन्यम् । तथा च अन्तःकरणस्य जीवोपाधेः प्रतिशरीरं भेदाद् जीवभेदः इति भावः । जीवेश्वरयोः अस्मिन् भेदे 'कार्योपाधिरयं जीवः, कारणोपाधिरीश्वरः' इति श्रुतिः मानम् । कार्यम् अन्तःकरणम् उपाधिः यस्य स जीवः, कारणम् अज्ञानम् उपाधिः यस्य स ईश्वरः इत्यर्थः । न च 'जीवेशावाभासेन करोति माया चाविद्या च' इति श्रुतिविरोधः, तत्र जीवस्य कारणोपाधिकत्वप्रतीतिः इति वाच्यम्, तत्र मायापदस्य मायापरिणामान्तःकरणपरत्वात्, अन्यथा द्वयोरेव

विरोधाद् अप्रामाण्यप्रसङ्गात्। एतन्मते जलाशयस्थजलगतशराव-स्थजलगतयोः सूर्यप्रतिबिम्बयोः इव जीवेश्वरयोः भेदः। सूर्यस्य स्वरूपतः भेदाभावे अपि उपाध्योः भेदाद् यथा कल्पितभेदः, तथा जीवेश्वरयोर्भेदः अपि कल्पितः इत्यर्थः। तथा च निरुपाधिकचैतन्यस्य स्वरूपतो भेदाभावे अपि जीवेश्वरयोः प्रतिबिम्बत्वेन अविशेषे अपि प्रतिबिम्बोपाध्योः अज्ञानान्तःकरणयोः भेदात् कल्पितभेदः इत्यर्थः। ननु, जीवेश्वरयोः प्रतिबिम्बत्वे अव्यापित्वम्, प्रतिबिम्बस्य स्वोपाध्यपेक्षया न्यूनपरिमाणत्वात्, सूर्यप्रतिबिम्बादिषु तथा दर्शनात् इति चेत्। न, अविद्यात्मकोपाधेः व्यापकतया तदुपाधिकेश्वरस्यापि व्यापकत्वम्। तथा च परिच्छिन्नजडप्रतिबिम्बस्य स्वोपाध्यपेक्षया न्यूनपरिमाणत्वे अपि अपरिच्छिन्नचेतन-प्रतिबिम्बस्य स्वोपाध्यपेक्षया न न्यूनपरिमाणत्वम्, अन्यथा चेतनप्रतिबिम्बस्य स्वोपाध्यपेक्षया न्यूनपरिमाणत्वे अन्तःकरण-व्यापितया जीवोपलब्धिः न स्यात्। तथा च ईश्वरोपाधेः अविद्यायाः व्यापकत्वात् तत्र व्यापक - चेतनप्रतिबिम्बस्य व्यापकत्वे सिद्धम् ईश्वरस्य व्यापकत्वम् इति भावः। अन्तःकरणस्य परिच्छिन्नतया अव्यापकतया वा तदुपाधिकजीवस्यापि परिच्छिन्नत्वम्। प्रतिबिम्बस्य अन्तःकरणव्यापित्वे अपि अन्तःकरणस्य अव्यापकतया तत्र प्रतिबिम्बस्य जीवस्य न सर्वव्यापकत्वम् इति भावः।

(ख) मायाप्रतिबिम्बम् ईश्वरः, अविद्याप्रतिबिम्बं जीवः।

(१) तत्त्वविवेककारैः मायाविद्ययोः रूपभेदः स्वीक्रियते। तेषां मते 'जीवेशावाभासेन करोति माया चाविद्या च' इति श्रुतिरेव मायाविद्ययोः भेदे मानम्। तत्र शुद्धसत्त्वप्रधाना माया, मलिनसत्त्व-प्रधाना च अविद्या इति उभयोर्भेदः। यदा विक्षेपशक्त्या माया, आवरणशक्त्या च अविद्या इति उभयोः रूपभेदः। तत्र मायाप्रतिबिम्बितं चैतन्यम् ईश्वरः, अविद्याप्रतिबिम्बितं चैतन्यं जीवः।

(२) प्रकटार्थविवरणकाराणां मतेऽपि मायाविद्ययोः भेदः अस्ति। चैतन्याश्रिता जगज्जननी प्रकृतिः माया, तत्र प्रतिबिम्बितं चैतन्यम् ईश्वरः। तदुक्तं—"भूतप्रकृतिः चिन्मात्रसम्बन्धिनी माया, तस्यां चित्प्रतिबिम्बः ईश्वरः।"[१०४]—प्र. वि.। तस्या एव मायायाः परिच्छिन्नरूपम् अज्ञानम् अविद्या वा। तस्यां परिच्छिन्नायाम् अविद्यायां प्रतिबिम्बितं चैतन्यं जीवः। विश्वयोनिः माया अपरिच्छिन्ना अनादिः एका अखण्डरूपा च। तस्यां प्रतिबिम्बभूतः ईश्वरः सर्वज्ञः सर्वशक्तिमान्। जीवगता अविद्या परिच्छिन्ना, सखण्डा, विभिन्ना च। तस्यां प्रतिबिम्बः जीवः अल्पज्ञः अल्पशक्तिमान्।

(ग) **बिम्बचैतन्यम् ईश्वरः प्रतिबिम्बचैतन्यं जीवः[१०५]।**

तत्र प्रकाशात्मयतीनां मते मायाऽविद्ययोः न भेदः, अविद्यायां प्रतिबिम्बितं ब्रह्म एव जीवः। तथा चोक्तम्—'ननु कोऽयं जीवो नाम? ब्रह्मैव अविद्याप्रतिबिम्बितः इति वदामः'[१०६] इति विवरणे। तत्र ईश्वरः बिम्बः जीवस्तु प्रतिबिम्बः, बिम्बप्रतिबिम्बयोश्च अभेदः इति जीवब्रह्मणोः ऐक्यम्। केषाञ्चिद् मते ईश्वरो जीवश्च इति उभयम् अपि प्रतिबिम्बभूतम्, ब्रह्म तु उभयत्रापि बिम्बम्। प्रकाशात्मयतयस्तु इदम् आचार्य्यसम्मतम् इति न मन्यन्ते। तेषां मते जीवेश्वरयोर्मध्ये केवलम् अज्ञानम् एव भेदकोपाधिः। अनाद्यज्ञानात् अन्यः जीवेश्वरयोः भेदकः न कश्चन उपाधिः वर्तते। अतएव अज्ञाने विनष्टे जीवः ब्रह्मस्वारूप्यं लभते। अज्ञानम् एव ब्रह्मणः प्रतिबिम्बग्रहणे समर्थः उपाधिः। एकस्मिन् उपाधौ च तुल्यः एव प्रतिबिम्बः भवेत्, न तु भिन्नः। ईश्वरो जीवश्च इति द्विविधे प्रतिबिम्बे स्वीकृते सति द्विविधप्रतिबिम्बस्य द्विविधः उपाधिः स्वीकरणीयः भवेत्, न चैतत् सम्भवति, अज्ञानाद् बहिः उपाध्यन्तरस्य अभावात्। तस्मात् जीवेश्वरयोः उभयोः न प्रति-

बिम्बत्वम् । ईश्वरो बिम्बः, जीवस्तु प्रतिबिम्बः इति स्वीकारः एव युक्तः। तेन च ईश्वरस्य स्वातन्त्र्यम्, जीवस्य तु पारतन्त्र्यम् ईश्वरवश्यत्वं च उपपद्यते। दर्पणे मुखस्य प्रतिबिम्बः यथा न मुखात् भिन्नः, तथा बुद्धिदर्पणे चैतन्यस्य प्रतिबिम्बः अपि न चैतन्यात् पृथग्भूतः। प्रतिबिम्बश्च बिम्बस्य औपाधिको अभिव्यक्तिः इति प्रतिबिम्बस्य बिम्बवत् सत्यत्वं स्वीकरणीयम्, तयोर्भेदस्तु न वास्तविकः। जीवोऽपि ब्रह्मणः औपाधिको अभिव्यक्तिः इति कृत्वा जीवः वस्तुतः ब्रह्मस्वरूपः।

ननु, दर्पणस्थप्रतिबिम्बस्य अचेतनत्वात् तस्य यथा ज्ञानोदयः न सम्भवति, तथा चैतन्यप्रतिबिम्बजीवस्यापि अचेतनत्वप्रसङ्गात् तत्त्वज्ञानोदयः न सम्भवेत् इति चेत्। उच्यते—दर्पणे जडदेहस्यैव प्रतिबिम्बितत्वात् प्रतिबिम्बस्यापि जडत्वेन न ज्ञानोदयः जीवस्य तु चैतन्यप्रतिबिम्बितत्वात् चेतनत्वं तत्त्वज्ञानोत्पत्तिश्च उपपद्यते।

जीवेश्वरयोः उभयोरपि प्रतिबिम्बत्वे अविद्याकृतदोषाः असर्वज्ञत्व-राग-द्वेषादयः जीवे इव परमेश्वरे अपि स्युः। अन्तःकरणोपाधिकस्य जीवस्य चेतनत्वाविशेषे अपि यथा अन्तःकरणोपाधिदोषाणां कर्तृत्वभोक्तृत्वादीनां जीवात्मनि भानम्, तथा ईश्वरे अपि अविद्योपाधिदोषाणाम् असर्वज्ञत्वादीनां भानं स्याद् इति भावः। ननु, उपाधिदोषाणां कथम् उपाधेये भानम्, अतिप्रसङ्गात्। उच्यते—उपाधेः प्रतिबिम्बपक्षपातित्वात् प्रतिबिम्बे एव अतिशयेन कार्य्यकरत्वात्, प्रतिबिम्बे एव कार्य्यविशेषजनकत्वात्। बिम्बप्रतिबिम्बयोः कार्य्यकरोऽपि उपाधिः अतिशयेन प्रतिबिम्बे एव कार्य्यकरत्वात् तत्पक्षपातीति उच्यते। यथा मलिनो दर्पणः स्वमालिन्यं स्वान्तर्गतत्वं च प्रतिबिम्बे एव जनयति, तद्वत् अविद्या अपि स्वावरणकृत्यं प्रतिबिम्बभूते परमात्मनि अपि कुर्य्यात् इति भावः।

अतएव बिम्बात्मकम् ईश्वरचैतन्यम् इति विवरणकाराः। अविद्यायां चैतन्यप्रतिबिम्बस्य यत् बिम्बभूतं चैतन्यं तदेव ईश्वरचैतन्यम् इत्यर्थः। प्रतिबिम्बचैतन्यं तु जीवचैतन्यम् इति भावः। ननु बिम्बचैतन्यस्य ईश्वरत्वे प्रतिबिम्बचैतन्यस्य च जीवत्वे बिम्बप्रतिबिम्बयोः अभेदात् जीवेश्वरयोः भेदः। न स्यात् इति चेत्। उच्यते—अत्र अयम् आशयः—एकमेव चैतन्यं बिम्बत्वाक्रान्तम् बिम्बत्वविशिष्टं वा ईश्वरचैतन्यम्, प्रतिबिम्बत्वाक्रान्तम् जीवचैतन्यम्। ननु एकस्यैव चैतन्यस्य बिम्बत्वं प्रतिबिम्बत्वं च अयुक्तम्, विरुद्धयोः तयोः एकत्रावस्थानायोगात् इति चेत्। उच्यते यद्यपि एकस्य विरुद्धधर्माश्रयत्वं न युज्यते, विरुद्धधर्माश्रयत्वस्य नानात्वव्याप्यत्वात्, एकस्य नानात्वाभावात्। तथापि उपाधिना अभिन्नोऽपि भिन्नः इव अवभासमानः बिम्बप्रतिबिम्बभावम् अधिगच्छति, 'उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा'[१०७] इति श्रुतेः। तत्त्वतस्तु न बिम्बः नापि प्रतिबिम्बः, बिम्बप्रतिबिम्बभावो हि औपाधिकः, न स्वाभाविकः। न च प्रतिबिम्बस्य औपाधिकत्वे अपि बिम्बस्य नौपाधिकत्वम्, निरुपाधिकस्य बिम्बत्वाद् इति वाच्यम्, उपाधिम् अन्तरेण बिम्बप्रतिबिम्बव्यवहारानवतारात्।

बिम्बप्रतिबिम्बकल्पनोपाधिश्च एकजीववादे अवस्तुभूता अनादिः अविद्या। तत्र अविद्याप्रतिबिम्बः जीवः, बिम्बस्तु ईश्वरः। प्रतिबिम्बोपाधेः अविद्यायाः एकत्वाद् एको जीव इति भावः। ननु जीवेश्वरयोः एकत्वे प्रतिबिम्बस्यैव जीवत्वम्, न, बिम्बस्येति कथम्, वैपरीत्यस्यापि सम्भवाद् इति चेत्। न, उपाधेः प्रतिबिम्बपक्षपातित्वात्। अविद्या हि प्रतिबिम्बे एव असर्वज्ञत्वादिव्यवहारं जनयति, न बिम्बे, असर्वज्ञश्च जीवो, नेश्वरः। अतः प्रतिबिम्बस्यैव जीवत्वं न बिम्बस्य।

अनेकजीववादे तु अन्तःकरणानि एव उपाधिः। यद्यपि अनेक-

जीववादे अन्तःकरण-तत्संस्कारावच्छिन्नाज्ञानस्यैव उपाधित्वं विवरणकृताम् अभिमतं नान्तःकरणमात्रस्य, तथापि अन्तःकरणावच्छिन्नस्यैव संसारित्वदर्शनाद् अन्तःकरणस्यापि उपाधित्वावश्यकत्वाद् अत्र अन्तःकरणस्य उपाधित्वम् उक्तम् ।

अविद्यान्तःकरणोपाधिप्रयुक्तः हि जीवपरभेदः। एकजीववादे अविद्योपाधिकः जीवेश्वरभेदः, प्रतिबिम्बस्य जीवत्वात्, बिम्बस्य च ईश्वरत्वात् । नानाजीववादे तु अन्तःकरणतत्संस्कारावच्छिन्नाज्ञानोपाधिकः, अन्तःकरणतत्संस्कारावच्छिन्नाज्ञानप्रतिबिम्बितचैतन्यस्य जीवत्वात्, बिम्बस्य च ईश्वरत्वात् ।

प्रतिबिम्बेश्वरवादोक्ताः अविद्योपाधिप्रयुक्ताः दोषाः, अन्तःकरणोपाधिप्रयुक्ताः दोषाश्च प्रतिबिम्बे जीवे एव वर्तन्ते, न तु बिम्बे परमेश्वरे, उपाधेः प्रतिबिम्बपक्षपातित्वात् । एतन्मते च गगनसूर्य्यस्य जलादौ भासमानप्रतिबिम्बसूर्य्यस्य इव जीवपरयोः भेदः। यथा गगनसूर्य्यप्रतिबिम्बसूर्य्ययोः पारमार्थिकभेदाभावे अपि औपाधिकः कल्पितो भेदः, तथा जीवेशयोरपीति भावः।

ननु ईश्वरचैतन्यस्य बिम्बत्वे तस्य जीवाद् बहिर्भावेनैव अवस्थानं वाच्यम्, बहिर्विद्यमानस्यैव बिम्बत्वनियमात्, ग्रीवास्थमुखस्य दर्पणान्तर्गतस्यैव बिम्बत्वदर्शनात् । तथा च बिम्बचैतन्यस्य परमेश्वरस्य जीवप्रदेशे जीवोपाधौ अन्तःकरणे वा अभावात् तस्य सर्वान्तर्य्यामित्वं न स्यात् । एवम् ईश्वरस्य बिम्बत्वे सर्वोपादानत्वमपि न स्यात्, बहिर्विद्यमानस्य उपादानत्वायोगात् इति चेत् । न, साभ्रनक्षत्रस्य महाकाशस्य जलादौ प्रतिबिम्बितत्वेन महाकाशस्य बिम्बत्वे प्रतिबिम्बदेशाद् बहिःसत्त्वे चापि बिम्बभूतमहाकाशस्य विभुत्वात् जलादिप्रदेशसम्बन्धदर्शनेन प्रतिबिम्बोपाध्यन्तर्भावज्ञानेन वा, परिच्छिन्नबिम्बस्य मुखादेः प्रतिबिम्बदेशासम्बन्धे दर्पणादिदेशगतत्वाभावे अपि अपरिच्छिन्नस्य सर्वव्यापिनः ब्रह्मबिम्बस्य प्रतिबिम्बप्रदेशरूपान्तःकरणगतत्वाविरोधात् । अव्यापिबिम्बस्य प्रति-

बिम्बदेशगतत्वाङ्गीकारे यथा प्रत्यक्षादिप्रमाणविरोधः, व्यापकबिम्बस्य प्रतिबिम्बदेशगतत्वाङ्गीकारे न तथा प्रमाणविरोधः, श्रुतेरपि प्रमाणत्वात्—तथा च श्रुतिः 'य आत्मनि तिष्ठन्नात्मानमन्तरो यमयति' इति ।

अत्र, चित्प्रतिबिम्बस्य जीवत्वं न युक्तम्, चैतन्यस्य प्रतिबिम्बासम्भवात्, रूपवतः एव प्रतिबिम्बनियमात्, रूपवतः एव प्रतिबिम्बनियमात्, चैतन्यस्य च रूपाभावात् इति अवच्छेदवादिनः ।' तत्रोच्यते विवरणकारैः मैवम्, नीरूपस्यापि रूपस्य प्रतिबिम्बदर्शनात् । ननु रूपवतः एव प्रतिबिम्बः इत्ययं न नियमः, किन्तु रूपवत्द्रव्यस्यैव प्रतिबिम्बः इत्ययं नियमः । ब्रह्म च द्रव्यमपि न रूपवत् । तस्मात् तस्य प्रतिबिम्बो न युक्तः इति चेत् । उच्यते—तथाविधनियमाभ्युपगमे अपि न काचिद् हानिः, ब्रह्मणः अद्रव्यत्वात् । ननु ब्रह्मणः अद्रव्यत्वे अपि प्रतिबिम्बकल्पना नैव युक्ता 'ब्रह्म न प्रतिबिम्बते अचाक्षुषत्वात्, गन्धवद्' इत्याकारस्य ब्रह्मप्रतिबिम्बाभावानुमानस्य जागरूकत्वात् इति चेत् । न, 'एक एव हि भूतात्मा भूते भूते व्यवस्थितः । एकधा बहुधा चैव दृश्यते चलचन्द्रवत् ॥ यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन्[१०८] । 'रूपं रूपं प्रतिरूपो बभूव, तदस्य रूपं प्रतिचक्षणाय'[१०९] इत्यादिश्रुतिवाक्येन तदनुमानस्य बाधितत्वात् ।

आभासवादः

सुरेश्वराचार्य्याणां मते बिम्बप्रतिबिम्बौ नाभिन्नौ, अपि तु भिन्नौ । प्रतिबिम्बः नाम बिम्बस्य आभासः (छाया) । मुखस्य आभासः यथा मुखाद् भिन्नः, तथा ब्रह्मणः आभासः जीवोऽपि ब्रह्मणः भिन्नः । आभासश्च मिथ्या इति जीवस्य मिथ्यात्वम् । अस्मिन् मते जैवाभासस्य मिथ्यात्वेन जीवभावे बाधिते सत्येव जीवब्रह्मणोः अभेदः साध्यते, नान्यथा । प्रतिबिम्बवादे जीवब्रह्मणोः

अभेदः, भेदस्तु, मिथ्या। आभासवादे तु जीवः मिथ्या ब्रह्मैव सत्यम्।

समष्टिमायायां ब्रह्मणः आभासः ईश्वरः, व्यष्ट्यविद्यायां ब्रह्मणः आभासः जीवः। शुद्धसत्त्वगुणः एव ईश्वरस्य उपाधिः इति ईश्वरस्य सर्वज्ञत्वं सर्वशक्तित्वं च। जीवस्य उपाधिस्तु मलिनसत्त्वगुणः इति जीवस्य अल्पज्ञत्वं अल्पशक्तित्वं च।

३. जीवस्य अवस्थात्रितयम्

जीवस्य तावत् जाग्रत्, स्वप्नः, सुषुप्तिश्च इति अवस्थात्रयं विद्यते। तदुक्तं वेदान्तपरिभाषायाम्—"स च जाग्रत्स्वप्नसुषुप्तिरूपावस्थात्रयवान्" इति। उतच्च अवस्थात्रयं न जीवस्य स्वरूपलक्षणम्, अपि तु तटस्थलक्षणम् इति बोद्धव्यम्। स्वरूपलक्षणं तु चिद्रूपत्वादिकम्।

तत्र जाग्रद्दशा नाम इन्द्रियजन्यज्ञानावस्था। इन्द्रियजन्यज्ञानयोग्यः कालः जाग्रत् इत्यर्थः। तेन जाग्रति सुखाद्यनुभवकाले औदासीन्यकाले च इन्द्रियजन्यज्ञानाभावे अपि तद्योग्यत्वम् अस्तीति नाव्याप्तिः। सुषुप्तौ तु इन्द्रियव्यापाराभावात् न तत्रातिव्याप्तिः। एवं स्वप्नेऽपि इन्द्रियेषु सत्सु अपि तद्व्यापाराभावात् नातिव्याप्तिः। स्वप्ने हि अविद्यावृत्तिः एव वर्त्तते, न इन्द्रियवृत्तिः। येषां मते सुषुप्तौ एव अविद्यावृत्तिः, स्वप्ने तु अन्तःकरणवृत्तिः एव इति, तेषामपि मते मनसः अनिन्द्रियत्वं व्यवस्थापितम् इति स्वप्ने इन्द्रियाभावात् न तत्रातिव्याप्तिः। ननु, ज्ञानस्य ब्रह्मरूपत्वेन नित्यत्वात् कथं तस्य जन्यत्वम् इति चेत्? उच्यते, सत्यम्, स्वरूपज्ञानस्य अनादित्वेन जन्यत्वाभावः, अत्र तु अन्तःकरणवृत्तौ एव ज्ञानशब्दः उपचर्यते। तथा च इन्द्रियजन्यज्ञानमत्र अन्तःकरणवृत्तिः विषयदेशसंयुक्तान्तःकरणभागो वा। तथा

च इन्द्रियजन्यस्य अन्तःकरणवृत्तिरूपज्ञानस्य सत्त्वात् नानुपपन्नं लक्षणम्। स्वप्नसुषुप्त्योः तु अविद्यावृत्तिरेव। तस्याः च अविद्यावृत्तेः न कदापि इन्द्रियजन्यत्वम् इति न तत्र तत्र अतिव्याप्तिः।

इन्द्रियाजन्यविषयगोचरापरोक्षान्तःकरणवृत्त्यवस्था स्वप्नावस्था। अत्र केषांचित् मते इन्द्रियाजन्या = इन्द्रियव्यापारोपरमकालीना, विषयगोचरा = अधिष्ठानाकारा, अपरोक्षान्तःकरणवृत्तिः = नित्यापरोक्षान्तःकरणावस्थाविशेषः स्वप्नावस्था इत्यर्थः। अत्र सुखादिविषयकापरोक्षान्तःकरणवृत्तिः जाग्रद्दशायामपि विद्यते इति अतिव्याप्तिवारणार्थम् इन्द्रियाजन्या इति। जाग्रद्दशायामपि यद्यपि अधिष्ठानगोचराऽपरोक्षान्तःकरणवृत्तिः वर्त्तते, तथापि न तदा इन्द्रियव्यापारोपरमः इति न तत्रातिव्याप्तिः। अत्र अन्तःकरणपदं अविद्यावृत्तिरूपसुषुप्तौ अतिव्याप्तिवारणार्थम्। तत्रापि यद्यपि इन्द्रियव्यापारोपरमः वर्त्तते, तथापि सुषुप्तेः अविद्यावृत्तिरूपत्वात् अन्तःकरणवृत्तिरूपत्वाभावात् च न तत्रातिव्याप्तिः इति। एतत् व्याख्यानं मन्दम् इति एके, स्वप्नज्ञानस्य अधिष्ठानाकारत्वाभावात्, स्वाप्नवृत्तेः अन्तःकरणवृत्तित्वासम्भवात्, अन्तःकरणावस्थाविशेषस्य नित्यत्वायोगात् सुखादिविषयकान्तःकरणवृत्तेः अनभ्युपगमात्, तेषाम् अविद्यावृत्तिविषयकत्वात् इति एतेषामाशयः। तेषां मते इन्द्रियाजन्या इत्यनेन इन्द्रियजन्य व्यापाराभावयोग्यकालीना इति अन्तःकरणवृत्त्यवस्था इत्यनेन च अन्तःकरणगतवासनानिमित्तवृत्त्यवस्था इत्यर्थः ग्रहणीयः। अन्तःकरणस्य वृत्तिः इति यथाश्रुतार्थस्तु नात्र ग्रहणीयः, स्वप्नसृष्टविषयेषु अविद्यावृत्तेः अभ्युपगमात्, जाग्रद्भोगप्रदकर्माभावात् इन्द्रियादिव्यापारस्य अभावेन तत्पूर्विकायाः अन्तःकरणवृत्तेः असम्भवात्।

तत्र जाग्रदवस्थाव्यावृत्त्यर्थम् इन्द्रियजन्येति। विषयगोचरापरोक्षान्तःकरणवृत्त्यवस्थामात्रस्य लक्षणत्वे शुक्तौ 'इदं रजतम्' इत्येवम् अपरोक्षभ्रमकालीनजाग्रदवस्थायाम् अतिव्याप्तिः स्यात, तस्याः

विषयगोचरान्तःकरणवासनानिमित्तवृत्त्यवस्थारूपत्वात् । इन्द्रियजन्येत्युक्तौ तु नातिव्याप्तिः, तादृशजाग्रदवस्थायाः विषयगोचरान्तःकरणवासनानिमित्तवृत्त्यवस्थारूपत्वेऽपि इन्द्रियजन्यव्यापारयोग्यकालीनत्वेन इन्द्रियजन्यव्यापाराभावयोग्यकालीनत्वाभावात् ।

अविद्यावृत्तिमत्यां सुषुप्तौ अतिव्याप्तिवारणाय अन्तःकरणेति । तथाहि इन्द्रियाजन्यविषयगोचरापरोक्षवृत्त्यवस्थात्वम् इति स्वप्नलक्षणे कृते सुषुप्त्यवस्थायाम् अतिव्याप्तिः स्यात्, सुषुप्तेः अपि इन्द्रियाजन्यविषयगोचरापरोक्षवृत्त्यवस्थारूपत्वात् । अन्तःकरणस्य वृत्तिविशेषणत्वे तु नातिव्याप्तिः, सुषुप्तेः अन्तःकरणगतवासनानिमित्तवृत्त्यवस्थारूपत्वाभावात्, सुषुप्तिं प्रति अन्तःकरणवासनायाः अहेतुत्वात्, तदानीम् अन्तःकरणस्य विलयात् । स्वप्ने प्रतीयमानः रथादिप्रपञ्चः अस्तीत्येव प्रतीयते इति सद्रूपेण प्रकाशमानं स्वयंप्रकाशं चैतन्यम् एव स्वाप्नप्रपञ्चस्य अधिष्ठानम् । तत्र देशविशेषोऽपि प्रातिभासिकः, रथादिकम् रथादौ इन्द्रियग्राह्यत्वमपि प्रातिभासिकम् इति अवगमन्तव्यम् ।

सुषुप्तिः नाम अविद्यागोचराविद्यावृत्त्यवस्था । अविद्यागोचरा = अविद्याविषयिणी संसर्गविषयिणी अविद्यावृत्तिः = आविद्यकवृत्तिः एव सुषुप्तिः इत्यर्थः । अविद्यावृत्त्यवस्था सुषुप्तिः इत्युक्ते स्वप्नजागरयोः अतिव्याप्तिः, जाग्रति शुक्तिरजतादिगोचरायाः स्वप्ने च स्वाप्निकगजादिगोचरायाः अविद्यावृत्तेः अभ्युपगमात् । अतः अविद्यागोचरेत्युक्तम् । तथा च स्वप्नजागरयोः अविद्यावृत्तौ नातिव्याप्तिः, तस्याः वृत्तेः अविद्यातिरिक्तविषयत्वेन अविद्याविषयत्वाभावात् । स्वप्नजागरयोः अविद्याकारवृत्तेः अविद्यागोचरवृत्तेः अन्तःकरणवृत्तित्वात् = अन्तःकरणविषयकवृत्तित्वात् अहङ्कारादिविशिष्टविषयकवृत्तित्वात् न तत्रातिव्याप्तिः । स्वाप्नप्रपञ्चस्य अन्तःकरणवृत्तित्वं स्वीकुर्वतां मते स्वप्नजागरयोः अविद्यागोचरा वृत्तिः अन्तःकरणवृत्तिः एव इति तत्र तत्र नातिव्याप्तिः । अविद्यागोचरेति

सुखसाक्षिणोः उपलक्षणम्; सुषुप्तौ सुखसाक्ष्यज्ञानगोचरायाः अविद्या-वृत्तेः अभ्युपगमात्। यद्यपि साक्षिभास्यत्वात् अविद्यायाः न वृत्त्यपेक्षा, तथापि नहि वृत्तिं विना साक्षिभास्यत्वम्, किन्तु प्रमाण-व्यापारापेक्षां विना इति वृत्त्यङ्गीकारे अपि न क्षतिः। तदुक्तं सिद्धान्तबिन्दौ—साक्ष्याकारं सुखाकारम् अवस्थाज्ञानाकारं च अविद्यायाः वृत्तित्रयम् अभ्युपेयते इति। इयं च सुषुप्तिः अज्ञानकार्य-लिङ्गशरीरप्रविलयरूपा इति तस्याः प्रलयत्वम्। 'सुषुप्तिकाले सकले विलीने' [111] इत्यादिश्रुतौ सुषुप्तौ सकलप्रपञ्चलयश्रवणात्। अयं च प्रलयः नित्यं संघटते इति सुषुप्तिः नित्यप्रलयः। सुखदुःखस्मरणादि-कारणानां धर्माधर्मपूर्वसंस्काराणां च तदा सूक्ष्मरूपेण कारणात्मना अविद्यात्मना वा अवस्थानम् इति तेषां सावशेषो लयः न निरवशेषः। तेन सुप्तोत्थितस्य न सुख-दुःखाद्यनुपपत्तिः, न वा स्मरणानुपपत्तिः, न च सुषुप्तौ अन्तःकरणस्य लयाभ्युपगमे अन्तःकरणाधीन-श्वासादि-क्रियानुपपत्तिः, वस्तुतः सुप्तस्य श्वासाद्युपलब्ध्यभावेऽपि तदुपलब्धेः पुरुषान्तरविभ्रममात्रसिद्धत्वात्। न चैवं सुषुप्तस्य मृतादविशेषः, सुषुप्तस्य हि लिङ्गशरीरं संस्कारात्मना इहलोके एव वर्तते, मृतस्य तु लोकान्तरे इति वैलक्षण्यात्। यद्वा अन्तःकरणस्य द्वे शक्ती ज्ञानशक्तिः क्रियाशक्तिश्चेति। तत्र ज्ञानशक्तिविशिष्टान्तःकरणस्य सुषुप्तौ विनाशो न क्रियाशक्तिविशिष्टस्य इति प्राणाद्यवस्थानम् अविरुद्धम्। 'यदा सुप्तः स्वप्नं न कञ्चन पश्यति' [112] 'सता सोम्य तदा सम्पन्नो भवति, स्वमपीतो भवति' [113] इत्यादिश्रुतिः सुषुप्तौ मानम्।

अस्यां च सुषुप्तौ अज्ञानकार्यप्रविलयात् सत्स्वरूपम् आपद्यते जनः। तथा च छान्दोग्योपनिषदि उद्दालकः आरुणिः पुत्रं श्वेतकेतुं सुषुप्तिं ज्ञापयति—'यत्रैतत् पुरुषः स्वपिति नाम सता सोम्य तदा सम्पन्नो भवति स्वम् अपीतो भवति, तस्मात् एनं स्वपितीत्याचक्षते स्वं हि अपीतो भवति' [116] इति। पुरुषस्य स्वप्स्यतः प्रसिद्धं हि लोके

स्वपितीति, गौणञ्च इदं नाम। यदा स्वपितीत्युच्यते पुरुषः तस्मिन्-काले सता सच्छब्दवाच्यया वा देवतया सम्पन्नो भवति सङ्गतः एकीभूतः भवति। तदा जीवः मनसि प्रविष्टं मन आदि संसर्गकृतं जीवरूपं परित्यज्य स्वं सद्रूपं यत् परमार्थसत्यं तत् अपिगतो भवति। तस्मात् स्वपितीति ब्रुवन्ति लौकिकाः, यतः स्वम् आत्मानं हि अपीतो भवति। आदर्शापनयने पुरुषप्रतिबिम्बः आदर्शगतो यथा स्वमेव पुरुषम् अपीतो भवति, एवं सुषुप्तौ मन आद्युपरमे नामरूप-व्याकरणाय चैतन्य-प्रतिबिम्बरूपेण जीवेनात्मना मनसि प्रविष्टा परादेवता स्वमेव आत्मानं प्रतिपद्यते, जीवरूपतां मन आख्यां हित्वा। नहि अन्यत्र सुषुप्तात् स्वमपीति जीवस्य इच्छन्ति ब्रह्मविदः। यथा शकुनिः सूत्रेण प्रबद्धः दिशं दिशं पतित्वा अन्यत्र आश्रयम् अलब्ध्वा बन्धनमेव उपाश्रयते, एवं मन आख्योपाधिः जीवः सुख-दुःखादिलक्षणां दिशं दिशं जाग्रत्स्वप्नयोः सुखदुःखादिलक्षणान् विषयान् अनुभूय, सुषुप्तौ सदाख्यं स्वात्मनः विश्रमणस्थानं लब्ध्वा परामेव देवताम् उपाश्रयते। तस्मात् स्वपिति इत्यस्य स्वम् अपीतो भवति इत्येव पारमार्थिकार्थः। यद्यपि स्वप् धातोः लटि स्वपिति इति रूपं प्रसिद्धम् तथापि अत्र मन्त्रद्रष्ट्रा अपिपूर्वकात् 'इ'धातोः 'क्त' प्रत्ययेन अपीत इति रूपम् परिकल्प्य स्वम् अपीत भवतीति व्याख्यायते इति बोध्यम्।

४. एकजीववादः[११५]

'ब्रह्मैव स्वाविद्यया संसरति,स्वविद्यया मुच्यते'[११६] इति अविकृत-स्यैव ब्रह्मणः आविद्यकः जीवभावः इति वदतां मते ब्रह्मण एकत्वात् जीवस्यापि एकत्वम् 'एको वै द्वितीयो नास्ति'। एतेषाम् एकजीव-वादिनां मते एकमात्रजीवेन एकमात्रं शरीरं सजीवं, अन्यानि शरीराणि तु निर्जीवानि। यद्यपि अस्मिन् मम देहे यथा प्राण-स्पन्दनं सजीवत्वं च अनुभूयते, अन्येषु देहेषु अपि तथैव प्राणस्पन्द-

नादिकम् अनुभूयते, तथापि तत् सर्वं स्वाप्नविषयवत् असत्यम् अलीकम्। स्वप्ने दृश्यमानाः सजीवाः सक्रियाश्च मनुष्यमूर्त्यादयः यथा द्रष्टुः मनःकल्पिताः, तथैव जाग्रदवस्थायां दृश्यमानः अयं जगत्प्रपञ्चः, तदन्तर्गताश्च जीवाः सर्वे द्रष्टुः अज्ञानकल्पिताः। यावद् अज्ञानं तिष्ठति तावदेव अज्ञानं प्रसूतम् इदं सर्वं सत्यत्वेन अनुभूयते। ज्ञानेन अज्ञाने विनष्टे तु इदं सर्वं तिरोभवति। स एकः जीवः कः इति प्रश्ने उच्यते रामयतिना—यः द्रष्टा स एव जीवः, तस्माद् अन्यत् सर्वम् अलीकम्[117] इति। अहं द्रष्टा इति चेत्, अहमेव जीवः, युष्मदादिकं सर्वं मिथ्या। त्वं द्रष्टा इति चेत्, त्वमेव जीवः, अस्मदादिकं सर्वं मिथ्या। अविद्यानाशे तु द्रष्टृभिन्नानां सर्वेषां मिथ्यात्वेन द्रष्टृत्वमपि तिरोभवति। अस्मिन् मते जीवस्य एकत्वात् कश्चन जीवः मुक्तः कश्चन जीवः बद्ध इति बद्धमुक्त-व्यवस्था अपि मिथ्या। तथैव अयं गुरुः अयं शिष्यः, अयम् उपास्यः अयम् उपासकः, ईदृशः ईश्वरः, ईदृशः जीवः इत्यादयः द्वैतमूलकाः सर्वे विभावाः अपि कल्पनाप्रसूताः। ननु मम द्रष्टृमात्रस्य जीवत्वे द्वितीयजीवाभावे अस्मै जीवाय कः ब्रह्मविद्याम् उपदिशति। द्वितीयस्य उपास्यस्य अभावाच्च कस्तावत् उपास्येत इति चेत्। उच्यते—स्वप्ने यथा मनःकल्पितः गुरुशिष्यभावः दृश्यते यथा वा कश्चन मनःकल्पितः देवताविशेषः उपास्यते तथैव जागरणेऽपि एते सर्वे मनसा कल्प्यन्ते इति, स्वाप्नविषयवत् जाग्रद्विषयाणामपि अविद्याकल्पितत्वात्। इदं मतमेव एकशरीरवादः एकजीववादः वा इति कथ्यते।

केषाञ्चित् एकजीववादिनां मते केवलम् हिरण्यगर्भ एव मुख्यः जीवः, अन्ये च सर्वे जीवाः हिरण्यगर्भस्य प्रतिबिम्बभूताः, हिरण्य-गर्भश्च ब्रह्मणः प्रतिबिम्बस्वरूपः इति। हिरण्यगर्भस्य प्रतिबिम्ब-भूताः अन्ये जीवाश्च वस्तुतः न मुख्याः जीवाः, अपि तु जीवा-भासाः। इदं मतम् 'सविशेषानेकशरीरवादः' इति 'मुख्यैकजीववादः'

इति वा कथ्यते ।

केषाञ्चित् मते हिरण्यगर्भोऽपि वस्तुतः न एकः, अपितु कल्पभेदेन विभिन्नः। तथा च कीदृशः हिरण्यगर्भः मुख्यजीवः, कश्च अमुख्यजीवः इति निर्णेतुं न शक्यते। तथा च एतेषां मते एक एव जीवः अविशेषेण सर्वेषु शरीरेषु अधितिष्ठति, स च जीवः ईदृशः इति निर्देष्टुं न शक्यते। एवं च इदं मतम् 'अविशेषैकजीववादः' इत्युच्यते।

ननु एकस्यैव जीवस्य सर्वशरीरेषु वर्तमानत्वे कथम् शरीरविशेषस्य सुखदुःखादिकं शरीरान्तरे नोत्पद्यते इति चेत्। उच्यते—देहभेदस्यैव तत्र देहान्तरे सुखदुःखाद्युत्पत्तौ प्रतिबन्धकत्वात्। तथा च यथा अनेकजीववादिनां मते जीवविशेषस्य जन्मान्तरीयसुखदुःखादिस्मृतौ अधुनातनदेहस्य प्रतिबन्धकत्वं स्वीक्रियते, तथैव एकजीववादिनां मतेऽपि देहभेदस्य प्रतिबन्धकत्वात् देहविशेषस्य सुखदुःखादिकं देहान्तरे नोत्पद्यते इति बोद्धव्यम्।

एकजीववादिनां मते द्रष्टुः जीवस्य अज्ञाने विनष्टे न कस्यापि अज्ञानं स्यात् इति एकस्य मुक्तौ सर्वेषां मुक्तिः भवेत्। इदम् एकमुक्तौ सर्वमुक्तिरिति मतम् अनेकजीववादिभिः बहुधा प्रत्याक्षिप्तम्।

सर्वज्ञात्ममुनिभिस्तु एकजीववादम् अनुसृत्यापि बद्धमुक्तव्यवस्था उपपादिता। तेषां मते अविद्यायां प्रतिबिम्बितं चैतन्यम् एव जीवः। अविद्यायाश्च एकत्वात् तस्यां प्रतिबिम्बितः जीवोऽपि एक एव। एकस्याम् एव अविद्यायां प्रतिबिम्बस्य नानात्वासम्भवात् जीवस्य नानात्वमपि असम्भावि। अन्तःकरणमेव जीवस्य अभिव्यक्तिस्थानम्। तच्चान्तःकरणम् अविद्यायां कल्पितम्, देहभेदेन च विभिन्नम्। अविद्याकल्पितैः अन्तःकरणैः च अविद्याप्रतिबिम्बितजीवानां विभेदः स्वीकरणीयः। यस्मिन् च अन्तःकरणे ब्रह्मसाक्षात्कारः उदेति तदन्तःकरणपरिच्छिन्नः प्रतिबिम्ब एव मुक्तो भवति, इतरान्तःकरणपरिच्छिन्नाः प्रतिबिम्बाश्च अमुक्ताः

तिष्ठन्ति। तथा च एकजीववादेऽपि बद्धमुक्तव्यवस्था नानुपपन्ना इत्यर्थः। मधुसूदनसरस्वतीनां मते च एकजीववादेऽपि बद्धमुक्तव्यवस्था उपपद्यते।

तथा च एकमेव अद्वितीयं ब्रह्म अनाद्यविद्यावशात् जीवभावं प्राप्नोति, विद्योदये च विमुक्तो भवतीति एकजीववादस्य सारः।

९. अनेकजीववादः[११८]

एकजीववादे कश्चन जीवः अज्ञानाबद्धः कश्चन वा मुक्त इति बद्धमुक्तव्यवस्थायाः अनुपपत्तिः अपरिहरणीया इति बद्धमुक्तव्यवस्थायाः उपपादनार्थं अनेकजीववादः ग्रहणीयः इति अनेकजीववादिनः। न च बद्धमुक्तव्यवस्था मिथ्येति वक्तुमुचितं शास्त्रसिद्धत्वात्, भाष्यकारैश्च समर्थितत्वात्। श्रुतिवाक्येषु स्मृतिपुराणादिषु हि ब्रह्मज्ञजीवस्य मुक्तिः, अज्ञस्य च बन्धः इति पुनः पुनः उद्घोषितम्। 'प्रतिषेधादिति चेन्न शरीरात्'[११९]—इति ब्रह्मसूत्रे च 'ब्रह्मैव सन् ब्रह्माप्येति'[१२०] इति ब्रह्मदर्शिनः ब्रह्मभावप्राप्तिः, अज्ञानाबद्धस्य संसारिणश्च उत्क्रान्तिं परलोकगतिं च दर्शयता भाष्यकारेण जीवानां बद्धमुक्तव्यवस्था समर्थिता। सर्वज्ञात्ममुनिरीत्या अविद्यायां कल्पितानाम् अन्तःकरणानां देहभेदेन भेदात् यदि बद्धमुक्तव्यवस्था उपपद्यते, तर्हि अन्तःकरणम् एव उपाधित्वेन गृहीत्वा अनेकजीववादः एव कथं न गृह्यते। जीवानां परस्परभेदस्य च प्रत्यक्षसिद्धत्वात् जीवभेदप्रतिपादनार्थं अन्तःकरणम् एव उपाधित्वेन ग्रहणीयं, नाविद्या इति अनेकजीववादिनां मतम्।

ननु अन्तःकरणस्य अविद्यापरिणामत्वात् अज्ञानस्य च एकत्वात् एकेन अज्ञाने विनष्टे सर्वविधाज्ञानपरिणामानाम् अपि नाशेन अन्तःकरणरूपोपाधीनाम् अपि नाशः स्यात्। जीवभावस्य च अविद्याकल्पितत्वेन एकेन मुक्तजीवेन अज्ञाने विध्वस्ते तज्जीवगतान्तः-

करणस्य इव सर्वेषामपि अन्तःकरणानां नाशात् सर्वेषामपि मुक्तिः स्यात्। एवं च बद्धमुक्तव्यवस्था नोपपद्यते इति चेत्। उच्यते—अज्ञानस्य एकत्वे अपि तस्य सांशत्वं स्वीकरणीयम्। अज्ञानांशानां ह्रासवृद्ध्यनुसारेण च अज्ञानस्यापि ह्रासवृद्ध्यादिकम् सम्भवतीति शास्त्रसम्मता जीवन्मुक्तिरपि उपपद्यते। जीवन्मुक्तौ तावत् अज्ञान-लेशस्य अस्तित्वं स्वीक्रियते, अज्ञानस्य सांशत्वे एव तत् सम्भवति। अज्ञानस्य सांशत्वेन च यस्मिन् अन्तःकरणे ब्रह्मज्ञानम् उदेति तस्मिन् अन्तःकरणे अज्ञाननाशात् तदन्तःकरणोपाधिपरिच्छिन्नस्य मुक्ति-र्भवति। यस्मिन् चान्तःकरणे अज्ञानं न विनष्टं तदन्तःकरणोपाध्य-वच्छिन्नस्य जीवस्य तु मुक्तिर्न भवतीति बन्धमोक्षव्यवस्था उपपद्यते। केषञ्चित् मते प्रतिजीवम् अज्ञानभेदात् एकस्य अज्ञानस्य नाशेऽपि अज्ञानान्तरस्य सत्त्वात् बन्धमोक्षयोः नानुपपत्तिः।

उद्धृति सूचिका

१. वे. सा. १४५–६३
२. तै. उ. २. १. १
३. बृ. उ. १. ४. ८
४. छा. उ. ५. १. ७
५. तै. उ. २. २. १
६. तै. उ. २. ३. १
७. विव. २६९
८. तै. उ. २. ४. १
९. छा. उ. ३. १९. १
१०. छा. उ. ६. २. १
११. वा. बो. वे. सा. १४५
१२. तै. उ. २. ५. १
१३. श. ब्रा. १०. ३. ३. ६
१४. मु. उ. ५. ४
१५. बृ. उ. ३. ८. ८
१६. क. उ. १. ३. १५
१७. श्वे. उ. ६. ११
१८. श्वे. उ. ६. ११
१९. ब्र. सू. श. भा. १. ४. १०
२०. तै. उ. २. ५. १
२१. बृ. उ. ४. ३. १५
२२. ब्र. सू. श. भा. १. १. ४
२३. तै. उ. २. ६
२४. बृ. उ. २. १. २०

२५. श्वे. उ. ६. १३
२६. बृ. उ. ४. ४. २५
२७. क. उ. १. २. १८
२८. क. उ. १. २. १८
२९. बृ. उ. ४. ३. ७; ४. ४. २२
३०. बृ. उ. ४. १५. १३
३१. ब्र. सू. २. २. १८
३२. बृ. उ. ३. ९. २८
३३. तै. उ. २. १. १
३४. बृ. उ. ४. ३. ९
३५. श्वे. उ. ५. ८
३६. श्वे. उ. ६. ८
३७. द्र. चि. सु. ३८–४६
३८. चि. सु. ३९
३९. चि. सु. ३९
४०. चि. सु. ३९
४१. भा. ५
४२. बृ. उ. ३. ९. २८
४३. बृ. उ. ४. १५. १३
४४. क. उ. १. २. १८
४५. क. उ. १. २. १८
४६. तै. उ. २. ६
४७. छा. उ. ६. ३. २
४८. छा. उ. ६. ८. ७
४९. बृ. उ. १. ४. १०
५०. तै. उ. २. १. १
५१. बृ. उ. ४. ३. ९
५२. चि. सु. ३८
५३. बृ. उ. ३. ४. १
५४. द्र. भाम. २. २. ३४
अध्या. भा. भाम. १४–१५
५५. ब्र. सि. ८५१–४
ब्र. सू. श. भा २. ३. १९–३२
५६. मु. उ. ३. १. ९
५७. श्वे. उ. ५. ६
५८. बृ. उ. ६. ४. २
५९. कौ. उ. १. २
६०. बृ. उ. ६. ४. ६
६१. ब्र. सू. २. ३. १९
६२. ब्र. सि. ८५१
६३. गोविन्द भा. २. ३. १९
६४. ब्र. सू. २. ३. २३
६५. ब्र. सि. ८५३
६६. बृ. उ. ३. ४. २०
६७. तै. उ. २. १. १
६८. भा. का. ३. ३
६९. मु. उ. १. १. ६
७०. छा. उ. ६. ३. २
७१. श्वे. उ. ६. ८
७२. सि. ले. १. ६. ३
७३. ब्र. सू. २. ३. ४३
७४. गी. १५. ७
७५. बृ. २. ४. ५
७६. छा. उ. ८. ७. १

७७. ब्र. सू. ३. २. ११
७८. ब्र. सू. ३. २. १८
७९. ब्र. सू. ३. २. १९
८०. ब्र. सू. २. ३. ५०
८१. भाम. अ. भा. पृ. ८
८२. भाम. २. २. १०
८३. भाम. १. ४. २२
८४. भाम. २. ३. ४३
८५. भाम. ३. २. ९
८६. भाम. २. १. २१
८७. भाम. २. ३. १७
८८. भाम. अ. भा. पृ. ३९
८९. ब्र. सू. १. ४. २२
९०. भाम. १. ४. २२
९१. ब्र. सू. २. ३. ४३
९२. भाम. २. ३. ४३
९३. सि. ले. १. ६. २
पृ. १३१–१६०
९४. ब्र. सू. २. ३. ४३
९५. ब्र. सू. २. ३. ५०
९६. ऋ. वे. ६. ४७. १८
बृ. उ. २. ५. १९
९७. भाष्यरत्नप्रभा. २. ३. ५०
९८. प. पा. १०८
९९. प. पा. १११
१००. विव. ७६०
१०१. बृ. उ. २. ५. १९
१०२. ब्र. सू. ३. २. १८
१०३. सि. ले. १. ६. १
१०४. सि. ले. १. ६. १. १
१०५. सि. ले. १. ६. २
१०६. विव. ७६०
१०७. ब्र. वि. उ. १२
१०८. ब्र. वि. उ. १२
१०९. ऋ. वे. ६. ४७. १८
११०. वे. प. २७१–२, २८०–८१
१११. के. उ. १२
११२. कौ. उ. ३. ३.
११३. छा. उ. ६. ८. १
११४. छा. उ. ६. ८. १
११५. सि. ले. १. ७. १
११६. चि. सु. ५७२
११७. द्र. वि. म. वे. सा. ३६
११८. सि. ले. १. ७. २
११९. ब्र. सू. ४. २. १२
१२०. बृ. उ. ४. ४. ६

पञ्चमः परिच्छेदः

१. जगतः स्वरूपम्

शङ्कराचार्य्याणां मते इदं जगत् ब्रह्मणः विभावमात्रम्। ब्रह्म एव जगद्रूपेण प्रकाशते। ब्रह्मणः एव जगतः उत्पत्तिः, ब्रह्मणा जगतः स्थितिः, ब्रह्मण्येव जगतः लयोऽपि भवति। इदं च जगत् देशकालाभ्यां परिच्छिन्नं, कार्य्यकरणशृङ्खलेन च नियन्त्रितम्। यच्च परिच्छिन्नं तन्मिथ्या इति इदं जगदपि परिच्छिन्नत्वात् मिथ्येव। जगतः मिथ्यात्वं नाम मायामयत्वं, नतु मृगतृष्णिकायाः इव अलीकत्वम्। अलीकं वस्तु न कदापि व्यवहारयोग्यतां प्राप्नोति, जगतस्तु व्यावहारिकसत्यत्वम् आचार्येण विज्ञानवाद-निराकरणप्रसङ्गे अन्यत्र च बहुधा उपस्थापितम्। व्यावहारिक-सत्यत्वं नाम प्राक्ब्रह्मविज्ञानोत्पत्तेः सत्यत्वेन अव्याहतव्यवहार-योग्यत्वम्। अयं च जगत्प्रपञ्चः यावत् मनसः अवस्थानं यावच्च इन्द्रियैः स्वस्वविषयानुभवः तावदेव लौकिकप्रत्यक्षादि-प्रमाणैः उपलभ्यते। तदुक्तम्—'उपलभ्यते हि प्रतिप्रत्ययं बाह्योऽर्थः स्तम्भः कुड्यां घटः पटः इति। न चोपलभ्यमानस्याभावो भवितुम् अर्हति'[2] इति। ब्रह्मविज्ञानोदयानन्तरं च मनसः लये सति जगत्-प्रपञ्चोऽपि लीयते इति तस्य व्यावहारिकसत्यत्वं स्वीक्रियते। तदुक्तम् माण्डूक्यकारिकायाम्—'मनसो ह्यमनीभावे द्वैतं नैवोपलभ्यते'[3] इति।

इदं हि जगत् ब्रह्मकार्य्यम्। अद्वैतिनां मते कार्य्यं न कारणात् भिन्नम्। कारणसत्तानिबन्धना एव कार्य्यसत्ता। कारणस्यैव स्वतन्त्र-सत्ता अस्ति, कार्य्यस्य स्वतन्त्रसत्ता तु सर्वथा निषिद्धा। इदं च

जगत् ब्रह्मकार्य्यम् इति कारणभूत—ब्रह्मसत्तानिबन्धना एव अस्य सत्ता। तदुक्तम्—'भोग्यभोक्तृप्रपञ्चजातस्य ब्रह्मव्यतिरेकेणाभाव इति द्रष्टव्यम्'[6] इति। न हि मृत्तिकां बिना घटः स्थातुं शक्नोति। न हि मृदमनाश्रित्य घटादेः सत्त्वं स्थितिर्वा[5]। मृत्तिका एव रूपान्तरेण युक्ता सती घटो भवति। एवं 'सदात्मनैव सत्यं विकार-जातं स्वतस्तु अनृतमेव सतोऽन्यत्वे अनृतत्वम्'[6]। एवं च कारण-रूपब्रह्मव्यतिरेकेण अस्य जगतः अनृतत्वम्। अधिष्ठानरूपे ब्रह्मणि विज्ञाते तु सर्वत्र ब्रह्मैव अनुभूयते, जगतः स्वतन्त्रम् अस्तित्वं तु तदा नैव उपलभ्यते, इति ब्रह्मबोधेन जगतः बाधितत्वात् जगतः अनृतत्वम्। न चैवं इदं जगत् आकाशकुसुमवत् अलीकम् प्राक्ब्रह्म-प्रबोधात् सर्वविधव्यवहारोपपत्तेः।

न हि बाह्यार्थस्य अभावः। तथाहि विज्ञानवादिनां मते विज्ञान-मात्रं तत्त्वम्। इदं च सर्वं जगत् स्वप्नादिवत् द्रष्टव्यम्। यथा हि स्वप्ने बाह्यार्थान् विनैव केवलया बुद्ध्या ग्राह्यग्राहकव्यवहारः भवति, तथैव जाग्रद्व्यवहारोऽपि विज्ञानस्यैव लीलामात्रम्। वासना-वैचित्र्याच्च बाह्यार्थे प्रत्ययवैचित्र्यम् अपि उपपद्यते इति तेषां मतम्। वेदान्तिनस्तु न बाह्यार्थान् अपलपन्ति। तथा च सूत्रम्—'नाभावः उपलब्धेः'[7] इति। तत्र भाष्यकारः—'न खलु अभावो बाह्यार्थस्य अर्थस्य अध्यवसातुं शक्यते। कस्मात्? उपलब्धेः। उपलभ्यते हि प्रतिप्रत्ययं बाह्योऽर्थः—स्तम्भः कुड्यं घटः पटः इति। न च उपलभ्यमानस्यैव अभावो भवितुम् अर्हति इति। अथ उच्यते बुद्धिरेव बाह्यघटादिवद् अवभासते। यथा चाहुः—यदन्तर्ज्ञेयरूपं 'तद्बहिर्वदवभासते' इति। एवं तर्हि तदुक्तिरेव 'बाह्यार्थसद्भावे प्रमाणमिति ब्रूमः। नहि क्वचिदपि बाह्यार्थाभावे 'बहिर्वत्' इत्युपमानोक्तिः सङ्गच्छते। स्वप्नदृष्टान्तश्च विषमः। प्रबोधदशायां स्वप्नस्य बाध्यमानत्वात् जाग्रद्व्यवहारस्य तु क्वचिदपि बाधाभावात्।

तथा च इदं जगत् न ब्रह्मवत् सत्, नापि आकाशकुसुमवत् असत्। न च सदसत्, उभयोः विरोधात्। यच्च न सत्, नाप्यसत्, नापि सदसत् तद् अनिर्वचनीयम्। इदं च नामरूपात्मकं जगत् सत्त्वेन असत्त्वेन सदसत्त्वे वा व्यपदेष्टुं न शक्यते इति तस्य अनिर्वचनीयत्वम्। तथा च भाष्यकाराः तत्त्वान्यत्वाभ्यामनिर्वचनीये नामरूपे'[८] इति आहुः। एतदनिर्वचनीयत्वमेव मिथ्यात्वम्।

२. परिणाम-विवर्तयोः भेदः[१]

स्वरूपेण अवस्थितस्य वस्तुनः अन्यथाभावः द्विधा भवितुम् अर्हति—परिणामभावः विवर्तभावश्च। तत्र सतत्त्वतोऽन्यथा प्रथा परिणामः। वस्तुतः यथार्थतः स्वरूपं परित्यज्य वस्त्वन्तरापत्तिः परिणामः। यदा किंचन कारणभूतं वस्तु वास्तविकतया कार्य्यरूपवस्त्वन्तरत्वं प्राप्नोति, तदा प्राथमिकस्य वस्तुनः द्वितीयवस्तुरूपेण परिणाम इत्युच्यते। यथा दुग्धं स्वरूपं परित्यज्य दध्याकारेण परिणमते, मृत्तिका च वास्तविकतया घटरूपेण परिणमते। परिणामे च कार्य्यकारणयोः तुल्या एव सत्ता भवति। तदुक्तं—'परिणामो नामोपादानसमसत्ताककार्य्यापत्तिः' इति। तथाहि—सत्ता त्रिविधा—पारमार्थिकी, व्यावहारिकी, प्रातिभासिकी चेति। तत्र आद्या त्रैकालिकनिषेधाप्रतियोगित्वरूपा ब्रह्मणः, द्वितीया ब्रह्मज्ञानेतरज्ञानाबाध्यत्वरूपा आकाशादेः प्रपञ्चस्य, तृतीया ब्रह्मज्ञानेतरज्ञानबाध्यत्वरूपा शुक्तिरजतादेः। उपादानसमा सत्ता यस्य उपादेयस्य कार्यस्य तत् कार्य्यम् उपादानसमसत्ताकम्। तथा च स्वोपादानसमसत्ताकत्वे सति कार्य्यत्वं परिणामत्वम् इति परिणामलक्षणं पर्य्यवस्यति। तथा च मृत्तिकायाः घटस्य च एकैव व्यावहारिकी सत्तेति घटरूपस्य मृत्तिकाकार्य्यस्य मृत्परिणामत्वम्। न च शुक्तिरजते अतिव्याप्तिः, तस्य कार्य्यत्वे अपि समसत्ताकत्वाभावात्। ननु, प्रातिभासिकं

रजतम् अविद्यायाः परिणामः इत्युच्यते, तत्र लक्षणमिदं नानुगतम्, शुक्तिरूप्यादेः उपादानस्य मूलाज्ञानस्य व्यावहारिकत्वात्, उपादेयस्य रजतादिकस्य तु प्रातिभासिकत्वात् इति चेत्। न, पारमार्थिकसत्त्वं व्यावहारिकविषयत्वं चेति सत्त्वद्वैविध्यम् आश्रित्य समसत्ताकत्वोपपत्तेः।

अतत्त्वतोऽन्यथाप्रथा विवर्तः। वस्तुनः स्वस्वरूपापरित्यागेन स्वरूपान्तरेण मिथ्याप्रतीतिः विवर्तः इत्यर्थः। यदा किंचन कारणभूतं वस्तु अवास्तविकतया कार्य्यरूपवस्त्वन्तरत्वं प्राप्नोति, तदा प्राथमिकवस्तुनः द्वितीयवस्तुरूपेण विवर्तः इत्युच्यते। यथा रज्जुः स्वस्वरूपापरित्यागेन सर्पाकारेण मिथ्या प्रतिभासते। एवं शुक्तेः मिथ्या रजतरूपेण भानं विवर्तः। विवर्ते च कार्य्यकारणयोः विषमा सत्ता भवति। तदुक्तं 'विवर्तो नामोपादानविषमसत्ताककार्य्यापत्तिः' इति। तथा च स्वोपादानसत्ता-विषमसत्ताकत्वे सति कार्य्यत्वं विवर्तत्वम् इति तल्लक्षणं पर्य्यवस्यति। न च मृत्तिकाकार्य्ये घटे अतिव्याप्तिः, तस्य कार्य्यत्वेऽपि विषमसत्ताकत्वाभावात्, समसत्ताकत्वाद् वा। अत्र उपादानशब्देन चैतन्यस्य, स्वशब्देन च उपादेयस्य परिग्रहः। एवं च शुक्तिरूप्योपादानस्य इदमवच्छेदे चैतन्यस्य पारमार्थिकी सत्ता, शुक्तिरूप्यस्य तु प्रातिभासिकी। तथा च शुक्तिरूप्यादेः स्वोपादानचैतन्यसत्ता—विषमसत्ताकत्वाद् विवर्तत्वम् इति लक्षणसमन्वयः। एवं पारमार्थिकसत्यरूपं ब्रह्म व्यावहारिकजगद्रूपेण भासते इति इदं जगत् ब्रह्मणः विवर्तरूपम्।

वेदान्ते ब्रह्मणि प्रपञ्चभानस्य परिणामभावः नाङ्गीक्रियते, दुग्धादिवद् ब्रह्मणः अपि विकारित्वप्रसङ्गात्, अनित्यत्वादिदोषापत्तेश्च। विवर्तभावाङ्गीकारे तु नायं दोषः, ब्रह्मणि प्रपञ्चभानस्य मिथ्यात्वेन ब्रह्मणः विकारित्वप्रसंगाभावात्। तदुक्तम्—'अधिष्ठानावशेषो हि नाशः कल्पितवस्तुनः'[10] इति।

३. मिथ्यात्वलक्षणम्[11]

अद्वैतिनां मते ध्रुवं स्वप्रकाशं सच्चिदानन्दरूपं ब्रह्म एव सत्यं, तद्भिन्नं सर्वम् असत्यम्। अतएव अस्य दृश्यजगतः मिथ्यात्वम् अद्वैतवेदान्तिभिः महता कण्ठेन उद्घोषितम्। तदुक्तम्—'ब्रह्मसत्यं जगन्मिथ्या' इति। अत्र मिथ्यात्वं नाम नासत्त्वम् अलीकत्वं वा, अस्य जगतः प्रतिभासमानत्वेन अलीकत्वायोगात्। तर्हि किं मिथ्यात्वम् इति चेत्। उच्यते—मिथ्याशब्दस्य तावत् अर्थद्वयं भवति—असम्भवः, अनिर्वचनीयत्वं च। मिथ्याशब्दो द्व्यर्थः—अपह्नववचनो निर्वचनीयतावचनश्च। तत्र अद्वैतिनां मते'मिथ्याशब्दः अनिर्वचनीयतावचनः'[12] गृहीतः। सद्-असत्-सदसत्—सदसद्भिन्नेति चतुष्कोटिविनिर्मुक्तं यत् तद् अनिर्वचनीयम्। 'सद्विलक्षणत्वे सति असद्विलक्षणत्वे सति सदसद्विलक्षणत्वम् अविर्वचनीयत्वम्'[13] इति अद्वैतसिद्धौ।

तत्र मिथ्यात्वस्य निर्दोषलक्षणपञ्चतकम् मधुसूदनसरस्वतीना अवधृतम्। तथाहि—(१) सदसद्विलक्षणत्वं मिथ्यात्वम्, (२) प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वं मिथ्यात्वम्, (३) ज्ञाननिवर्त्यत्वं मिथ्यात्वम्, (४) स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगित्वं मिथ्यात्वम्, (५) सद्विविक्तत्वं मिथ्यात्वम् इति। तत्र प्रथमं लक्षणं पद्मपादैः प्रदर्शितम्। द्वितीयतृतीये लक्षणे प्रकाशात्मयतिभिः चतुर्थं चित्सुखाचार्यैः, पञ्चमं च न्यायमकरन्दकारैः आनन्दबोधैः उपस्थापितम्। तदुक्तम्—'आद्यं स्यात् पञ्चपाद्युक्तं ततो विवरणोदिते। चित्सुखीयं चतुर्थं स्यादन्त्यमानन्दबोधजम्' इति।

(२) सदसद्विलक्षणत्वं मिथ्यात्वम्[14]—यत् न सत् नापि असत् तत् सदसद्विलक्षणम्, तदेव मिथ्या इत्यर्थः। अत्र द्वैतवेदान्तिनां मते बाध्यत्वमेव असत्त्वम्, यथा शुक्तिरूप्यस्य, अबाध्यत्वं च सत्त्वम्, यथा ब्रह्मणः विश्वप्रपञ्चस्य च। तथा च तेषां मते यत् न

सत् तदसत्, यच्च नासत् तत्सत् इति सदसतोः परस्परविरहात्, सत्त्वासत्त्वयोः अनधिकरणभूतं किमपि वस्तु नास्ति इति लक्षणम् इदम् असङ्गतम्। अद्वैतिनां मते तु यत् कालत्रये अपि न बाध्यते तत् सत्, यथा ब्रह्म, यच्च कालत्रये अपि प्रतीतिगोचरं न भवति, तत् असत् अलीकं वा, यथा आकाशकुसुमम्। शुक्तिरूप्यस्य जगत्प्रपञ्चस्य च नापि ब्रह्मवत् त्रैकालिकाबाध्यत्वं, नापि आकाश-कुसुमवद् अप्रतीतिः इति सत्त्वासत्त्वयोः अभावः तत्र तत्र अस्ति इति तस्य तस्य सदसद्विविक्तत्वं मिथ्यात्वं वा।

अत्र इदं ज्ञातव्यम्—अद्वैतिनां मते सत्त्वासत्त्वे न परस्पर-विरहव्यापके, अपि तु परस्परविरहव्याप्ये। सत्त्वासत्त्वयोः परस्पर-विरहव्यापकत्वे असत्त्वस्य सत्त्वाभावव्यापकत्वेन यत्र सत्त्वाभावः तत्र असत्त्वसद्भावः अवश्यमेव भवेत्, परन्तु शुक्तिरजते सत्त्वाभावस्य सत्त्वेऽपि असत्त्वाभावोऽपि अस्ति, न तु असत्त्वसद्भावः। एवं उभयोः परस्परविरहव्यापकत्वे सत्त्वस्य असत्त्वाभावव्यापकत्वेन यत्र असत्त्वाभावः तत्र सत्त्वसद्भावः भवेत्, परन्तु शुक्तिरजते असत्त्वा-भावस्य सद्भावे अपि सत्त्वसद्भावः नास्ति। परस्परविरहव्याप्यत्वे तु यत्र सत्त्वं न तत्र असत्त्वस्य सद्भावः, यत्र च असत्त्वं न तत्र सत्त्वस्य सद्भावः। तथा च सत्त्वासत्त्वयोः सद्भावः न एकस्मिन् वस्तुनि सम्भवति, उभयोः अभावस्तु सम्भवति। यथा दृश्यमाने प्रपञ्चे शुक्तिरजते च उभयोः अभावः वर्तते इति तस्य तस्य सदसद्विलक्षणत्वम्।

(२, ४) प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वं मिथ्यात्वम्,[१५] अथवा प्रतिपन्नोपाधौ निषेधप्रतियोगित्वं मिथ्यात्वम्[१६] =यद् वस्तु यस्य आधारत्वेन प्रतिभासते, तस्मिन् आधारे यदि तस्य वस्तुनः अत्यन्ताभावः वर्तते, तर्हि तस्य वस्तुनः मिथ्यात्वं स्वीकरणीयम् चित्सुखकृतं चतुर्थलक्षणम् अपि एतल्लक्षणम्

अनुवर्त्तते, तथाहि—"सर्वेषामेव भावानां स्वाश्रयत्वेन सम्भवे। प्रतियोगित्वमत्यन्ताभावं प्रति मृषात्मता[१७] ॥" इति तत्त्वप्रदीपिकायाम्। सर्वेषां भाववस्तूनाम् आश्रयत्वेन यत् सम्मतं तस्मिन् आधारे यदि तेषां तेषां भाववस्तूनां अत्यन्ताभावः प्रतीतिगोचरः भवति, तर्हि अत्यन्ताभावस्य प्रतियोगिभूतानां तेषां भाववस्तूनां मिथ्यात्वम् इत्यर्थः। चित्सुखीयम् एतत् लक्षणम् एव अद्वैतसिद्धिकारैः 'स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगित्वं मिथ्यात्वम्'[१८] इत्यनेन उपन्यस्तम् 'मिथ्यात्वञ्च स्वाश्रयत्वेनाभिमतयावन्निष्ठात्यन्ताभावप्रतियोगित्वम्'[१९] इति धर्मराजाध्वरीन्द्रकृतं लक्षणम् अपि चित्सुखकृतलक्षणस्यैव द्योतकम्। स्वाश्रयत्वेन परिज्ञातेषु सर्वेषु आधारेषु यस्य अत्यन्ताभावः, तत् मिथ्या इत्यर्थः।

अत्र प्रकाशात्मयतिभिः विशेष्यत्वेन अभिमतम् 'त्रैकालिकनिषेधप्रतियोगित्वम्' इति पदं चित्सुखैः विशेष्यत्वेन अभिमतेन 'अत्यन्ताभावप्रतियोगित्वम्' इत्यनेन पदेन समार्थकम्।' नित्यसंसर्गाभावस्य अत्यन्ताभावत्वात् भूतवर्तमानभविष्यद्रूपे कालत्रये वर्तमानः निषेधः अभावो वा अत्यन्ताभावः इति त्रैकालिकनिषेधस्य प्रतियोगित्वं अत्यन्ताभावस्य प्रतियोगित्वं च अनर्थान्तरम्। लक्षणद्वयस्य विशेषणांशे अपि साम्यम् अस्ति। तथाहि प्रकाशात्मयतिभिः 'प्रतिपन्नोपाधौ' इति यदुक्तम्, तदेव चित्सुखैः 'स्वाश्रयत्वेन सम्मते' इत्यनेन उक्तम्। उपाधित्वेन आश्रयत्वेन वा यत् प्रतीयते स प्रतिपन्नोपाधिः। स्वस्य आश्रयत्वेन आधारत्वेन वा यत् प्रतिभासते तत् स्वाश्रयत्वेन सम्मतम् एवं च लक्षणद्वयस्य समार्थकत्वम्। ननु एवं सति पुनरुक्तिदोषप्रसङ्गः इति चेत्। तत्र अद्वैतसिद्धिकाराणां मते 'स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगित्वम्' इति लक्षणस्य स्वात्यन्ताभावाधिकरणे एव प्रतीयमानत्वम् इति व्याख्याने न पुनरुक्तिदोषः प्रसज्यते। 'तच्च स्वात्यन्ताभावाधिकरणे एव प्रतीयमानत्वम्। अतः पूर्ववैलक्षण्यम्'[२०] —

अस्मिन् लक्षणद्वये 'प्रतिपन्नोपाधौ' इति 'स्वाश्रयत्वेन सम्मते' इति वा उक्तत्वात् असद्भूते आकाशकुसुमादौ नातिव्याप्तिः, आकाशकुसुमादीनां कस्यचन आधारस्य प्रतीतिगोचरत्वाभावात्' ननु आकाशादीनाम् न कश्चन आधारः प्रतीयते इति आकाशादौ अव्याप्तिः इति चेत्। उच्यते—निखिलस्य जगतः आधारभूतं ब्रह्म इति आकाशादीनामपि ब्रह्मैव आधारभूतम् इति नाव्याप्तिः।

(३) ज्ञाननिवर्त्यत्वं वा मिथ्यात्वम्[२१]—यद् ज्ञानेन विवर्त्यते तत् मिथ्या। ननु यद् ज्ञानेन निवर्त्यते तस्यैव मिथ्यात्वं चेत्, द्वयोः ज्ञानयोः एककालिकत्वाभावात् उत्तरज्ञाने उदिते पूर्वज्ञानं सत्यमपि निवर्तते इति उत्तरज्ञाननिवर्तिते पूर्वज्ञाने लक्षणम् इदम् अतिव्याप्तम् इति चेत्। न, 'ज्ञाननिवर्त्यत्वम्' इत्यनेन 'ज्ञानत्वेन ज्ञाननिवर्त्यत्वम्' इत्यर्थस्य अभिप्रेतत्वात्। यत्र उत्तरज्ञानेन पूर्वज्ञानं विनश्यते, तत्र ज्ञानं न ज्ञानत्वरूपेण पूर्वज्ञाननाशे हेतुः, अपि तु आत्मविशेषगुणरूपेण। परवर्ती आत्मविशेषगुणः पूर्वोत्पन्नस्य—आत्मविशेषगुणस्य नाशकः भवतीति हि नियमः। पूर्वोत्पन्नज्ञानस्य निवर्तकत्वेन न अत्र ज्ञानत्वं प्रकाशितम्, अपि तु आत्मविशेषगुणत्वम् एव पूर्वज्ञाननिवर्तकहेतुत्वेन प्रकाशितम्। ननु आत्मविशेषगुणत्वमेव पूर्वज्ञाननाशे हेतुभूतं, न ज्ञानत्वम् इति कथं स्वीकरणीयम्? उच्यते—'ज्ञानजन्या भवेदिच्छा इच्छाजन्या कृतिर्भवेत्' इति सर्वैः स्वीक्रियते तत्र ज्ञानसद्भावकाले न इच्छा उदेति, इच्छायाम् उदितायां च ज्ञानं नश्यति, कृतौ उदितायां च इच्छा नश्यति इति आत्मविशेषगुणानां ज्ञानेच्छाप्रयत्नादीनां परस्परनाशकत्वं स्वीकरणीयम्। तथा च परभाविना ज्ञानेन यथा पूर्वभाविनः ज्ञानस्य नाशः, तथा परभाविन्या इच्छया अपि पूर्वभाविनः ज्ञानस्य नाशः भवति। एवं च ज्ञानत्वस्य ज्ञाननिवर्तकहेतुत्वं न सङ्गतम्, इच्छायाम् अव्याप्तेः। तथा च ज्ञानेच्छयोः साधारणः आत्मविशेषगुणत्वरूपः धर्म एव ज्ञाननिवर्तकत्वेन स्वीकरणीयः। ननु, ज्ञानप्रागभावस्यापि ज्ञान-

नाश्यत्वात् तत्र अतिव्याप्तिः इति चेत्। न, नहि ज्ञानं ज्ञानत्वेन ज्ञानप्रागभावं नाशयति, अपि तु प्रतियोगित्वेन इति समञ्जसात्।

(४) सद्विविक्तत्वं मिथ्यात्वम्[22]—यत् सतः सत्यात् वा भिन्नं तत् मिथ्या इत्यर्थः। ननु, सत्त्वं नाम सत्ताजातिविशिष्टत्वम्। अद्वैतवेदान्तिमते तु ब्रह्मणः निर्धर्मकत्वेन सत्ताजातिशून्यत्वम् इति लक्षणमिदं ब्रह्मणि अतिव्याप्तम् इति चेत्। मैवम्, अद्वैतिभिः जातिरेव न स्वीक्रियते इति सत्ताजातेः अप्रसक्तत्वात्। न च सत्ताजातिशून्यस्य सत्त्वाभावः इति वक्तुं युज्यते। प्रतिवादिभिः जातिवादिभिः अपि सत्यत्वेन अभ्युपगम्यमानायां सत्ताजातौ सत्ताजातेः अस्वीकारात्। तथा च सत्ताजातिशून्यायाः सत्तायाः यथा सद्रूपत्वम्, तथा सत्ताजातिशून्यस्य ब्रह्मणोऽपि इति ब्रह्मणः सत्यत्वेन न तत्र मिथ्यात्वलक्षणम् अतिव्याप्तम्। ननु, असद्रूपाणाम् आकाशकुसुमादीनाम् अपि सद्विविक्तत्वात् तत्र अतिव्याप्तिरिति चेत्। न, सत्त्वं नामात्र प्रमाणसिद्धत्वम्। यत् न निर्दोषप्रमाणेन सिद्धम्, तदेव सद्विविक्तं मिथ्या वा। स्वप्नदृष्टवस्तूनां न निर्दोषप्रमाणसिद्धत्वम् इति तेषां मिथ्यात्वम्। स्वाप्नवस्तूनां प्रमाणसिद्धत्वाभावे अपि सत्यवस्तुवत् प्रतीतिगोचरत्वम् अस्ति। अलीकानाम् आकाशकुसुमादीनां तु इदंरूपेण प्रतीतिगोचरत्वं नास्ति। तथा च लक्षणे 'सत्त्वेन प्रतीत्यर्हम्' इति विशेषणं दीयते चेत्, सत्त्वेन अप्रतीतेषु आकाशकुसुमादिषु नातिव्याप्तिः, सत्त्वेन प्रतीतेषु स्वप्नदृष्टवस्तुषु अपि नाव्याप्तिः।

४. जगन्मिथ्यात्वे प्रमाणम्

अस्य जगत्प्रपञ्चस्य मिथ्यात्वं प्रधानतः अनुमानेनैव साध्यते। तथा हि—अयं पटः (पक्षः) एतत् तन्तुनिष्ठात्यन्ताभावप्रतियोगी (साध्यम्), दृश्यत्वात् (हेतुः), घटवत् (दृष्टान्तः) इति। घटे दृश्यत्वरूपहेतुः अस्ति। स च घटः तदवयवभूतायां मृत्तिकायां

नास्तीति मृत्तिकारूपे अवयवे घटस्य अत्यन्ताभावः, घटश्च तस्य अत्यन्ताभावस्य प्रतियोगी। पटावयवेषु तन्तुषु पटस्य अत्यन्ताभावः अस्ति, पटश्च तस्य अत्यन्ताभावस्य प्रतियोगी, दृश्यत्वात्, यथा घटः इत्यर्थः। न हि तन्तवः पटः इति तन्तुषु पटात्यन्ताभावः नित्यमेव वर्तते। अत्र तन्तुपदम् उपादानकारणपरम्। तथा च दृश्यपदार्थमात्राणां सूक्ष्मे उपादाने तत्तत्स्थूलवस्तूनाम् अत्यन्ताभावः दृश्यते। यथा घटोपादानभूतायां मृत्तिकायां घटाभावः, काञ्चनालंकारस्य उपादाने काञ्चने काञ्चनालंकाराभावः। एवं दृश्यवस्तुमात्रस्य उपादाननिष्ठात्यन्ताभावप्रतियोगित्वात् 'उपादाननिष्ठात्यन्ताभावलक्षणमिथ्यात्वसिद्धिः'[२४] (अ. सि.)। कार्यकारणयोर्मध्ये कार्य्यं मिथ्या, कारणं सत्यम् इति 'तदनन्यत्वमारम्भणशब्दादिभ्यः'[२५] इति सूत्रभाष्ये प्रदर्शितम्। इदं च जगत् ब्रह्मकार्यम् इति ब्रह्मणः सत्यत्वं जगतश्च मिथ्यात्वम्।

प्रपञ्चमिथ्यात्वस्थापनार्थं अद्वैतसिद्धिकारैः अनुमानचतुष्टयं प्रदर्शितम्। तत्र 'विमतं मिथ्या' इति प्रतिज्ञावाक्यस्य एकत्वेऽपि हेतूनां चतुष्टयत्वात् अनुमानचतुष्टयम् इत्युच्यते। तथाहि—विमतं मिथ्या, दृश्यत्वात्, जडत्वात्, परिच्छिन्नत्वात्, अंशित्वात् शुक्तिरूप्यवत्[२६] इति।

१. तत्र दृश्यत्वं नाम वृत्तिव्याप्यत्वम् इति भामतीपन्थिनः। ननु वृत्तिव्याप्यत्वस्य दृश्यत्वे ब्रह्मणोऽपि वेदान्तवाक्यजन्यवृत्तिव्याप्यत्वात् दृश्यत्वसद्भावप्रसंगेन मिथ्यात्वापत्तिः इति चेत्। न ब्रह्मणः स्वप्रकाशत्वेन तत्सिद्ध्यर्थं वृत्तेरनपेक्षत्वात्। 'यत्तदग्राह्यम्'[२७] इति श्रुत्या च शुद्धब्रह्मणः वृत्तिव्याप्यत्वनिषेधात्। वेदान्तवाक्यजन्यवृत्तेः विषयभूतं ब्रह्म तु न शुद्धब्रह्म अपि तु तद्वृत्त्युपहितं ब्रह्म, उपहितब्रह्मणस्तु मिथ्यात्वमिति नानुपपत्तिः। विवरणपन्थिनां मते तु शब्दाजन्यवृत्तिविषयत्वं दृश्यत्वम्। शुद्धब्रह्म तु न शब्दाजन्यवृत्तेर्विषयः, अपि तु महावाक्यजन्यवृत्तेः

विषयः इति ब्रह्मणि न दृश्यत्वसद्भावः। सप्रकारकवृत्तिविषयत्वं वा दृश्यत्वम्। ब्रह्म तु निष्प्रकारकज्ञानस्यैव विषयो भवति, न तु सप्रकारकज्ञानस्य इति न तत्र दृश्यत्वसद्भावप्रसंगः। चिद्विषयत्वं वा दृश्यत्वम् चिद्विषयत्वं च यथाकथञ्चित् चित्सम्बन्धित्वम्। सम्बन्धमात्रस्य भेदव्यापकत्वात् एकस्मिन् चैतन्ये चैतन्यसम्बन्धः स्थातुं न शक्नोति इति न ब्रह्मणि दृश्यत्वसद्भावप्रसंगः। एवं ब्रह्मणि दृश्यत्वरूपहेतोः अभावात् न तस्य मिथ्यात्वप्रसंगः।

२. जडत्वं नाम अज्ञानत्वम्। ननु वृत्त्युपरक्तचैतन्यमेव ज्ञानम् इति सिद्धान्तिनां मतम् इति केवलचैतन्यं न ज्ञानम्। अतएव अज्ञानत्वहेतुः केवलचैतन्ये अस्ति इति तस्य जडत्वेन मिथ्यात्वप्रसंगः इति चेत्। न, अर्थोपलक्षितः निर्विषयकः वा प्रकाश एव ज्ञानम्। एतच्च अर्थोपलक्षितप्रकाशरूपं ज्ञानत्वं मोक्षदशायाम् आत्मनि अस्तीति तत्र अज्ञानत्वहेतोः अभावात् न तस्य मिथ्यात्वप्रसंगः। यद्वा अनात्मत्वं जडत्वम्। स्वप्रकाशत्वं हि आत्मत्वम्। केवलम् आत्मा एव स्वप्रकाशः इति अनात्मभूताः सर्वे पदार्थाः अस्वप्रकाशाः। यच्च अप्रकाशं तत् जडम्, यथा घटपटादि, तदेव मिथ्या इति अस्वप्रकाशरूपं जडत्वं मिथ्यात्वस्य प्रयोजकम्।

३. परिच्छिन्नत्वं देशकृतं कालकृतं वस्तुकृतं वा भवितुम् अर्हति। देशतः परिच्छेदो नाम देशविशेषे वर्तमानत्वं देशान्तरे असत्त्वं वा। अत्यन्ताभावप्रतियोगित्वं देशतः परिच्छेदः। कालतः परिच्छेदो नाम कालविशेषे विद्यमानत्वं कालान्तरे असत्त्वं वा। ध्वंसप्रतियोगित्वमेव कालतः परिच्छेदः। वस्तुकृतपरिच्छिन्नत्वं नाम वस्तुविशेषेण सह तादात्म्यापत्तिः, न तु सर्वैः वस्तुभिः सह। अन्योन्याभावप्रतियोगित्वमेव वस्तुकृतः परिच्छेदः। एवं च देशान्तरवृत्ति अत्यन्ताभावप्रतियोगित्वं देशकृतः परिच्छेदः, कालान्तरवृत्ति ध्वंसप्रतियोगित्वं कालकृतः परिच्छेदः, वस्त्वन्तरनिष्ट-

भेदप्रतियोगित्वं वस्तुकृतः परिच्छेदः। अयं च परिच्छिन्नत्वहेतुः आत्मनि नास्ति इति न आत्मनः मिथ्यात्वप्रसंगः।

४. विमतः पटः एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी अवयवित्वात् पटान्तरवत्।[२८] विवादगोचरीभूतः पटः एतत्तन्तुनिष्ठात्यन्ताभावस्य प्रतियोगी। अस्मिन् तन्तौ पटस्य अत्यन्ताभावः वर्तते, अवयवित्वात्, यथा अन्यः पटः इत्यर्थः। अत्र पटान्तरे अवयवित्वरूपः हेतुः वर्तते, एतत्तन्तौ पटान्तरस्य अत्यन्ताभावः वर्तते। तथा च पटान्तरे एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वरूपः साध्यः निश्चितः वर्तते। तथा च व्याप्तिसिद्धिः। विवादगोचरीभूते पक्षे पटे अवयवित्वरूपः हेतुः वर्तते। तस्मात् तत्र साध्यमपि स्याद् इति अस्मिन् पटे एतत्तन्तुनिष्ठात्यन्ताभावस्य प्रतियोगित्वं स्यात्। तथा च अस्य पटस्य अवयवे एव अस्य पटस्य अत्यन्ताभावः वर्तते। तन्तुः च पटस्य उपादानकारणम् इति 'तन्तुपदम् उपादानपरम्'[२९]। तथा च कार्यमात्रस्य उपादाने वर्तमानत्वात् स्वाश्रये स्वस्य अत्यन्ताभावः स्वीकार्यः। स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगित्वं च मिथ्यात्वम् इति 'उपादाननिष्ठात्यन्ताभावप्रतियोगित्वलक्षणमिथ्यात्वसिद्धिः।'[३०] पटे च एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वसत्त्वात् पटस्य मिथ्यात्वं सिद्धम्। एतदेव अंशित्वरूपहेतुना अनुमानम्। एवं गुणादिकं पक्षीकृत्य अपि तेषां मिथ्यात्वं साधयितुं शक्यते। तदुक्तम् – अंशिनः स्वांशगात्यन्ताभावस्य प्रतियोगिनः। अंशित्वादितरांशीव दिगेषैव गुणादिषु।[३१] इति गुणादिकं पक्षीकृत्य अनुमानप्रकारस्तु एवम्—एतद् रूपम् एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगिरूपत्वाद् इतररूपवत्। एतच्चलनं एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगि चलनत्वाद् अन्यचलनवत्। तन्तुत्वं तन्तुनिष्ठात्यन्ताभावप्रतियोगिजातित्वाद् घटत्ववत् इत्येवम्।

प्रपञ्चमिथ्यात्वे आगमप्रमाणम् अपि अस्ति। तथाहि—एकमेवा-

द्वितीयम् इति श्रुतिवाक्यमेव प्रपञ्चमिथ्यात्वे प्रमाणम्। तत्र 'अद्वितीय' शब्देन तत्सजातीयवस्त्वन्तरस्य निषेधः। 'एक' शब्देन विजातीयवस्त्वन्तरस्य निषेधः 'एव' शब्देन स्वगतभेदस्य निषेधः। तथा च ब्रह्मभिन्नवस्त्वन्तरस्य निषेधात् जगतः मिथ्यात्वम् अभ्युपगतम्। एवं 'सत्यं ज्ञानमनन्तं ब्रह्म'[32] 'नेह नानास्ति किञ्चन'[33] 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति'[34] इत्यादौ ब्रह्मण एव सत्यत्वं, नानात्वस्य च मिथ्यात्वम् उद्घोषितम्।

५. मिथ्यात्वमिथ्यात्वम्[35]

ब्रह्मभिन्नस्य सर्वस्य मिथ्यात्वम् इति जगतः ब्रह्मभिन्नत्वेन मिथ्यात्वम् इति अद्वैतिनः। तत्र अयं प्रश्नः—अस्मिन् मिथ्याभूते जगति यत् मिथ्यात्वम् अस्ति तत् सत्यं वा मिथ्या वा। उभयथापि अद्वैतहानिः। तथाहि—मिथ्यात्वस्य सत्यत्वे एकमेव अद्वितीयं ब्रह्म सत्यं, तद्भिन्नं सर्वं मिथ्येति व्याहतम्। मिथ्यात्वस्य मिथ्यात्वे च जगतः सत्यत्वापत्तिः। तथा चानुमानम्—जगत् सत्यम्, मिथ्याभूतमिथ्यात्वकत्वात्, आत्मवत्। जगन्मिथ्यात्वस्य मिथ्यात्वेन जगत् आत्मवत् सत्यम् इत्यर्थः। अत्र अयम् आशयः—वस्तुविशेषस्य मिथ्यात्वे निश्चिते तद्वस्तुविषयकं सत्यत्वं व्याहन्यते। तस्य सत्यत्वापहारकस्य मिथ्यात्वस्य मिथ्यात्वे तस्य वस्तुनः सत्यत्वम् एव प्रतितिष्ठते। यथा चार्वाकैः अभिमतस्य आत्मविषयकमिथ्यात्वस्य मिथ्यात्वे प्रमाणिते सति आत्मनः सत्यत्वं प्रतिष्ठितं भवति एवं जगन्मिथ्यात्वस्य मिथ्यात्वे जगतः सत्यत्वमेव संतिष्ठति। तदुक्तम्—"मिथ्यात्वं यद्यबाध्यं स्यात् सदद्वैतमतक्षतिः। मिथ्यात्वं यदि बाध्यं स्यात् जगत्सत्यत्वमापातत्॥" इत्यादि माध्वाः वदन्ति।

तत्र उच्यते वेदान्तिकैः—सत्यम् मिथ्यात्वस्य मिथ्यात्वं

वेदान्तिभिः स्वीकृतं, परं तु न तेन मिथ्यात्वमिथ्यात्वेन जगतः सत्यत्वं प्रतितिष्ठति। न च एकस्मिन् धर्मिणि परस्परविरुद्धयोः धर्मयोः एकस्य मिथ्यात्वे अपरस्य सत्यत्वम्' इति प्रतिवादि-मतम् ग्राह्यम्, व्यभिचारित्वात्। न हि एकस्मिन् एव धर्मिणि कल्पितयोः गोत्वाश्वत्वयोः परस्परविरुद्धयोः मध्ये गोत्वस्य मिथ्यात्वे अश्वत्वस्य सत्यत्वं प्रतितिष्ठेत, तत्र गजत्वादेरपि स्थितिसम्भवात्। अपि च शुक्ति-रजतादिगत-मिथ्यात्वस्य मिथ्यात्वं प्रतिवादिभिरपि स्वीकृतम्। शुक्तिरजते मिथ्याभूतमिथ्यात्व-कत्वरूपः हेतुः वर्तते, सत्यत्वरूपः साध्यश्च नास्तीति शुक्ति-रजते मिथ्याभूतमिथ्यात्वकत्वरूपः हेतुः साध्यश्च सत्यत्वस्य व्यभि-चारी। शुक्तिरजतरूपः धर्मी मिथ्या, इति तस्य सत्यत्वं मिथ्यात्वं चेति उभयविधधर्मस्यापि स्वप्नदृष्टगजस्य अस्तित्व-नास्तित्वयोः इव मिथ्यात्वम्। तथा च रजतमिथ्यात्वं मिथ्या, मिथ्याभूतधर्मिकत्वात्, स्वप्नदृष्टगजास्तित्वनास्तित्ववत्, इति अनुमानमपि सम्भवति। एतेन अनुमानेन शुक्तिरजते मिथ्याभूत-मिथ्यात्वकत्वरूपः हेतुः सिद्धयति, न तु सत्यत्वरूपः साध्यः, मिथ्या-भूते शुक्तिरजते सत्यत्वाभावात्। तथा च एकस्मिन् धर्मिणि विरुद्धयोः धर्मयोः एकस्य मिथ्यात्वे अपरस्य सत्यत्वम् इति प्रति-वाद्युक्तं मतं न प्रतितिष्ठति।

परस्परविरुद्धधर्मयोः एकस्य मिथ्यात्वे अपरस्य सत्यत्वं तत्रैव भवति यत्र परस्परविरुद्धधर्मिणोः निषेधमूलीभूतधर्मोऽपि विभिन्नः भवति, एकस्मिन् धर्मिणि तस्य स्थित्यभावश्च। 'शुक्तौ रजतं नास्ति' इति शुक्तौ रजतस्य यत्र निषेधः तत्र निषेधमूलीभूतः धर्मः रजतत्वम्। तस्यां च शुक्तौ रजतत्वाभावः नास्ति इति अस्य निषेधस्य मूलीभूतः धर्मः रजतत्वाभावः। रजतत्वम्, रजतत्वा-भावश्च इति परस्परविरुद्धौ धर्मौ एकस्मिन् धर्मिणि न वर्तेते इति एकस्य निषेधे अपरस्य सत्यत्वम् अवश्यमेव भवेत्। यत्र रजतत्वं

नास्ति तत्र रजतत्वाभावः स्थास्यति। वैपरीत्येन यत् न अरजतं तत् रजतं भवेदेव। एवं रजतत्व-रजतभिन्नत्वयोः अपि एकतरस्य मिथ्यात्वे अपरस्य सत्यत्वं स्यादेव। यत्र तु परस्परविरुद्धयोः धर्मिणोः निषेधस्य मूलीभूतः धर्मः न विभिन्नः, उभयत्र यदि कस्यापि निषेधमूलीभूतधर्मस्य कल्पना सम्भवति, परस्परविरुद्धयोः धर्मयोश्च अभावः कस्मिंश्चित् धर्मिणि दृश्यते, तर्हि एकतरनिषेधेन अपरस्य सत्यत्वं न प्रतितिष्ठति। गोत्वाश्वत्वयोः परस्परविरुद्ध-धर्मत्वे अपि गजे तयोः अभावदर्शनात्। तथा च गजे अश्वत्वस्य निषेधेन न गोत्वस्य सत्यत्वं कल्पनीयम्।

अद्वैतिनां मते यथा जगतः मिथ्यात्वं तथा जगन्मिथ्यात्वस्यापि मिथ्यात्वम्। तत्र दृश्यत्वं मिथ्यात्वस्य हेतुः। जगन्मिथ्यात्वस्य अवच्छेदकः दृश्यत्वरूपः धर्मस्य यथा जगति तथा मिथ्यात्वे अपि वर्तते इति मिथ्यात्वावच्छेदकः धर्मः उभयवृत्तिः। तथा च जगन्मिथ्यात्वस्य मिथ्यात्वे न जगतः सत्यत्वम्। 'तत्र हि विरुद्धयोः धर्मयोः एकतरमिथ्यात्वे अपरसत्यत्वं, यत्र निषेध्यतावच्छेदकम् उभयवृत्तिः न भवेत्, यथा च परस्परविरहरूपयोः परस्परात्यन्ता-भावरूपयोः वा रजतत्व-रजतत्वाभावयोः शुक्तौ, यथा वा परस्पर-विरहव्यापकयोः रजतभिन्नत्व-रजतत्वयोः तत्रैव। तत्र निषेध्य-तावच्छेदकभेदनियमात्। प्रकृते तु निषेध्यतावच्छेदम् एकमेव दृश्यत्वादि, यथा गोत्वाश्वत्वयोः एकस्मिन् गजेनै कतरनिषेधे अन्यतरसत्यत्वं भवेत्।[31]

अपि च प्रपञ्चमिथ्यात्वस्य मिथ्यात्वे अपि प्रपञ्चसत्यत्वं न साध्यते, प्रपञ्चमिथ्यात्वस्यापि प्रपञ्चवत् मिथ्यात्वेन समसत्ताक-त्वात्। प्रपञ्चसत्त्वे प्रपञ्चमिथ्यात्वस्य निवृत्तिः न हि सम्भवति। येन च प्रपञ्चमिथ्यात्वनिवृत्तिः तेनैव प्रपञ्चस्यापि निवृत्तिः। एवं च धर्मिणः प्रपञ्चस्य अभावे प्रपञ्चस्य सत्यत्वं कुत्र तिष्ठेत्। धर्मिणः

अभावे न हि धर्मः तिष्ठति। प्रपञ्चमिथ्यात्ववत् प्रपञ्चसत्यत्वम् अपि प्रपञ्चवत् व्यावहारिकम्। तयोः प्रपञ्च-तन्मिथ्यात्वयोः एकेनैव ब्रह्मज्ञानेन बाधात् समसत्ताकत्वम् इति ब्रह्मज्ञानेन प्रपञ्चे बाधिते सति प्रपञ्चधर्मस्य सत्यत्व-मिथ्यात्वादिकस्यापि बाधो भवेत्। इति मिथ्यात्वमिथ्यात्वेन नाद्वैतहानिः।

६. सृष्टिक्रमः—[३७] पञ्चीकरणम्

मायोपहितः परमेश्वरः एव जगतः स्रष्टा। माया च सत्त्वरजस्तमोगुणात्मिका, 'देवात्मशक्तिं स्वगुणैर्निगूढाम्'[३८] इत्यादि श्रुतेः। एतन्मायोपहितः परमेश्वरः नामरूपात्मकनिखिलप्रपञ्चं पूर्वसर्गानुरूपं=पूर्वसर्गे यद् यद् वस्तु यद् यन्नामकं यद् यदाकारं च आसीत् तदनुसारम्=बुद्धौ मायावृत्तौ वा विषयीकृत्य इदं करिष्यामि इदं भविष्यामि इति प्रथमं बहुत्वाय ईक्षां करोति=संकल्पयति। सृष्टेः संकल्पपूर्वकत्वे 'तदैक्षत बहुस्यां प्रजायेय'[३९] 'सोऽकामयत बहुस्यां प्रजायेय'[४०] 'स ऐक्षत लोकान्नु सृजै'[४१] इत्यादिः श्रुतिः मानम्। तादृशसंकल्पानन्तरं तमःप्रधानविक्षेपशक्तिमदज्ञानोपहितात् चैतन्यात् प्रथमम् आकाशः, ततः वायुः, ततः तेजः, ततो जलं, ततः पृथिवी इत्येवं क्रमवन्ति अपञ्चीकृतानि=भूतान्तरैः असंसृष्टानि शुद्धानि वा=पञ्चभूतानि उत्पद्यन्ते। 'तस्माद् वा एतस्माद् आत्मनः आकाशः सम्भूतः,[४२] 'यतो वा इमानि भूतानि जायन्ते'[४३], इत्यादिश्रुतेः। तत्र न हि आकाशादिभावापन्नस्य अज्ञानस्य कार्त्स्न्येन वाय्वादिपरिणामः, उत्तरोत्पत्तिकाले पूर्वपूर्वोच्छेदप्रसंगात्, किन्तु एकदेशेन। अतएव आकाशादीनाम् उत्तरोत्तरभूताद्यपेक्षया महत्त्वमपि पुराणाद्युक्तम् उपपन्नं भवति। आकाशादौ जाड्यादिदर्शनात् तमःप्राधान्यं तत् कारणस्य इति तमोगुणप्रधानविक्षेपशक्तियुक्ताज्ञानावच्छिन्नस्य चैतन्यस्य एव

आकाशादिप्रपञ्चजनकत्वम्। कारणगुणाः हि कार्यगुणान् आरभन्ते इति न्यायात्।

ननु त्रिगुणात्मकत्वात् अज्ञानस्य कथं तमोगुणमात्रप्राधान्येन आकाशादि जनकत्वम्? उच्यते—उत्पत्तिवेलायाम् सत्त्वादयः त्रयः अपि गुणाः तारतम्येन कारणगुणप्रक्रमन्यायेन तेषु आकाशादिषु पञ्चभूतेषु उत्तरोत्तराधिक्येन जायन्ते। यद्यपि अज्ञानकार्य्ये अज्ञानगतसत्त्वरजस्तमोव्यतिरेकेण सत्त्वरजस्तमांसि न भिन्नानि सन्ति, तथापि 'सत्त्वरजस्तमांसि जायन्ते' इत्यनेन अज्ञानगतसत्त्वरजस्तमः कार्य्यजाड्यादेः एव उत्पत्तिः उक्ता इति मन्तव्यम् इति बालबोधिनीकाराः। एतानि एव आकाशादीनि सूक्ष्मशरीरादीनां स्थूलभूतानां च कारणभूतानि सूक्ष्मभूतानि व्यवहाराक्षमाणि तन्मात्राणि=शब्दादितावन्मात्रैकस्वभावानि अपञ्चीकृतानि=परस्परम् असंसृष्टानि च इति स्मृत्यादिषु उच्यन्ते। तत्र शब्दतन्मात्रम् आकाशस्य, स्पर्शतन्मात्रं वायोः, रूपतन्मात्रं तेजसः, रसतन्मात्रं जलस्य गन्धतन्मात्रं पृथिव्याः वाचकम्। तुल्यजातीयविशेषानुपपत्तेश्च तानि तन्मात्रनामधेयानि भवन्ति। तथाहि शब्दतन्मात्रे उदात्तादयः शब्दविशेषाः न सन्ति, स्पर्शतन्मात्रे मृदुकठिनादयः; रूपतन्मात्रे शुक्लकृष्णादयः; रसतन्मात्रे अम्लमधुरादयः गन्धतन्मात्रे सुरभ्यादयः विशेषाः न सन्तीति तानि तन्मात्राणि इत्युच्यन्ते। एवं तस्य तस्य गुणस्य सामान्यम् एव अत्र, न विशेषः इति अविशेषपदवाच्यानि अपि तानि भवन्ति।

तत्र आकाशस्य सामान्यात्मकः गुणः शब्दः वायोः सामान्यात्मकौ शब्दस्पर्शौ, तेजसः सामान्यात्मकानि शब्दस्पर्शरूपाणि, अपां सामान्यात्मकाः शब्दस्पर्शरूपरसाः पृथिव्याश्च सामान्यात्मकाः शब्दस्पर्शरूपरसगन्धाः। तथा च पूर्वपूर्वभूतभावापन्नायाः अविद्यायाः एकदेशस्य उत्तरोत्तरभूतं प्रति उपादानत्वात् पूर्वपूर्वभूतगुणानाम् उत्तरोत्तरभूतेषु अनुप्रवेशाद् एकैकगुणवृद्धिः।

यद्यपि तन्मात्रेषु गुणाः नोपलभ्यन्ते, तेषां सामान्यात्मकत्वात्, विशेषभावम् अनापन्नस्य च सामान्यस्य अज्ञेयत्वात्, तथापि तन्मात्रकार्येषु स्थूलभूतेषु गुणोपलम्भात् तदुपादाने अपि तत्सद्भावः कल्पनीयः। तदुपादाने अज्ञाने अपि तत्प्रसंगः इति चेत्। इष्टापत्तिः, तत्रापि अव्यक्तरूपेण सूक्ष्मशब्दसद्भावात्, अन्यथा असत्कार्यवादापातात्। यत्तु नैयायिकाः शब्दस्य आकाशमात्रगुणत्वम् इच्छन्ति, तन्न स्थूलवाय्वादौ अपि तदुपलम्भात्, तत्कारणेनापि शब्दगुणकेन भवितव्यम्, कार्यगुणस्य कारणगुणजन्यत्वनियमात्। न चासौ भ्रमः, बाधकाभावात्। इमानि च भूतानि मायाकार्याणि मायोपादेयानि वा इति तानि त्रिगुणानि। गुणाः सत्त्वरजस्तमांसि। भूतानां त्रिगुणात्मकत्वे अपि जीवकर्मवशात् कस्यचिद् गुणस्य अंगित्वम्, इतरयोः अंगत्वम्, गुणानाम् अंगांगिभावेनैव कार्य्यजनकत्वात्। तदुक्तम्—'अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः' इति।

एतेभ्यः अपञ्चीकृतभूतेभ्यः सूक्ष्मशरीराणि पञ्चीकृतानि स्थूलभूतानि च उत्पद्यन्ते। तत्र सत्त्वगुणप्रधानेभ्यः रजोगुणप्रधानेभ्यश्च अपञ्चीकृतभूतेभ्यः सूक्ष्मशरीराणि, तमोगुणप्रधानेभ्यः अपञ्चीकृतभूतेभ्यश्च पञ्चीकृतानि स्थूलभूतानि उत्पद्यन्ते। तथा हि सूक्ष्मशरीरस्य सप्तदश अवयवाः—ज्ञानेन्द्रियपञ्चकं बुद्धिमनसी कर्मेन्द्रियपञ्चकं वायुपञ्चकं च। चित्तम् अहङ्कारश्च बुद्धिमनसोः अन्तर्भवतः। एतच्च लिंगशरीरं परलोकयात्रानिर्वाहकं मोक्षपर्यन्तं स्थायि मनोबुद्धिभ्याम् उपेतम् ज्ञानेन्द्रियपञ्चक कर्मेन्द्रियपञ्चकं प्राणादिपञ्चकसंयुक्तम्। तदुक्तं—'पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम्। अपञ्चीकृतभूतोत्थं सूक्ष्मांगं भोगसाधनम्' इति। तच्च द्विविधं—परमपरं च। परं ब्रह्माण्डव्यापि समष्टिभूतम् हिरण्यगर्भलिंगशरीरं। अपरं ब्रह्माण्डाव्यापि व्यष्टिभूतम् अस्मदादिलिंगशरीरम्। तत्र हिरण्यगर्भलिंगशरीरं महत्तत्त्वम्, अस्मदादिलिंगशरीरं च अहंकारतत्त्वम् इति उच्यते।

तत्र सत्त्वगुणप्रधानैः आकाशादिभिः पञ्चभूतैः व्यस्तैः = परस्पर-निरपेक्षैः एकैकैः यथाक्रमं बुद्धेः = अन्तःकरणस्य बहिर्गमने द्वार-भूतानि श्रोत्रत्वक्-चक्षू-रसन-घ्राणाख्यानि पञ्चबुद्धीन्द्रियाणि च जायन्ते। शब्दगुणादाकाशात् श्रोत्रम्, वायोः त्वक्, अग्नेः चक्षुः, अद्भ्यः रसनम्, पृथिव्याः घ्राणम्, इत्यर्थः। प्रकाशस्य सत्त्वप्रधान-त्वात् ज्ञानेन्द्रियाणां च प्रकाशानुकूलत्वात् युक्तं तेषां सत्त्वकार्यत्वम्। एतैरेव अपञ्चीकृतैः सत्त्वगुणप्रधानैः पञ्चभूतैः समस्तैः = मिलितैः प्रकाशात्मकानि मनोबुद्ध्यहंकारचित्तरूपाणि अन्तःकरणानि जायन्ते। वस्तुतः अन्तःकरणम् एकमेव, तत्तु वृत्तिभेदाद् भिन्नमिव उपचर्यते। एतैरेव अपञ्चीकृतैः रजोगुणप्रधानैः पञ्चभूतैः व्यस्तैः पृथक्-पृथक् यथाक्रमं वाक्-पाणि-पादपायूपस्थाख्यानि कर्मेन्द्रियाणि जायन्ते। आकाशतन्मात्रात् रजोगुणोपेतात्वागिन्द्रियम्, स्पर्श-तन्मात्रात् पाणीन्द्रियम्, रूपतन्मात्रात् पादेन्द्रियम्, रसतन्मात्रात् पाय्विन्द्रियम्, गन्धतन्मात्रात् उपस्थेन्द्रियं जायते इत्यर्थः। कर्मेन्द्रियाणां सूक्ष्मत्वात् सूक्ष्मभूतकार्यत्वम्, वचनादानादिक्रिया-हेतुत्वाद् रजसश्च चलत्वात् तदुपादानकत्वम् इति भावः। एतैश्च अपञ्चीकृतैः पञ्चभूतैः रजोगुणप्रधानैः मिलितैः पञ्च वायवः प्राणा-पानव्यानोदानसमानाख्याः जायन्ते। वस्तुतः एकः एव प्राणः, स तु वृत्तिभेदाद् भिन्नः इव व्यपदिश्यते। प्राणानां प्रवृत्तिमत्त्वात् रजसश्च प्रवर्तकत्वाद् युक्तं तत्प्रधानस्य प्राणोपादानत्वम्।

तमोगुणप्रधानैः अपञ्चीकृतभूतैः आकाशादिभिः पञ्चीकृतानि = स्वस्वेतरभूतैः मिश्रितानि पञ्चस्थूलभूतानि जायन्ते। भोग्य-भोगायतनम् अन्तरेण भोगं जनयितुं व्यवहारं प्राप्तुं च असमर्थानि तानि अपञ्चीकृतानि भूतानि जीवकर्मवशात् व्यवहर्तृप्राणिजातधर्मा-धर्मापेक्षया स्थौल्यम् अधिगच्छन्ति पञ्चीकृतानि भवन्तीत्यर्थः। स्थूलभूतानां गुरुत्वात् वरणत्वाच्च तमःप्रधानकार्यत्वं युक्तम् इति भावः। सृष्टिकाले सकलप्राण्यदृष्टवशात् ईश्वरप्रेरणया आकाशवायु-

तेजोऽबन्नाद्यविद्यासहायभूतात् परमात्मनः सकाशात् अनुक्रमजातानि तानि अपञ्चीकृतानि भूतानि व्यवहारासमर्थानि इति कृत्वा तदीयस्थौल्यापेक्षायां व्यवहर्तृप्राणिजातधर्माधर्मापेक्षया पञ्चीकृतानि भवन्ति। पञ्चीकरणं नाम आकाशादिपञ्चसु एकैकं द्विधा समं विभज्य तेषु दशसु भागेषु मध्ये प्राथमिकान् पञ्चभागान् प्रत्येकं चतुर्धासमं विभज्य तेषां चतुर्णां भागानां स्वस्वद्वितीयभागं परित्यज्य भागान्तरेषु संयोजनम्।

तथा च पञ्चीकरणप्रकारः इत्थम्—आकाशम् आदौ द्विधा विभज्य तयोः आकाशार्धयोः एकं भागं पुनः चतुर्धा विभज्य तेषां चतुर्णाम् अंशानां आकाशव्यतिरिक्तानां चतुर्णां भूतानां अर्धभागेषु योजनं भवति। एवं वायुं द्विधा विभज्य तयोः भागयोः एकं भागं पुनः चतुर्धा विभज्य तेषां चतुर्णाम् अंशानां वायुव्यतिरिक्तानां चतुर्णां भूतानाम् अर्धभागेषु योजनम् भवति। एवं तेजोजलपृथिवीनाम् अपि। तथा चोक्तं पञ्चदश्याम् "द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः। स्वस्वेतरद्वितीयांशैर्योजनात् पञ्च पञ्च ते"[६५] इति। तदेवम् एकैकभूतस्य अर्धं स्वांशात्मकम्, अर्धान्तरं चतुर्भूतात्मकम्। एवम् आकाशादिपञ्चभूतेषु चतुर्धा विभक्तानाम् अन्येषां महाभूतानां प्रत्येकानुप्रवेशेन पञ्चीकृतानाम् आकाशादीनां पञ्चानां पञ्चात्मकत्वे समाने अपि = एकैकस्य भूतस्य पञ्चभूतात्मकत्वे अपि = पृथिव्यादिषु स्वांशाधिक्यात् पृथिव्यादिव्यवहारः = पृथिव्यां पार्थिवांशाधिक्यात्, जले जलांशाधिक्यात् इत्येवम्। तदुक्तं वेदान्तसूत्रे—'वैशेष्यात्तु तद्वादस्तद्वादः'[६६] इति। वैशेष्यं भूयस्त्वं, तस्मात् पृथिव्यादिवादः पृथिव्यादिपदप्रयोगः। तथा च पृथिव्याः पञ्चभूतात्मकत्वे अपि पार्थिवांशाधिक्यात् पृथिवीति व्यवहारः। एवं जलादौ अपीति भावः। पञ्चीकरणानन्तरं आकाशे शब्दः अभिव्यज्यते, वायौ शब्दस्पर्शौ, अग्नौ शब्दस्पर्शरूपाणि, जले शब्दस्पर्शरूपरसाः, पृथिव्यां च शब्दस्पर्शरूपरसगन्धाः। एतेभ्यः

तमोगुणयुक्तेभ्यः पञ्चीकृतभूतेभ्यः ऊर्ध्वं लोकसप्तकस्य अधोलोकसप्तकस्य च ब्रह्माण्डस्य, जरायुजाण्डजस्वेदजोद्भिज्जाख्यानां चतुर्विधानां स्थूलशरीराणाम् अन्नपानादीनां भोग्यविषयाणां च उत्पत्तिः भवति।

ननु छान्दोग्यश्रुतौ भूतत्रयस्यैव सृष्टिः अभिहिता, न तु आकाशवाय्वोः इति पञ्चीकरणं परित्यज्य त्रिवृत्करणम् उक्तम्। तथा त्रिवृत्करणश्रुत्या पञ्चीकरणं विरुध्यते इति तस्य अप्रामाण्यम् इति चेत्। न, श्रुत्यन्तरे पुराणादौ च पञ्चभूतसृष्टेः उक्तत्वात्, त्रिवृत्करणश्रुतेश्च पञ्चीकरणोपलक्षणार्थत्वात्। तथाहि तैत्तिरीयश्रुतौ—अग्न्यादिसृष्टेः प्राग् आकाशवाय्वोः सृष्टिरभिहिता 'तस्माद् वा एतस्माद् आत्मन आकाशः सम्भूतः, आकाशाद् वायुः' इति। तदेकवाक्यतया छान्दोग्यश्रुतौ वाय्वाकाशयोः उपलक्षणतायाः आवश्यकत्वेन त्रिवृत्करणस्यापि पञ्चीकरणोपलक्षणार्थत्वम् आवश्यकम्। भूतत्रयसृष्टिश्रुतौ सृष्टिपरिपूर्त्यर्थम् अश्रुतम् अपि भूतद्वयम् आश्रित्य भूतपञ्चकाभिप्रायेण भूतत्रयसृष्टिप्रतिपादनात् अविरोधः इत्यर्थः। न च गगनपवनयोः पृथिव्याद्यात्मकत्वे पृथिव्यादीनां रूपवत्त्वात् महत्त्ववत्त्वात् च चाक्षुषत्वापत्तिः इति तयोः पञ्चीकरणम् अयुक्तम् इति वाच्यम्, पृथिव्याद्यंशाविर्भावाभावेन अचाक्षुषत्वोपपत्तेः, त्रिवृत्करणपक्षे अपि अप्तेजसोः गन्धवत्त्वादिव्यवहारापत्तेः दोषसाम्यात् वाय्वाकाशयोः अपञ्चीकृतत्वे व्यवहाराभावप्रसंगाच्च।

७. त्रिवृत्करणम्

छान्दोग्यश्रुतौ सतः तेजोऽबन्नरूपाणां तिसृणां देवतानां सृष्टिम् उक्त्वा 'तासां त्रिवृतं त्रिवृतम् एकैकां करवाणि' इत्यादिना त्रिवृत्करणम् उक्तम्। तथाहि—सृष्टेः प्राक् सर्वमिदं जगत् सद्रूपेण

कारणेन सह अभिन्नं सत् आसीत्। तस्मादेव अद्वितीयात् एकस्मात् सतः, तस्यैव ईक्षावशात् सर्वमिदं सृष्टम्। तथाहि, तत् सत् 'बहु स्यां प्रजायेय' इति बहुत्वाय ईक्षां कृत्वा तेजः असृजत। तेजश्च लोके दग्धृ, पक्तृ, प्रकाशकं रोहितं चेति प्रसिद्धम्। पुनः तत् तेजः तेजोरूपसंस्थितं सद् वा बहु स्यां प्रजायेय इति ईक्षां कृत्वा अपः असृजत। आपः द्रवाः स्निग्धाः, स्यन्दिन्यः शुक्लाश्चेति सिद्धं लोके ताः आपः अब् रूपसंस्थितं सत् वा पुनरपि बहुत्वाय ईक्षां कृत्वा पृथिवीलक्षणम् अन्नम् असृजत। अन्नं च गुरु, स्थिरं, धारणं कृष्णं चेति प्रसिद्धम्। अत्र वस्तुतः तेजः प्रभृत्युपहितस्य सत ईक्षितृत्वेनैव तेजः प्रभृतीनाम् ईक्षितृत्वम् अवगन्तव्यम् नतु तेजः प्रभृतीनां स्वतन्त्राणाम् इति अवगन्तव्यम्।

तदनन्तरं सा सद्रूपा तेजोऽबन्नयोनिः देवता बहुभवनार्थं पूर्वसृष्ट्यनुरूपं स्वात्मनः अव्यतिरिक्तेन जीवेन प्राणधारणकर्त्रा चैतन्यरूपेण जीवात्मरूपेण इमाः तेजआद्याः तिस्रः देवताः अनुप्रविश्य = सूक्ष्मभूतैः सह संवर्गेण विशेषज्ञानं लब्ध्वा स्वात्मावस्थे संसारबीजभूते अव्याकृते नामरूपे व्याकरवाणि विस्पष्टे आकरवाणि इति ईक्षांचक्रे = संकल्पयामास। निर्विकल्पकचिन्मात्ररूपा देवता मायावशात् महाभूतानि सृष्ट्वा तेषु यदा प्रविष्टा तदा तदारब्धेषु सूत्रविराट्प्रभृतिषु समष्टिव्यष्ट्यात्मसु देहेषु प्रविश्य तत्तद्देहाभिमानवती देवदत्तादिनाम्ना शौक्ल्यादिना रूपेण च संयोज्य पिण्डं व्याकरोति। एवं च नामरूपव्याकरणार्थम् ईक्षित्वा सा देवता तासां तिसृणां देवतानाम् एकैकां त्रिवृतं त्रिवृतं करवाणि इति संकल्पयामास।

त्रिवृत्करणं नाम तेजोजलपृथिवीरूपाणां त्रयाणां भूतानां मध्ये प्रथमम् एकैकां द्विधा द्विधा समं विभज्य पुनरेकैकभागस्य द्विधा द्विधा विभागम् कृत्वा स्वस्वद्वितीयं स्थूलभागं परित्यज्य अन्यदीय-

स्थूलभागयोः निक्षिप्य एकैकस्य भागस्य संयोजनम्। तत्र एकैकस्याः त्रिवृत्करणे एकैकस्याः प्राधान्यम्, द्वयोर्द्वयोर्गुणभावः। गुणप्रधानभावानंगीकारे समानपरिमाण-सूत्रत्रयनिर्म्मितरज्जुवत् त्रिवृत्करणम् एकमेव स्यात्, नतु तिसृणां पृथक् पृथक् त्रिवृत्करणम् इति; एवं हि गुणप्रधानभावेन 'इदं तेजः', 'इमाः आपः' 'इदम् अन्नम्' इत्येवं पृथङ्नामप्रत्ययलाभः स्यात्; सति च पृथङ्नाम-प्रत्ययलाभे पृथक्पृथक्तया सम्यग्व्यवहारस्य अपि उपपत्तिः स्यात्—इत्येवम् ईक्षित्वा सा सद्रूपा देवता सूर्यबिम्बवत् जीवात्मरूपेण एतासां तिसृणां देवतानाम् अन्तः प्रविश्य नामरूपव्याकरणार्थं तासां देवतानाम् एकैकां त्रिवृतं त्रिवृतम् अकरोत् तथाहि सा सद्रूपा देवता प्रथमं वैराजं पिण्डम्=समष्टिभूतविराजः देहम्, देवादीनां च पिण्डान् अनुप्रविश्य यथासंकल्पमेव नामरूपे व्याकरोत्—असौनामा अयम् इदंरूपः अयम् इति। यतः सा देवता एवं सृष्टानां तिसृणां देवतानां—तेजोऽबन्नात्मिकानां मध्ये एकैकां देवतां त्रिवृतं त्रिवृतं त्रिरूपं त्रिरूपम् अकरोत् अतएव वैराजात् पिण्डात् बहिरपि इमाः तिस्रः देवताः त्रिवृत् त्रिवृत् एकैका भवति इत्येतद् उदाह्रियते। यदग्नेः आदित्यस्य चन्द्रमसः विद्युतो वा रोहितं रूपम्, तेजसः तद्रूपम्, यत् शुक्लम् तदपाम्, कृष्णं तत् अन्नस्य, अबन्नविषयाण्यपि उदाहरणानि एवमेव द्रष्टव्यानि।

एवं सर्वं जगत् त्रिवृत्कृतमिति सर्वत्र अग्न्यादिषु इव त्रीणि रूपाणि इत्येव सत्यम्। इमास्तिस्रः देवताः पुरुषं शिरःपादादि-लक्षणं कार्यकारणसंघातं च प्राप्य पुरुषेण उपयुज्यमानाः त्रिवृत् त्रिवृत् एकैकाः भवन्ति। एतत् च आध्यात्मिकं त्रिवृत्करणमुच्यते। तथाहि—अन्नमशितं त्रेधा विधीयते, तस्य यः स्थविष्ठो धातुस्तत् पुरीषं भवति, यो मध्यमस्तन्मांसं योऽणिष्ठः तन्मनः। आपः पीताः त्रेधा विधीयन्ते, तासां यः स्थविष्ठो धातुस्तत् मूत्रं भवति यो मध्यमस्तत् लोहितं योऽणिष्ठः स प्राणः। तेजोऽशितं त्रेधा

विधीयते तस्य यो स्थविष्ठो धातुस्तत् अस्थि भवति यो मध्यमः सा मज्जा योऽणिष्ठः सा वाक्। एवं सर्वत्रापि त्रिवृत् कृतत्वं द्रष्टव्यम् ।

ननु श्रुत्यन्तरेषु आत्मनः आकाशः सम्भूतः आकाशात् वायुः ततः तेजः[४८] इत्येवम् आकाशादिभूतपञ्चकसृष्टिं प्रदर्श्य भूतपञ्चकानां पञ्चीकरणमुक्तम्। तत् कथमत्र आकाशं वायुं च परिवर्ज्य भूतत्रयस्यैव सृष्टिम् उक्त्वा त्रिवृत्करणम् उक्तम्? उच्यते—भूतत्रयसृष्टिश्रुत्या श्रुत्यन्तरसिद्धाकाशादिसृष्टेः यथा उपलक्षणम्, तथा त्रिवृत्करणश्रुत्या च पञ्चीकरणमपि उपलक्षितम्। तथा च श्रुत्यन्तरसिद्धयोः आकाशवाय्वोः—तेजःप्रभृतिषु अन्तर्भावम् अभिप्रेत्य लघूपायेन सर्वस्य सन्मात्रत्वं मन्तव्यम् इति मन्वाना श्रुतिः त्रिवृत्करणमेव आचक्षते। एवं रूपवद्द्रव्ये आकाशवाय्वोः अपि अवस्थानात् रूपवतां त्रयाणां तेजोऽबन्नानां त्रिवृत्करणप्रदर्शनेन सर्वं तदन्तर्भूतं सद्विकारत्वात् त्रीण्येव रूपाणि विज्ञातं मन्यते श्रुतिः। अथवा रूपवतामपि त्रिवृत्करणम् प्रदर्शयितुं मन्यते श्रुतिः। यथा त्रिवृत्करणे त्रीणि रूपाणि इत्येव सत्यम् तथा पंचीकरणेऽपि समानन्यायः। यदा पञ्चापि भूतानि प्रत्येकं द्वेधा विभज्य पुनरेकैकं भागं चतुर्धा कृत्वा स्वभागातिरिक्तेषु पूर्वेषु भागेषु एकैकशो निक्षिप्यते तदा पञ्चीकरणं श्रुत्युपलक्षितं लभ्यते तत्रापि पञ्चानां भागानां पृथक्करणे पञ्चैव तन्मात्राणि अवशिष्यन्ते, तान्यपि पृथिव्यादीनि एव अबादिकार्यत्वात् तत् तत् कारणव्यतिरेकेण न सिध्यन्ति इति त्रिवृत्करणवत् पञ्चीकरणेऽपि न्यायसाम्यम् इति भावः।

८. दृष्टिसृष्टिवादः

मण्डनमिश्राणां मते सर्वं द्वैतजालम् अविद्याकल्पनामात्रम्। एकम् अद्वितीयम् आत्मचैतन्यम् अविद्यावशात् नानाजीवरूपेण

जगद्रूपेण ईश्वररूपेण च प्रतिभासते। रज्जुसर्पस्य तज्ज्ञानस्य च यथा एकस्माद् एव अज्ञानात् उत्पत्तिः, तथा जीवः, जगत्, तज्ज्ञानं च एकस्माद् एव अनाद्यज्ञानात् उत्पद्यते। एतन्मते सर्वं दृश्यं प्रपञ्चजालं प्रातिभासिकं, अतएव च साक्षिभास्यम्। व्यावहारिकी सत्ता न कस्यापि स्वीक्रियते। अस्माकं ज्ञाने अविद्या-वशात् ज्ञेयं वस्तु प्रतिभासते इति कृत्वा विषयः अस्तीति व्यवह्रि-यते। वस्तुतस्तु दृष्टेः ज्ञानाद्वा बहिः न कस्यापि वस्तुनः अस्तित्वम्, अस्ति। दृष्टौ ज्ञाने प्रतिभासमानत्वम् एव अस्तित्वम्, यन्न ज्ञाने प्रतिभासते तन्नास्ति। मण्डनमिश्राणां मते जीवस्य एतत् मिथ्याविषयदर्शनम् एव मिथ्याविषयसृष्टेः मूलम्। जाग्रद्-ज्ञानम् अपि स्वाप्नज्ञानतुल्यम्। स्वाप्नविषयाः यथा मानस-कल्पिताः जाग्रद्विषयाः अपि तथैव अविद्याकल्पिताः। ब्रह्मणः जीवभावः मिथ्या, ब्रह्मैव सत्यम्। जीवस्य मिथ्यात्वेन विषयदर्शन-विषयभोगादेरपि मिथ्यात्वम्। एवं च यावदेव जीवस्य मिथ्या-विषयदर्शनम्, तावदेव दृश्यप्रपञ्चस्य अस्तित्वम् द्रष्टुः जीवस्य अभावे दृश्यप्रपञ्चस्यापि अभावः। एवं च जीवस्य दृष्टिरेव विश्व-सृष्टेः कारणम् इति अयं मतवादः दृष्टिसृष्टिवादः इति उच्यते। केवलम् अहमभिमानी द्रष्टा जीव एव सक्रियः प्राणवान् च, तद्भिन्नं सर्वं जीवजातं सर्वं च जगत् स्वाप्नविषयवत् निर्जीवं निःसारम् च। तथा च द्रष्टुः जीवाद् अन्यः न कोऽपि जीवः इति अयम् एकजीव-वाद इत्युच्यते।

वाचस्पतीनां मतेऽपि इदं विश्वविरचनम् जीवगताविद्यायाः विलासमात्रम्, अतएव च असत्यम्। तदुक्तम् अमलानन्दस्वामिभिः "जीवभ्रान्तिनिमित्तं तद्वभाषे भामतीपतिः" इति[10] वाचस्पतीनां मते पूर्वपूर्वविभ्रमसंस्कारः एव अविद्यायाः मूलम्। पूर्वतनभ्रम-संस्कारात् अध्यासः, अध्यासाश्च संस्काराः इत्येवम् अध्यासविभ्रम-संस्कारयोः चक्रम् अनादिकालाद् आरभ्य आवर्तते। तेन च जीवः

स्वीयसंस्कारानुरूपं दृश्यजगत्प्रपञ्चं निर्मिमीते आविद्यकदृष्टि-विभ्रमः एव दृश्यप्रपञ्चसृष्टेः मूलम्। उपाधिभेदेन च जीवानां बहुत्वात् अविद्या अपि प्रतिजीवं विभिन्ना, अविद्यासंस्कारवशात् उत्पन्नः दृश्यविश्वप्रपञ्चोऽपि प्रतिजीवं विभिन्नः। तथापि आविद्यकसृष्टि सृष्टवस्तुजातं च अधिकृत्य जीवानां ज्ञानं सादृश्यवशात् तुल्यरूपेणैव उदेति। अतएव गोदर्शनात् अश्वदर्शनात् वा सर्वेषाम् एकरूपा एव बुद्धिः उदेति। न चैतत् असम्भवेति वाच्यम्, भ्रान्तदर्शिभिः शुक्तौ पृथक्त्वेन आविद्यकरजते सृष्टे अपि यथा एकरूपायाः एव बुद्धेः उदयः दृश्यते तथा व्यावहारिकवस्तुषु अपि तुल्यत्वसम्भवात्।

ननु, वाचस्पतीनां मते विश्वसृष्टेः जीवगताविद्यायाः विलास-मात्रत्वे जीवगतभ्रममात्रत्वे वा 'लोकवत्तु लीलाकैवल्यम्'[५१] इति सूत्रे कथं नाम विश्वसृष्टिः परमेश्वरस्य लीलामात्रत्वेन प्रदर्शिता सूत्रकारैः। उच्यते—आप्तकामः परमेश्वरः क्रीडावशात् सृष्टिचक्रं प्रवर्तयति। यथा कश्चन पुरुषः स्वीयप्रतिबिम्बस्य ऋजुवक्रादिकाः क्रिया दृष्ट्वा मोदते तथैव परमेश्वरोऽपि जीवस्य सृष्टिलीलां दृष्ट्वा आनन्दम् अनुभवतीति। तदुक्तं कल्पतरुकारैः तत्रैव "प्रतिबिम्बगताः पश्यन् ऋजुवक्रादिकाः क्रियाः। पुमान् क्रीडेद् यथा ब्रह्म तथा जीवस्यविक्रियाः॥" इति। वाचस्पतीनां मतमिदं दृष्टिसृष्टिवादत्वेन कैश्चित् व्याख्यातम्। परं तु नैतत् समीचीनम्। न हि तैः मण्डनमिश्रवत् ज्ञानकाले एव ज्ञेयविषयस्य सत्ता स्वीकृता। तेषां मते अज्ञातावस्थायाम् अपि विषयस्य सत्त्वं स्वीकरणीयम्। अतएव जगत्प्रपञ्चस्य व्यावहारिकसत्यत्वम् अपि तैः अङ्गीकृतम्। दृष्टिसृष्टिवादे तु ज्ञेयस्य ज्ञानकाले एव सत्ता स्वीक्रियते। अपि च उपाधिभेदेन जीवानां बहुत्वं वाचस्पतिमिश्रैः स्वीकृतम्। न हि बहुजीववादे दृष्टिसृष्टिवादः उपपद्यते।

दृष्टिसृष्टिवादे स्वीकृते सति प्रत्यक्षज्ञानस्य ज्ञेयविषयादीनां च विभ्रममात्रत्वम् इति वेदोक्तयागयज्ञादीनां स्वर्गादीनां च मिथ्यात्वं स्यात्, तेन च वेदस्य अप्रामाण्यम् अपि। अतएव चित्सुखाचार्य्यादिभिः दृष्टिसृष्टिवादः न समर्थितः। तेषां मते परमेश्वरसृष्टम् इदं जगत् न जीवस्य दृष्टिविभ्रममात्रम्, अस्य व्यावहारिकसत्यत्वमपि अवश्यं स्वीकरणीयम्। सगुणः मायामयः परमेश्वरः इदं आपेक्षिकसत्यरूपं जगत् सृजति। तच्च जीवानां दृष्टिगोचरं भवति, इति अयं मतवादः सृष्टिदृष्टिवादः इत्युच्यते। सर्वज्ञात्ममुनिभिः अपि यद्यपि जडजगतः मिथ्यात्वम् अङ्गीकृतं तथापि तस्य मानसकल्पनाप्रसूतत्वं न स्वीकृतम्, प्रात्यहिकजीवने प्रत्यक्षादिप्रमाणगोचरत्वेन तस्य व्यावहारिकसत्तायाः अवश्यमेव अङ्गीकरणीयत्वात्।

९. प्रलय-चातुर्विध्यम्[५२]

प्रलयः नाम त्रैलोक्यविनाशः, भूरादिलोकत्रयस्य लयः वा। लयश्च स्वकारणे सूक्ष्मरूपेण अवस्थानम्। यथा महाप्रलयाधिष्ठानत्वं ब्रह्मणः, एवं सुषुप्त्यधिष्ठानत्वम् अपि तस्यैव, 'सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति'[५३] इति श्रुतेः। स प्रलयः चतुर्विधः—नित्यः, प्राकृतः, नैमित्तिकः आत्यन्तिकश्चेति। तथा च उक्तम्—"नैमित्तिकः प्राकृतिकस्तथैवात्यन्तिको द्विजाः। नित्यश्च सर्वभूतानां प्रलयोऽयं चतुर्विधः॥" इति।

वस्तुतस्तु प्रलयः त्रिविधः—आवरणशक्तिमदज्ञानात्मना अवस्थानम्, शक्तिद्वयवदज्ञानात्मना अवस्थानम्, ब्रह्मभावश्च। तत्र आद्यः व्यष्टिजीवापेक्षया नित्यः, समष्टिजीवापेक्षया नैमित्तिकः इति द्विविधः, द्वितीयः प्राकृतः, तृतीयश्च आत्यन्तिकः इति साकल्येन प्रलयस्य चातुर्विध्यम्।

तत्र नित्यः=प्रत्यहं जायमानः प्रलयः सुषुप्तिः। 'यदा सुप्तः स्वप्नं न कञ्चन पश्यति अथ अस्मिन् प्राणे एव एकधा भवति तदा एनं वाक् सर्वैः नामभिः सह अप्येति, चक्षुः सर्वैः रूपैः सह अप्येति, श्रोत्रं सर्वैः शब्दैः सह अप्येति, मनः सर्वैः ज्ञानैः सह अप्येति'[५६], 'सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति' 'इमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विदन्ति'[५] इत्यादि श्रुतयः सुषुप्तिकाले सर्वेषां कार्य्याणां कारणात्मना अज्ञानात्मना लयं बोधयन्ति। तथा च सुषुप्तिः सकलकार्य्यप्रलयरूपा अज्ञानकार्य्यलिङ्ग-शरीरप्रविलयरूपा इति तस्याः प्रलयत्वम्। 'सुषुप्तिकाले सकले विलीने' इत्यादिश्रुतौ च सुषुप्तिकाले सकलप्रपञ्चलयः श्रूयते। अयं च लयः आवरणशक्तिमदज्ञानात्मना अवस्थानम् इति बोद्धव्यम्। अत एव 'न किञ्चित् अवेदिषम्' इति प्रतीतिः, न तु 'न किञ्चित् अस्ति' इति।

न च सुषुप्तेः अपि मूलाविद्यारूपत्वं वाच्यम्, सुप्तोत्थितस्य सुखदुःखाद्यनुपपत्तेः। सुषुप्तौ हि सुखदुःखस्मरणादिकारणानां धर्माधर्मपूर्वसंस्काराणां च सूक्ष्मरूपेण कारणात्मना अविद्यात्मना वा अवस्थानम् इति तेषां सावशेषः लयः, न निरवशेषः। तेन सुप्तोत्थितस्य प्राचीनसुख-दुःखादीनाम् अनुभवः, स्मरणं च उपपद्यते। ननु सुषुप्तौ अन्तःकरणादीनां स्वरूपतः एव भानम् इति स्वीकरणीयम्, न तु अज्ञानात्मना। सुषुप्तौ अन्तःकरणस्य तथाऽभ्युपगमे हि अन्तःकरणाधीनश्वासादिक्रियाणाम् अनुपपत्तिः स्यात् इति चेत्। उच्यते—सुप्तपुरुषस्य 'न किञ्चित् अवेदिषम्' इति अज्ञानमात्रस्यैव प्रतीतेः वस्तुतः न श्वासादेः भानम् अस्ति। तदुपलब्धिस्तु पुरुषान्तरविभ्रममात्रम्। न चैवं सुषुप्तस्य मृतादविशेषः, सुषुप्तस्य हि लिङ्गशरीरं संस्कारात्मना इहलोके एव वर्त्तते, मृतस्य तु लोकान्तरे इति वैलक्षण्यात्। यद्वा अन्तःकरणस्य द्वे शक्ती=ज्ञानशक्तिः

क्रियाशक्तिः चेति। तत्र ज्ञानशक्तिविशिष्टस्य अन्तःकरणस्य एव सुषुप्तौ विनाशः, न तु क्रियाशक्तिविशिष्टस्य इति, प्राणाद्यवस्थानम् अविरुद्धम्।

प्राकृतप्रलयस्तु कार्यब्रह्मविनाशनिमित्तकः सकलकार्यविनाशः। आवरणविक्षेपशक्तिद्वयविशिष्टाज्ञानं प्रकृतिः इति उच्यते। कार्य्य-प्रपञ्चस्य तदात्मना अवस्थानं प्राकृतः प्रलयः। स च प्रलयः कार्यब्रह्महिरण्यगर्भविनाशानन्तरं भवति। तथा च कार्यब्रह्म-विनाशानन्तरं तदधिष्ठितब्रह्माण्डवर्तिनिखिलभूतभौतिकादीनां केवलप्रकृत्यात्मना अवस्थानं प्राकृतः प्रलयः। न च सुषुप्तौ अति-व्याप्तिः, सुषुप्तौ अवस्थाज्ञानात्मना ब्रह्मण्येव अवस्थानात् सुषुप्तेः कर्मादिनाशजन्यत्वात् च। अस्मिन् प्रलये 'असदेवेदमग्र आसीत्'[५६], 'नासदासीन्नसदासीत्'[५७] 'तद्धेदं तर्ह्यव्याकृतमासीत्'[५८] इत्यादि श्रुतिः, "द्विपरार्द्धे त्वतिक्रान्ते ब्रह्मणः परमेष्ठिनः। तत्र प्रकृतयः सप्त कल्प्यन्ते प्रलयाय हि॥ एष प्राकृतिकः राजन् प्रलयो यत्र लीयते"॥ इति पद्मपुराणवचनं च मानम्। अयं च प्राकृतप्रलयः न हिरण्य-गर्भाद्दृष्ट्या किन्तु अज्ञानिदृष्ट्या। तथाहि—यदा प्रलयात् पूर्वमेव उत्पन्नब्रह्मसाक्षात्कारस्य कार्यब्रह्मणः हिरण्यगर्भस्य प्रारब्धकर्म-समाप्तौ विदेहकैवल्यात्मिका परममुक्तिः तदा तल्लोकवासिनामपि उत्पन्नब्रह्मसाक्षात्काराणां कार्यब्रह्मणा सह विदेहकैवल्यम्। तथा च स्मृतिः—"ब्रह्मणा सह ते सर्व्वे सम्प्राप्ते प्रतिसञ्चरे। परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्"॥ इति। एवं तल्लोकवासिभिः सह कार्यब्रह्मणि मुच्यमाने कार्यब्रह्माधिष्ठितब्रह्माण्डान्तर्वर्तिनां चतुर्द-शलोकानां तदन्तर्वर्तिनां स्थावरादीनां पृथिव्यादिभूतविकाराणां पृथिव्यादिभूतानां च प्रकृतौ मायायां परिणाम्युपादाने लयः भवति, न तु ब्रह्मणि। न च ब्रह्मणोऽपि उपादानत्वात् तत्रैव लयः अस्तु इति वाच्यम्, "अधिष्ठानावशेषो हि नाशः कल्पितवस्तुनः"[५९]"

इति उक्तेः, बाधरूपविनाशस्यैव ब्रह्मरूपत्वेन, प्रकृतिविनाशानन्तरकालिकत्वात् ब्रह्मभावस्य। अतः अत्र लयस्य प्रकृतिनिष्ठत्वात् अयं प्राकृतप्रलयः इति उच्यते।

कार्यब्रह्मणः दिवसावसाननिमित्तकः त्रैलोक्यमात्रप्रलयः नैमित्तिकप्रलयः। नैमित्तिकप्रलये च "एष नैमित्तिकः प्रोक्तः प्रलयो यत्र विश्वसृक्। शेतेऽनन्तासने नित्यमात्मसात्कृत्य चाखिलम्" इत्यादि पद्मपुराणवचनं प्रमाणम्। अत्र "यदा स्वपिति शान्तात्मा तदा सर्वं निमीलति" इति मनुवचनबलात् समष्टिजीवात्मकस्य हिरण्यगर्भस्य सुषुप्तिः एव नैमित्तिकः प्रलयः, अस्मिन् प्रलये आवरणशक्तिमदज्ञानात्मनैव सर्वस्य प्रपञ्चस्य अवस्थानम्। तथा च त्रैलोक्यमात्रस्य इति मात्रपदं यावदर्थकम्। सर्वकार्य्यविनाशः नैमित्तिकप्रलयः इति। एतत् व्याख्यानं न युक्तम् इति केचित्। तेषां मते कार्य्यब्रह्मणः=प्रजापतेः विराजः दिवसावसानात् हेतोः भूरादिलोकत्रयस्य प्रलयः, न तु महरादिलोकस्य। तत्र "ब्राह्मो नैमित्तिको नाम तस्यान्ते प्रतिसञ्चरः। तदा विदह्यते सर्वं त्रैलोक्यं भूर्भुवादिकम्। जनं प्रयान्ति तापार्ता महर्लोकनिवासिनः।" इति-विष्णुपुराणवचनं प्रमाणम्। तदुक्तम्—"अत्र महर्लोकस्य तापितत्वेन निर्जनत्वे अपि अनाशात् जनलोकादौ च तापितत्वस्य अभावात् न विराजः सम्पूर्णस्य लयो दैनन्दिनप्रलये, किन्तु चतुर्दशभुवनैकदेशावच्छिन्नस्य" इति न्यायरत्नावल्याम्। ब्रह्मणः दिवसः चतुर्युगसहस्रपरिमितः कालः। "चतुर्युगसहस्रं तु ब्रह्मणः दिनमुच्यते" "कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगम्। प्रोच्यते तत् सहस्रं तु ब्रह्मणो दिवसो मुने।" इत्यादिवचनात्। प्रलयकालः अपि दिवसकालपरिमितः, रात्रिकालस्य दिवसतुल्यत्वात्।

तुरीयप्रलयस्तु ब्रह्मसाक्षात्कारिनिमित्तकः सर्वमोक्षः=परमात्मनि सर्वेषाम् अविद्यातत्कार्याणां लयः। आत्यन्तिकलये

अविद्यायाः अपि लयात् परमात्मन्येव सर्वेषां लयः, "ज्ञानमात्यन्तिकः प्रोक्तो योगिनः परमात्मनि। प्रलयः प्रतिसर्गोऽयं कालचिन्तापरैर्द्विजैः" इति स्मृतेः।

यद्यपि प्राकृतप्रलये अपि ब्रह्मदृष्ट्या आत्यन्तिकः प्रलयः वर्तते, तथापि पारिभाषिकः व्यवहारः सर्वमोक्षः एव आत्यन्तिकः प्रलयः इति। स च सर्वमोक्षः एकजीववादे युगपदेव। जीवो नाम अविद्याप्रतिबिम्बितं चैतन्यम्। स च एकः, तदुपाधेः अविद्यायाः एकत्वात् इति एकजीववादिनः। तेषां मते एकस्य तत्वज्ञानेन एकदेव अज्ञानतत्कार्य्याणां नाशात् युगपदेव सर्वेषां मोक्षः भवति। अन्ये तु अन्तःकरणानां जीवोपाधित्वम् अङ्गीकुर्वाणाः बहुजीववादम् आतिष्ठन्ते। तेषां मते क्रमेणैव मोक्षः भवति। तथा च एकस्य तत्वज्ञानेन न कृत्स्नस्य अज्ञानस्य नाशः, अज्ञानस्य सांशत्वात् एकस्य ज्ञानेन एकांशस्य नाशेऽपि अंशान्तराणां वर्त्तमानत्वात्। एकैकक्रमेण सर्वेषां तत्त्वज्ञाने जाते क्रमेणैव अज्ञानतत्कार्य्याणां नाशात् क्रमेणैव जीवानां मोक्षः, न युगपत्। "सर्व एकीभवन्ति" इत्यादिश्रुतिः आत्यन्तिकप्रलये प्रमाणम्। सर्वे पदार्थाः परमात्मस्वरूपतां सम्पद्यन्ते इति श्रुतेः अर्थः।

एतेषु चतुर्षु प्रलयेषु आद्याः त्रयः कर्मोपरमनिमित्ताः। तत्र स्थूलसूक्ष्मशरीराभिमानिनः व्यष्टिजीवस्य स्वप्न-जाग्रद्-भोगप्रदकार्योपरमः नित्यप्रलयनिमित्तम्। समष्टिसूक्ष्मशरीराभिमानिनः हिरण्यगर्भस्य, मतान्तरेण स्थूलशरीराभिमानिनः विराजः जाग्रद्भोगप्रदकर्मोपरमः नैमित्तिकप्रलयनिमित्तम्। हिरण्यगर्भस्य प्रारब्धकर्मोपरमः प्राकृतप्रलयनिमित्तम्। अत्र सर्वत्रैव अज्ञानातिरिक्तकार्य्यस्य लयः, नाज्ञानस्य। तुरीयस्तु प्रलयः ज्ञानोदयनिमित्तः। तत्त्वसाक्षात्कारेणैव तुरीयः प्रलयः इत्यर्थः। अत्र अज्ञानेन सह सकलकार्य्यस्य लयः इति पूर्वेभ्यः विशेषः।

उद्धृतिसूचिका

१. अ. सि. ४८-९३
२. श. भा. ब्र. सू. २. २. २८
३. मा. का. ३. ३१
४. श. भा. ब्र. सू. २. २. १४
५. श. भा. छा. उ. ६. १. २
६. श. भा. छा. उ. ६. १. २
७. ब्र. सू. २. २. २८
८. श. भा. ब्र. सू. २. १. १४
९. वे. सा. १०९
१०. सूत. सं. ४. २८
११. अ. सि. ४८–२३२
१२. प. पा. २३
१३. अ. सि. ९४
१४. चि. सु. ५६
१५. अ. सि. ९४
१६. चि. सु. ५६
१७. चि. सु. ६७
१८. अ. सि. १८२
१९. वे. प. १३३
२०. अ. सि. १८२–३
२१. अ. सि. १६०
२२. अ. सि. १९५
२३. अ. सि. २३३–२३७
२४. अ. सि. ३२३
२५. ब्र. सू. २. १. १४
२६. अ. सि. ३०
२७. मु. १. १६
२८. चि. सु. ६९
२९. अ. सि. ३२३
३०. अ. सि. ३२३
३१. चि. सु. ६९
३२. तै. उ. २. १. १
३३. बृ. उ. ४. ४. १९
३४. क. उ. १. ४. ११
३५. अ. सि. २०७–२२२
३६. अ. सि. २१०–२१३
३७. वे. प. २३७–२४९
३८. श्वे. उ. १. ३
३९. छा. उ. ६. २. ३
४०. तै. उ. २. ६
४१. ऐ. उ. ४. १. २
४२. तै. उ. २. १
४३. तै. उ. ३. १
४४. सांख्यकारिका. १२
४५. प. द. १. २७
४६. ब्र. सू. २. ४. २२
४७. छा. उ. ६
४८. तै. उ. २. १
४९. अ. सि. ५३३–४२
५०. क. त. २. १. १९

५१. ब्र. सू. २. १. ३३
५२. वे. प. २४९–२६१
५३. छा. उ. ६. ८. १
५४. कौ. उ. ३. ३
५५. छा. उ. ८. ३. २
५६. छा. उ. ३. १९. १
५७. ऋ. वे. १०. ११. १२९
५८. बृ. उ. १. ४. ७
५९. सूत सं. ४. २. ८

षष्ठः परिच्छेदः

१. मोक्षस्वरूपम्[1]

निरतिशयसुखावाप्तिः शोकनिवृत्तिश्च मोक्षः। सुखं हि द्विविधम्—सातिशयं निरतिशयं च। सातिशयं सुखं स्रक्चन्दनादिविषयसम्बन्धजनितान्तःकरणवृत्तितारतम्यकृतः आनन्दलेशस्य आविर्भावविशेषः, 'एतस्यैवानन्दस्य अन्यानि भूतानि मात्रामुपजीवन्ति'[2] इति श्रुतेः। निरतिशयसुखं च ब्रह्मैव, 'आनन्दो ब्रह्मेति व्यजानात्'[3], 'विज्ञानम् आनन्दं ब्रह्म'[4], 'यदेष आकाश आनन्दः'[5] इत्यादि श्रुतेः। एतन्निरतिशयानन्दात्मकब्रह्मावाप्तिः ब्रह्मात्मत्वस्फुरणं वा मोक्षः। ब्रह्मात्मकोऽपि जीवः स्वाविद्यया आवृतः स्वं रूपं ब्रह्मात्मकं न जानाति। यदा त्वस्य तत्त्वज्ञानोदयः तदा अज्ञाननिवृत्त्या स्वरूपस्य ब्रह्मात्मैक्यस्य प्रकाशो भवति, सोऽयं प्रकाशो ब्रह्मावाप्तिः इति गीयते। स एव च मोक्षः, ब्रह्मरूपश्च।

ननु, आनन्दात्मकब्रह्मप्राप्तिः न मोक्षः, तस्याः नित्यत्वेन तद्रूपस्य मोक्षस्य तत्त्वज्ञानासाध्यत्वप्रसङ्गात्, सर्वैः तीर्थंकरैः मोक्षस्य तत्त्वज्ञानसाध्यत्वाभ्युपगमात्, अविद्यानिवृत्तेश्च मोक्षत्वाभ्युपगमात् 'अविद्यास्तमयो मोक्षः सा च बन्ध उदाहृतः' इत्युक्तेः इति चेत्। उच्यते—शोकनिवृत्तिश्च मोक्षः। अविद्याजनितशोकस्य निवृत्तिः अपि मोक्षः इत्यर्थः। तथा च अविद्यानिवृत्त्युपलक्षितनित्यानन्दब्रह्मस्वरूपप्रकाशस्य मोक्षत्वं, न केवलस्य ब्रह्मणः। एवं च नित्यानन्दब्रह्मप्रकाशस्य नित्यतया असाध्यत्वे अपि तादृशोपलक्षितब्रह्मात्मकमोक्षस्य नासाध्यता, उपलक्षणसाध्यतयैव तत्साध्यत्वोपपत्तेः।

मोक्षस्य आनन्दात्मकब्रह्मरूपत्वे च 'ब्रह्मविद् ब्रह्मैव भवति' इत्यादिश्रुतिः मानम्, दुःखनिवृत्तिरूपत्वे च 'तरति शोकमात्मवित्' 'तत्र को मोहः कः शोकः एकत्वमनुपश्यतः' इत्यादिश्रुतिः मानम्।

न चायं मोक्षः लोकान्तरावाप्तिः। "तथाहि—'सालोक्यमथ सारूप्यं सार्ष्टिः सामीप्यमेव च। सायुज्यं चेति मुनयो मुक्तिं पञ्चविधां विदुः।' इति पञ्चविधमोक्षाणां मध्ये सालोक्यादिचतुष्टयानां न मोक्षत्वम्, सुखदुःखाभावरूपत्वाभावात्, सायुज्यस्य तु निर्वाणाख्यस्य मुख्यं मोक्षत्वम्, 'ब्रह्म वेद ब्रह्मैव भवति' इत्यादिश्रुतेः। सालोक्यादिचतुष्टयानां तु बाह्यदुःखाभावमात्रसाम्यात् गौणत्वेनैव मोक्षत्वव्यपदेशः।

ननु, आनन्दावाप्तेः अनर्थनिवृत्तेर्वा सादित्वे साध्यत्वे वा तस्याः कृतकत्वेन अनित्यतया क्षये मुक्तानां पुनरावृत्त्यापत्तिः, अनादित्वे नित्यत्वे वा तस्याः असाध्यतया मोक्षमुद्दिश्य तत्साधकश्रवणादौ प्रवृत्त्यनुपपत्तिः इति चेत् न, सिद्धस्यैव ब्रह्मरूपस्य मोक्षस्य असिद्धत्वभ्रमेण उपपत्तेः। तथा च नाद्यपक्षोक्तदोषावकाशः, असिद्धत्वपक्षे एव तत्प्रसरात्। नापि द्वितीयपक्षोक्तदोषः, साधनप्रवृत्तौ प्रतिबन्धकस्य सिद्धत्वज्ञानस्य अभावात्। एवं च मोक्षसाधने प्रवृत्तिः उपपद्यते। प्रवृत्तौ हि कारणम् इष्टसाधनताज्ञानम्। तच्च 'नाहं ब्रह्म' इति भ्रमवतः पुरुषस्यापि सम्भवति—श्रवणं मम इष्टसाधनम् इति। अतो न तस्य प्रवृत्त्यनुपपत्तिः इति भावः।

ननु, अकृतश्रवणानां पुंसां तादृशभ्रमसम्भवेऽपि कृतश्रवणानां तादृशभ्रमो नैव स्यात्, तेषां सिद्धत्वज्ञानसद्भावात् तथा च न तेषां श्रवणादौ प्रवृत्त्युपपत्तिः इति चेत्। न, 'नाहं ब्रह्म' इति प्रत्यक्षविरोधेन तादृशसिद्धत्वज्ञानस्य प्रामाण्यानिश्चयात तादृशभ्रम-

सम्भवात्, अविद्योच्छेदोपलक्षितस्य पूर्णानन्दरूपस्य आत्मनो मोक्षत्वात् तस्य स्वरूपतः असाध्यत्वे अपि उपलक्षणसाध्यतयैव साध्यत्वसम्भवात्, तत्साधने प्रवृत्त्युपपत्तेः। अतएव "प्राप्तप्राप्तिरूपतया फलस्य आनन्दप्रकाशस्य स्वरूपतः असाध्यत्वे अपि तद्विरोधायकाज्ञाननिवर्त्तकवृत्तेः साध्यत्वमात्रेण साध्यत्वोपपत्तेः"[९] इति अद्वैतसिद्धिकाराः। "आनन्दप्रकाशस्य फलत्वं न जन्यत्वम्, किन्तु व्यङ्ग्यत्वम्। तच्च जन्यस्य आवरणनाशस्य आश्रयत्वम्। तत्र नाशो यदि उक्तात्मस्वरूपः, तदा उपलक्षणस्य जन्यत्वात् जन्यत्वम्। अथ वृत्तिरेव, तदा सा जन्यैवेति"[१०] इति च लघुचन्द्रिकाकाराः।

ननु, अस्तु ब्रह्मरूपायाः मुक्तेः नित्यत्वात् सिद्धत्वम्। शोकनिवृत्तिरूपायाः मुक्तेस्तु न सिद्धत्वम्, तस्याः जन्यत्वात्। तथा च तस्याः जन्यत्वेन क्षयावश्यम्भावाद् मुक्तेः निवृत्तौ मुक्तस्य पुनरावर्त्ति-प्रसङ्गः इति चेत्। उच्यते—अविद्यारूपानर्थनिवृत्तिरपि अधिष्ठानभूतब्रह्मस्वरूपतया सिद्धैव। यथा लोके सकारणस्य रजतविभ्रमस्य निवृत्तिः ज्ञाता शुक्तिरेव, तथा अविद्यानिवृत्तिरपि अधिष्ठानभूतं ज्ञातं ब्रह्मैव, ध्वंसस्य अधिकरणरूपत्वात्, अधिकरणातिरिक्ताभावानभ्युपगमात्। एवं सति 'यस्मिन् सर्वाणि भूतानि आत्मैवाभूद् विजानतः'[११] 'यत्र त्वस्य सर्वमात्मैवाभूद्'[१२] इत्याद्याः श्रुतयः सर्वस्य द्वैतजातस्य आत्ममात्रतया प्रविलयम् उपपादयन्त्यः मुख्यार्थाः भवेयुः। तथा च अज्ञाननिवृत्तेः स्वरूपेण साध्यत्वे अपि ज्ञातत्वोपलक्षितात्मस्वरूपेण सिद्धत्वात् न तदुच्छेदः।

लोके अपि अनर्थनिवृत्त्यादेः सिद्धत्वं दृश्यते इति प्राप्तप्राप्तिपरिहृतपरिहारयोः प्रयोजनत्वं दृष्टमेव। यथा, स्वहस्तगतविस्मृतसुवर्णादौ 'तव हस्ते सुवर्णम्' इति आप्तोपदेशाद् अप्राप्तमिव प्राप्नोति जनः। यथा वा वलयितचरणायां स्रजि सर्पत्वभ्रमवतः पुंसः 'नायं सर्पः' इत्याप्तवाक्यात् परिहृतस्यैव सर्पस्य परिहारः

प्रसिद्धः। एवं प्राप्तस्य अपि आनन्दस्य प्राप्तिः, परिहृतस्यापि अनर्थस्य निवृत्तिः मोक्षः इति नानुपपत्तिः।

२. ज्ञानकर्मसमुच्चयविचारः[13]

मोक्षः ज्ञानैकसाध्यः, न तु उपायान्तरसाध्यः। तथा च (श्वे० ३।८) श्रुतिः "तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय"[14] इति। मोक्षप्राप्तये ज्ञानव्यतिरेकेण अन्यो मार्गो नास्तीत्यर्थः। अज्ञाननिवृत्तेः ज्ञानेनैकेन अधिष्ठानतत्त्वसाक्षात्कारमात्रेण वा साध्यत्वम् इति नियमाद् अपि मोक्षस्य ज्ञानैकसाध्यत्वम्। अज्ञानस्य ज्ञानेनैव विरोधात् कर्मणा विरोधाभावात्। रज्जुसर्पादिस्थले अधिष्ठानतत्त्वसाक्षात्कारमात्राद् एव रज्जुसर्पोपादानाज्ञानस्य तत्कार्यस्य रज्जुसर्पादिभ्रमस्य तत्प्रयुक्तस्य भयकम्पादेश्च निवृत्तिदर्शनात्। न हि ज्ञानकर्मणोः समुच्चयः स्वीकरणीयः, तयोः विरोधात्। मोक्षस्य अव्यवहितकारणं ज्ञानमेव। "तरति शोकमात्मवित्" "ब्रह्मविदाप्नोति परम्"[15] "आत्मा वा अरे द्रष्टव्यः"[16] 'एतावदरे खल्वमृतत्वम्'[17] इत्येवं जातीयका श्रुतिः केवलायाः विद्यायाः पुरुषार्थहेतुत्वं श्रावयति'। कर्मणस्तु मोक्षकारणत्वं निराकृतम्। 'न कर्मणा न प्रजया धनेन,'[18] 'नास्त्यकृतः कृतेन'[19] इत्यादिश्रुतिः, 'कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते' इत्यादिस्मृतिश्च कर्मणो मोक्षकारणतां निराकरोति इति नानयोः सहभावः। अपुनरावृत्तित्वव्याघाताच्च। मोक्षस्य कर्मसाध्यत्वे यत् कृतकं तत् अनित्यम् इति न्यायानुगृहीतया श्रुत्या तस्य अनित्यत्वापातेन मुक्तानां पुनरावृत्तौ अपुनरावृत्तिः व्याहता स्यात् इति नानयोः समुच्चयः।

अपि च अभ्युदयार्थिभिः कर्म अनुष्ठीयते मोक्षार्थिभिश्च ज्ञानम् इति भिन्नपुरुषानुष्ठेयत्वेन च ज्ञानकर्मणोः समुच्चयानुपपत्तिः।

तस्मात् केवलादेव ज्ञानात् मोक्ष इत्येषोऽर्थः निश्चितो गीतासु सर्वोपनिषत्सु च' ।

आचार्यशङ्कराणां मते ज्ञानिनः कर्मानुष्ठाने न किमपि प्रयोजनम् अस्ति। भेदज्ञानपूर्विका हि कर्मप्रवृत्तिः इति न सा अभेदज्ञानोदये स्थातुम् अर्हति। अतो नानयोः साहित्यं सम्भवति। ज्ञानिनः भेदबुद्धौ उपमर्दितायां सत्यां क्रियाकारकफलानां न सम्भावना अस्ति। सर्वं हि कर्म भेदबुद्धिपुरःसरं भवति। ज्ञानेन भेदबुद्धिनाशे तु न कर्म सम्भवति। अपि च कर्मफलानां तारतम्यमस्ति, ब्रह्मणि तु तत् नास्ति। तस्मात् मोक्षः अनुष्ठेयविलक्षणः नित्यश्च। ब्रह्मज्ञानं न पुरुषव्यापारतन्त्रम्, किन्तु प्रत्यक्षादिप्रमाणविषयकवस्तुज्ञानवत् वस्तुतन्त्रम् इति न तत्र क्रियाणाम् अनुप्रवेशः सम्भवति। विलक्षणफलत्वात् च कर्मज्ञानयोः न समुच्चयः। तथाहि उत्पत्त्याप्तिविकृतिसंस्कृतयः कर्मणां फलभूताः। मोक्षस्तु न उत्पाद्यः, कर्मफलस्य जन्यत्वेन मोक्षस्य उत्पाद्यत्वे अनित्यत्वप्रसङ्गात्। विकार्यत्वेऽपि तथैव अनित्यत्वप्रसङ्गः अपरिहार्य्यः। नापि आप्यः, ब्रह्मणः स्वात्मस्वरूपत्वेन सर्वगतत्वेन च नित्यमेव आप्तत्वात्। नापि संस्कार्य्यः, नित्यशुद्धस्य ब्रह्मणः दोषापनयने प्रयोजनाभावात्। अतः कर्मज्ञानयोः न समुच्चयः।[२०]

ननु 'अन्धं तमः प्रविशन्ति येऽविद्यामुपासते। ततो भूय इव ते तमो ये उ विद्यायां रताः[२१]॥' 'तपो विद्या च विप्रस्य निःश्रेयसकरं परम्। तपसा कल्मषं हन्ति विद्ययाऽमृतमश्नुते। तत् प्राप्तिहेतुर्ज्ञानञ्च कर्म चोक्तं महामुने।"[२२] इति श्रुतिस्मृतिवचनानि समुच्चितयोः ज्ञानकर्मणोः मोक्षसाधनत्वं प्रदर्शयन्ति इति चेत्। न, न्यायानुगृहीतबहुश्रुतिविरोधात् तद्वचनानाम् आरादुपकारकत्वप्रतिपादनपरत्वात्। अभ्युपगम्यते हि व्यवधानेन परम्पराक्रमेण वा कर्मणां मोक्षसाधनत्वम्।

तथाहि ब्रह्मसाक्षात्काररूपं ज्ञानं पापक्षयात् भवति। तथा च शब्दादिकारणसत्त्वे अपि प्रतिबन्धकस्य पापस्य सद्भावात् न ब्रह्मज्ञानोदयः, क्षीणे तु पापे तदुदयः। तथा चोक्तं—'ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्मणः" इति। स च पापक्षयः नित्यनैमित्तिककर्मानुष्ठानाद् भवति। तथा चोक्तम्—सन्ध्यामुपासते ये तु सततं संश्रितव्रताः। विधूतपापास्ते यान्ति ब्रह्मलोकमनामयम्॥ इति। मनुना च—'पूर्वां सन्ध्यां जपंस्तिष्ठन् नैशमेनो व्यपोहति। पश्चिमान्तु समासीनो मलं हन्ति दिवाकृतम्।" इति। याज्ञवल्क्येनापि—'निशायां वा दिवा वापि यदज्ञानकृतं भवेत्। त्रैकाल्यसन्ध्याकरणात् तत् सर्वं विप्रणश्यति॥' इति, 'प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत्' इति च। संक्षेपशारीरककारस्तु यज्ञादिशब्दाविशेषात् काम्यानामपि कर्मणां विद्योपयोगित्वम् आहुः।

ननु पापानां कर्मनाश्यत्वं न युक्तम्, तेषां फलभोगेन एव विनाश्यत्वात्, 'नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि' इति ब्रह्मवैवर्तपुराणवचनात् इति चेत्। मैवम्, कर्मणां पापनाशकत्वस्य शास्त्रसिद्धत्वात्, 'तरति सर्वं पाप्मानं तरति ब्रह्महत्याम्' इत्यादिवचनविरोधात्, 'नाभुक्तम्' इत्यादिवचनानां च प्रारब्धकर्ममात्रविषयत्वात्। तथा च कर्मानुष्ठानात् पापनिवृत्तिरूपा चित्तशुद्धिः, ततो विषयदोषदर्शनम्, ततो वैराग्यम् ततः श्रवणादिकम् इत्येवं परम्परया कर्मणां मोक्षे उपयोगः। एवं कर्मणां परम्परया मोक्षोपयोगित्वात् 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन अपसाऽनाशकेन'[२३] इत्यादि श्रुतिः सङ्गच्छते। अत्र यज्ञादिकर्मणां ज्ञानसाधनत्वं दर्शितम्, शब्दतः उपसर्जनस्यापि वेदनस्य स्वर्गादिवत् साध्यतया पुरुषार्थतया च यज्ञादिफलत्वेन साधनेन यज्ञादिना अन्वयोपपत्तेः। तत्र यज्ञादिकर्मणां ज्ञानसाधनत्वं नैव साक्षात्, किन्तु मलापकर्षणादिपरम्परया। यदि कर्मणां परम्परया अपि ज्ञानसाधनत्वं न स्यात्, तदा श्रुत्यभिहितं तेषां ज्ञानसाधनत्वम्, असङ्गतं स्यात्। तस्मात् परम्परया

तेषां ज्ञानसाधनत्वम् अभ्युपगन्तव्यम्। अतएव कर्माणि ज्ञानस्य बहिरङ्गसाधनानि। कर्मणां ज्ञानसाधनत्वे स्मृतिरपि प्रमाणम्—'कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्त्तते' इति। तस्मात् कर्मज्ञानयोः क्रमः एव स्वीकरणीयः, न तु समुच्चयः सहानुष्ठानं वा।

अत्र इदं ज्ञातव्यम्—काम्यकर्मनिष्कामकर्मभेदेन कर्मणः द्वैविध्यम्। तत्र काम्यकर्मणा ऐहलौकिकः पारलौकिकश्च अभ्युदयो भवति। एतत् काम्यकर्म न ज्ञानस्य सहायकम्, अपि तु विरोधि एव। निष्कामं तु कर्म न ज्ञानविरोधि, अपि तु फलाभिसन्धिवर्जितत्वेन चित्तनैर्मल्यसम्पादकत्वात् ज्ञानस्य सहायकम् एव। तथा च निष्कामकर्मणः चित्तशुद्धिः, चित्तशुद्धेः ज्ञाननिष्ठा, ज्ञाननिष्ठायाः ज्ञानप्राप्तिः, ज्ञानात् च मोक्षः इति ज्ञानस्य मुक्तौ अव्यवहितकारणत्वम्, कर्म तु ज्ञानस्य गौणं कारणम् इति मुक्तौ निष्कामकर्मणः परम्पराकारणत्वम् इति शङ्कराचार्य्याणां मतम्। तथा चोक्तं शङ्कराचार्य्यैः—"अभ्युदयार्थोऽपि यः प्रवृत्तिलक्षणो धर्मः वर्णाश्रमांश्च उद्दिश्य विहितः स च देवादिस्थानप्राप्तिहेतुरपि सन् ईश्वरार्पणबुद्ध्या अनुष्ठीयमानः सत्त्वशुद्धये भवति फलाभिसन्धिवर्जितः, शुद्धसत्त्वस्य च ज्ञाननिष्ठायोग्यताप्राप्तिद्वारेण ज्ञानोत्पत्तिहेतुत्वेन च निःश्रेयसहेतुत्वम् अपि प्रतिपद्यते" इति गीताभाष्ये[२८]। अनभिसन्धाय फलम् अनुष्ठितानि यज्ञादीनि मुमुक्षोः ज्ञानसाधनानि भवन्ति। यज्ञादिकर्मणां निष्कामत्वे एव विद्यासाधनत्वम्, सकामत्वे तु स्वर्गादिसाधनत्वम् इत्यर्थः। अस्ति च गीतावचनम्—योगिनः कर्म कुर्वन्ति संगं त्यक्त्वात्मशुद्धये[२९]। इति।

मोक्षसाधने कः कर्मणाम् उपयोगः इत्यत्र भामतीपन्थिनां विवरणपन्थिनां च मतभेदः अस्ति। तथा हि, कर्मणां विविदिषार्थत्वम् इति भामतीकाराः। तथा च भामत्याम्—'तमेतमात्मानं वेदानुवचनेन नित्यस्वाध्यायेन ब्राह्मणा विविदिषन्ति—वेदितुम्

इच्छन्ति, न तु विदन्ति, वस्तुतः प्रधानस्य अपि वेदनस्य प्रकृत्यर्थतया शब्दतो गुणत्वात्, इच्छायाश्च प्रत्ययार्थतया प्राधान्यात् प्रधानेन च कार्य्यसम्प्रत्ययात्"[२६] इति सिद्धान्तितम्। यद्यपि वस्तुतः अत्र ज्ञानं प्रधानम्, तथापि प्रकृत्यर्थप्रत्ययार्थयोः प्रत्ययार्थस्य प्राधान्यात् सन्प्रत्ययार्थस्य इच्छारूपस्य प्राधान्यम् विदर्थस्य ज्ञानरूपस्य अप्राधान्यम्। प्रधानेन च सह वाक्यान्तर्गतानां पदान्तराणां सम्बन्धो भवतीति इच्छया सह एव 'यज्ञेन' इत्यस्य सम्बन्धः, न तु विद्यया सह। उक्तं च भाष्ये—"विद्यासंयोगात् प्रत्यासन्नानि विद्यासाधनानि शमादीनि विविदिषायोगात् तु बाह्यतराणि यज्ञादीनि इति विवेक्तव्यम्"[२७] इति। एवम् उत्पत्तौ ज्ञानस्य कर्मापेक्षा विद्यते विविदिषोत्पादद्वारा, 'विविदिषन्ति यज्ञेन' इति श्रुतेः'[२८] 'यज्ञादीनि विविदिषायां विनियुज्यन्ते विधिः'[२९] इत्यादिभ्यः यज्ञादीनां विविदिषार्थत्वपक्षः भामतीकारसम्मतः इति ज्ञायते। तथा च कर्मणः विविदिषा, विविदिषायाः विद्या, विद्यायाः ब्रह्मप्राप्तिः इति क्रमः। विविदिषा यद्यपि ब्रह्मप्राप्तेः साक्षात्कारणं न भवतीति न तस्याः साक्षात् पुरुषार्थत्वम्, तथापि विद्याप्राप्तिं द्वारीकृत्य तत् ब्रह्मप्राप्तेः कारणं भवतीति तस्य गौणत्वेन पुरुषार्थत्वम्। अस्मिन् मते यावत् विद्या नोदेति तावत् शमदमादिकम् अनुष्ठेयम्, कर्म तु विविदिषोदयपर्य्यन्तम् अनुष्ठेयम् इति। अत्र इदं ज्ञातव्यम्—विविदिषा तावत् द्विविधा भवति—विद्यां प्रति उन्मुखतारूपा, विद्यायां रुचिरूपा च। तत्र विद्यायां रुचिरूपा विविदिषा एव यज्ञादिफलम्। विद्यां प्रति उन्मुखतारूपा विविदिषा तु यज्ञाद्यनुष्ठानात् प्रागपि स्थातुं शक्नोति। तस्मात् यज्ञाद्यनुष्ठानात् प्राक् विद्यां प्रति उन्मुखतारूपायां विविदिषायां सत्याम् अपि विद्यायां रुचिरूपविविदिषार्थं यज्ञाद्यनुष्ठानं न निष्फलम् इति।

विवरणकारास्तु कर्मणां विद्यार्थत्वं वदन्ति। तथा च उक्तम्—"सर्वाण्येव कर्माणि उत्पत्तिविधिविहितानि······ब्रह्मानुभवकामो

यज्ञादीन्यनुतिष्ठेत् इत्यधिकारान्तरविधिविधेयानि भविष्यन्तीत्याह—विविदिषन्ति यज्ञेन दानेन इत्यादिना। कथम्? आत्मतत्त्वापरोक्षानुभवस्तावत् इष्यमाणतया स्वर्गादिवत् भावनासाध्योऽवगम्यते। पुरुषार्थत्वात्।……तत्र यज्ञादीनाम् इच्छोपसर्जनतया आख्याताभिहितभावनाकरणतया अवगतानां साध्येनैव अन्वयात् यज्ञादीनि ब्रह्मानुभवसाधनानि अवगतानि। ततश्च आत्मानुभवकामो यज्ञादीन्यनुतिष्ठेत् इति विधिः परिणम्यते"[30] इति। एतन्मते विधिप्रत्ययैः (लिङ्-तव्यादिभिः) इष्टसाधनताबोधः जायते। तथाहि 'यजेत' इत्यस्य यागद्वारा इष्टसाधनं कुर्यात् इत्यर्थः लभ्यते। इष्टं च "स्वर्गकामः" इत्यनेन ज्ञाप्यते। तत्र यद्यपि स्वर्गशब्दस्य अर्थतः प्राधान्यं, न तु शब्दतः प्राधान्यम्, तथापि स्वर्गः एव फलत्वेन कल्प्यते, इष्टसाधनतया च सह सम्बध्यते। एवं च इच्छेष्यमाणयोः इष्यमाणं प्रधानम्, न इच्छा, इच्छेष्यमाणसमभिव्याहारे इष्यमाणस्यैव प्राधान्यम्, न तु इच्छायाः इति विशेषन्यायेन सामान्यन्यायस्य बाधात्। तस्मात् विविदिषास्थले अपि विद्यायाः एव प्राधान्यम् इति कर्मणा सह विद्यायाः अन्वयः युक्तः, न तु विविदिषया सह।

ननु, एवं सति विद्योदयपर्य्यन्तं कर्मानुष्ठानप्रसङ्गः, तेन च, "त्यजतैव हि तज्ज्ञेयम्' (यः सर्वाणि कर्माणि त्यजति तेन ज्ञेयं ब्रह्म)—इत्यादि श्रुतौ उक्तस्य कर्मत्यागरूपसंन्यासस्य विद्यासाधनत्वं पीड्येत इति चेत्। न, 'आरुरुक्षोर्मुनेर्योगं कर्मकारणमुच्यते। योगारूढस्य तस्यैव शमः कारणमुच्यते" इत्यादिगीतावचनात्[31] यावत् विविदिषारूपा प्रत्यक् प्रवणता ध्याननिष्ठा वा नोदेति, तावदेव चित्तशुद्ध्यर्थं कर्म अनुष्ठेयम्, तदनन्तरं संन्यासः अवलम्बनीयः इति ज्ञायते। नैष्कर्म्यसिद्धौ अपि उक्तम्—"प्रत्यक्प्रवणतां बुद्धेः कर्माण्युत्पाद्य शुद्धितः। कृतार्थान्यस्तमायान्ति प्रावृडन्ते घना इव॥"[32] इति कर्माणि वैराग्य विविदिषादिकां

प्रत्येकप्रवणताम् उत्पाद्य निवर्तन्ते इत्यर्थः। तथा च यथा—यागादिकर्मणां स्वर्गादिकर्मणां स्वर्गाद्युपदेशेन विहितानां तदुपपत्तये विधिसामर्थ्यादेव मध्यवर्त्यपूर्वाणि कल्प्यन्ते, एवमिहापि अन्तःकरणशुद्धिचित्तैकाग्र्यादिद्वारं कल्प्यताम्"[33] इति विवरणवचनमपि सङ्गच्छते। उक्तं च विवरणाचार्यैः शारीरकन्यायसंग्रहे—'यज्ञेन विविदिषन्ति इति कर्मणां ज्ञानसाधनत्वं विधीयते' इति।

ननु, विद्यार्थं कर्म अनुष्ठेयम् इति पक्षेऽपि विविदिषापर्यन्तं कर्मणः अनुष्ठेयत्वे विविदिषार्थं कर्म अनुष्ठेयम् इति मतात् किमस्य मतस्य पार्थक्यम् इति चेत्। उच्यते—यद्यपि उभयमतेऽपि विविदिषापर्य्यन्तं कर्मणः अनुष्ठेयत्वम् इति अनुष्ठानदृष्टया न भेदोऽस्ति, तथापि फलदृष्ट्या भेदः अस्त्येव। तथाहि—विद्यार्थं कर्म अनुष्ठेयम् इति मते विद्यायाः या द्वारभूता विविदिषा तदुत्पत्त्यनन्तरं यद्यपि कर्मत्यागो भवति, तथापि यानि श्रवणमननिदिध्यासनरूपाणि साधनानि मुक्तिरूपफलोत्पादने पर्यवस्यन्ति, तेषां साधनानाम् उपकारकत्वेन कर्म विद्यायाः उत्पादकं भवति। विविदिषार्थं कर्म इति मते तु श्रवणादिप्रवृत्तिजननसमर्थम् इच्छामात्रं सम्पाद्य कर्म निवर्तते। तथा च विविदिषायाम् अपि श्रवणलाभस्य अवश्यम्भावित्वाभावात् कर्मणः नावश्यं विद्योत्पादकत्वनियमः।

३. ज्ञानस्य अन्तरङ्गसाधनानि[34]

ब्रह्मणः अपरोक्षसाक्षात्कारादेव मोक्षः इति तद्वैतिनः। तस्मिन् ब्रह्मसाक्षात्कारे श्रवणमननिदिध्यासनानि अन्तरङ्गसाधनानि, 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति बृहदारण्यकश्रुतौ ब्रह्मसाक्षात्कारमनूद्य तत् साधनत्वेन श्रवणमनननिदिध्यासनानां विधानात्। उक्तं च मानसपुराणे—

श्रुतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः।
मत्वा च सततं ध्येय एते दर्शनहेतवः॥ इति॥

तत्र विवरणानुयायिनां मते श्रवणं नाम वेदान्तानामद्वये ब्रह्मणि तात्पर्यावधारणानुकूलः मानसः व्यापारः। मननं शब्दावधारितेऽर्थे मानान्तरविरोधशंकायां तन्निराकरणानुकूलतर्कात्मकज्ञानजनकः मानसः व्यापारः। निदिध्यासनं नाम अनादिदुर्वासनया विषयेषु आकृष्यमाणस्य चित्तस्य विषयेभ्यः अपकृष्य आत्मविषयकस्थैर्यानुकूलः मानसः व्यापारः। भामतीप्रस्थाने तु श्रवणम् आगमाचार्योपदेशनम् आत्मज्ञानम्। मननम् अनुमित्यात्मकं ज्ञानम् निदिध्यासनमपि ज्ञानमेव, 'श्रुते मते विज्ञाते'[३५] 'श्रवणेन मत्या विज्ञानेन'[३६] इत्यादिश्रुतिषु निदिध्यासनस्थले विज्ञानपदव्यवहारात्। एवं श्रवणादिकं सर्वमपि ज्ञानपदवाच्यम्, इति।

ननु, श्रवणादीनां त्रयाणां समुदितानां ज्ञानसाधनत्वम्, एकैषां वा? नाद्यः, तेषां युगपदनुष्ठानायोगात् एकानुष्ठानकाले अपरस्य विनाशेन समुच्चयासम्भवात्। न द्वितीयः, एकेनैव ज्ञानोत्पत्तौ इतरयोः वैयर्थ्यप्रसङ्गात् इति चेत्। उच्यते—तेषु त्रिविधेषु ज्ञानसाधनेषु निदिध्यासनं ब्रह्मसाक्षात्कारे साक्षात्कारणम् अङ्गि वा, श्रवणमनने तु तस्य अङ्गे इति च भामतीपन्थिनः। निदिध्यासनस्य साक्षात्कारणत्वे च 'ते ध्यानयोगानुगता अपश्यन् देवात्मशक्ति स्वगुणैर्निगूढाम्',[३७] 'ततस्तु तं पश्यते निष्कलं ध्यायमानम्'[३८] इत्यादिश्रुतिः मानम्। श्रवणमननयोस्तु परम्पराकारणत्वम्। तत्र श्रवणस्य मनननिदिध्यासनद्वारा, मननस्य च निदिध्यासनद्वारा कारणत्वम् इति निदिध्यासने मननं हेतुः, अकृतमननस्य निदिध्यासनविषयनिश्चयाभावेन तद्विषयकनिदिध्यासनायोगात्। वेदैकवेद्ये अतिगम्भीरे विषये मानान्तरविरोधस्य असम्भावनाबोधस्य वा उदये अर्थनिश्चयो न भवति। तदर्थस्य अनिश्चये

तद्विषयकं निदिध्यासनं न उपपद्यते। मननेन तु तयोः निरासे तदर्थनिश्चयात् तद्विषयकं निदिध्यासनम् उपपद्यते इति सिद्धं मननस्य निदिध्यासनोपयोगित्वम्। मनने च श्रवणं हेतुः, श्रवणस्य तात्पर्य्यावधारणानुकूल-मानसव्यापारत्वात् तदभावे तात्पर्य्यानिश्चयेन, तात्पर्य्यज्ञानस्य च वाक्यार्थबोधहेतुत्वात् तदभावे शाब्दज्ञानाभावेन वाक्यार्थज्ञानाभावेन वा वाक्यार्थविषयकयुक्तत्वायुक्तत्वनिश्चयानुकूलमननायोगात्। तथा च एतानि त्रीण्यपि ज्ञानोत्पत्तौ कारणानीति भामतीकाराः। तदुक्तं—'श्रवणमनननिदिध्यासनाभ्यासस्यैव स्वगोचरसाक्षात्कारफलत्वेन लोकसिद्धत्वात्,' इति "अपरोक्षरूपानुभवस्यापि श्रवणाद्यभ्याससाधनत्वेन अनुमानात् तदर्थानि श्रवणादीनि दृष्टार्थानि भवन्ति'[३९] इति च। परिमलकारैः अपि तत्र उक्तम्—'साक्षात्कारोदयाय निदिध्यासनाभ्यासः' इति। 'तस्यापि (विद्योदयस्यापि) श्रवणमननपूर्वकोपासनाजनितसंस्कारसचिवादेव चेतसोभावात्'[४०]—इति च भामतीकाराः। एवं श्रवणमननपूर्वकनिदिध्यासनसंस्कारसचिवेन चेतसा करणेन ब्रह्मसाक्षात्कारः इति भामतीपन्थिनः। अत्र यद्यपि श्रवणमननोपकृतनिदिध्यासनसंस्कारसचिवचेतसा एव ब्रह्मसाक्षात्कारः वर्णितः, तथापि निदिध्यासनवृत्तेः अन्तःकरणाभिन्नत्वात् निदिध्यासनम् एव ब्रह्मसाक्षात्कारे साक्षात्कारणम् इति बोध्यम्।

विवरणकाराणां मते तु श्रवणम् एव ब्रह्मसाक्षात्कारे प्रधानं साक्षात्कारणं वा 'तं त्वौपनिषदं पुरुषम्'[४१] तद्धास्य विजज्ञौ'[४२] इत्यादिश्रुतेः। तदुक्तं विवरणे—'अमृतत्वसाधनम् आत्मदर्शनं द्रष्टव्यः इत्यनूद्य तादर्थ्येन मनननिदिध्यासनाभ्यां फलोपकार्यङ्गाभ्यां सह श्रवणं नाम अङ्गि विधीयते'[४३] इति। सर्वथा तावत् मनननिदिध्यासनाभ्याम् अङ्गभूताभ्यां सह श्रवणविधानम् अस्त्येव। मनननिदिध्यासनयोस्तु अङ्गत्वम् तदुक्तं विवरणे 'श्रवणमङ्गि, प्रमाणस्य प्रमेयावगमं प्रति अव्यवधानात्, मनननिदिध्यासने तु चित्तस्य

प्रत्यगात्मश्रवणसंस्कारपरिनिष्पन्नतदेकाग्रवृत्तिकार्य्यद्वारेण ब्रह्मानुभवहेतुतां प्रतिपद्येते'[४४] इति फलोपकार्य्यङ्गे। ननु मननिदिध्यासनयोः श्रवणोत्तरकालीनत्वात् श्रवणाङ्गत्वं न युक्तम् पूर्वकालीनस्यैव अङ्गत्वदर्शनात् इति चेत्। मैवम्, न हि पूर्वकालीनानाम् एव अङ्गत्वं नोत्तरकालीनानाम् इति नियमोऽस्ति, उत्तरकालीनानाम् अपि इड़ाभक्षणादीनाम् अङ्गत्वदर्शनात्। उक्तं च—न्यायप्रकाशे—'संनिपत्योपकाराणां पूर्वाङ्गानां तदुत्पत्तौ उपयोगः। उत्तराङ्गानां तेषां तु तत्स्थितौ उपयोगः' इति। तथा च उत्तरकालीनयोः अपि मनननिदिध्यासनयोः अङ्गत्वं नैव विरुद्धम्। "तस्मात् द्रष्टव्यः श्रोतव्यः" इति दर्शनेन सह अव्यवहितपाठरूपसन्निधानात् श्रवणस्य दर्शनेन साक्षात् अन्वयात् अङ्गितम्"[४५] इति अद्वैतसिद्धौ।

ननु मनननिदिध्यासनयोः कथं श्रवणाङ्गत्वम्? उच्यते—श्रवणस्य शब्दशक्तितात्पर्यावधारणरूपस्य विचारस्य वा ब्रह्मसाक्षात्काररूपं यत् फलम्, तत्सम्पादकतया एतयोः श्रवणाङ्गत्वम्। तथाहि,—यद्यपि परोक्षज्ञानजननसमर्थात् शब्दात् ब्रह्मणि अपरोक्षज्ञानं जायते, तथापि असम्भावनया विपरीतसम्भावनया च प्रतिबद्धं तत् निश्चलं नावतिष्ठते। तत्र मननात्मकेन तर्केण जीवब्रह्मैक्यलक्षणस्य बोधस्य असम्भावनायां निरस्तायां, निदिध्यासनेन च एकाग्रतायां जायमानायां शब्दजनितम् अपरोक्षज्ञानं निश्चलम् अवतिष्ठते इति मनननिदिध्यासनयोः ब्रह्मदर्शननिर्वर्तकत्वम्। अत एव च तयोः आरादुपकारकत्वम्।

अत्र इदं बोद्धव्यम्–क्रियारूपाणि अङ्गानि द्विविधानि सन्निपत्योपकारकाणि, आरादुपकारकाणि चेति। तथाहि, कर्माङ्गद्रव्याद्युद्देशेन विधीयमानानि कर्माणि अवघातप्रोक्षणपेषणादीनि सन्निपत्योपकारकाणि, द्रव्यादिकम् अनुद्दिश्य प्रधानसन्निधौ विधीयमानानि प्रयाजादीनि आरादुपकारकाणि। तत्र प्रोक्षणादीनां यथा यागकरण-

द्रव्याद्युपकारकत्वम्, न तथा मनननिदिध्यासनयोः ब्रह्मसाक्षात्कार-करणश्रवणोपकारकत्वं, श्रवणगतफलानुत्पादकत्वात्, किन्तु अहं-कारोपकारकत्वम्, अहङ्कारगतफलोत्पादकत्वात्=अहङ्कारगतानाम् असम्भावनादीनां ताभ्यामेव निरासात्, प्रधानभूतश्रवणसन्निधौ आम्नानाच्च इति तयोः आरादुपकारकत्वम् इति ।

ननु एवमपि मनननिदिध्यासनयोः अङ्गत्वं नैव युक्तम्, तद्-ग्राहकप्रमाणाभावात्, अङ्गत्वबोधकानां श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्यानाम् अत्र अभावात् इति चेत् । उच्यते—सत्यम्, श्रुत्यादिप्रमाणैः एतयोः अङ्गत्वं न ज्ञायते । किन्तु, यथा कार्य्यं प्रति उपादानस्य आश्रयतया सहभावितया च निमित्तकारणतः-प्राधान्यात् घटादिकार्ये मृत्पिण्डादीनां प्रधानकारणता, चक्रादीनां च सहकारिकारणतेति प्राधान्याप्राधान्यव्यपदेशः, तथा श्रवण-मनननिदिध्यासनानाम् अपीत्ति मन्तव्यम् । यथा उपादानकारणानां प्रधानकारणत्वम्, निमित्तानां च अप्रधानकारणत्वम्, तथैव श्रवणा-दित्रयेषु श्रवणस्य प्रधानकारणत्वम्, मनननिदिध्यासनयोस्तु अप्रधानकारणत्वम् । यदेव तयोः अप्रधानत्वम् तदेवात्र अङ्गत्वं विवक्षितम् इति भावः ।

ननु, अप्रधानत्वमेव अङ्गत्वम् । तच्च मनननिदिध्यासनयोरेव, न श्रवणस्य इत्यत्र किं विनिगमकम् इति चेत् । उच्यते—(शक्ति-तात्पर्य्यरहितात् शब्दात् प्रमेयबोधानुत्पादात्) शक्तितात्पर्य्य-विशिष्टशब्दावधारणं प्रमेयावगमं = ब्रह्मानुभवं प्रति अव्यवधानेन = व्यापारं विनैव साक्षात्कारणं भवति, प्रमाणस्य प्रमेयावगमं प्रति व्यापाररूपव्यवधानाभावात् । एवं च शक्तितात्पर्यविशिष्टशब्दाव-धारणलक्षणस्य श्रवणस्य करणत्वं, अव्यवहितकारणस्यैव करणत्वात् । मनननिदिध्यासने तु प्रत्यगात्मप्रवणतालक्षणेन संस्कारेण परिनिष्पन्नं यत् तदेकाग्र्यलक्षणवृत्तिरूपं कार्य्यं तद्द्वारेण ब्रह्मानुभवहेतुतां

प्रतिपद्येते इति ब्रह्मानुभवरूपं फलं प्रति अव्यवहितकारणस्य श्रवणस्य तात्पर्य्यविशिष्टशब्दावधारणस्य अङ्गित्वम्, मनननिदिध्यासनयोस्तु अङ्गत्वम्[८६] अङ्गीक्रियते। तथा च श्रवणं ब्रह्मानुभवं प्रति अव्यवहितकारणत्वात् प्रधानम्, मनननिदिध्यासने तु ब्रह्मात्मैकाग्रतालक्षणवृत्तिद्वारा व्यवहितकारणत्वात् अप्रधाने भवतः। पुनश्च शब्दात् प्रथमम् अपरोक्षज्ञानम् उत्पन्नम् अपि अन्तःकरणगतभ्रान्तिविक्षेपादिदोषप्रतिबन्धनिरासेन अपरोक्षानुभवप्रतिष्ठाहेतुतया मनननिदिध्यासने फलोपकार्य्यङ्गताम् उपगच्छतः इति तयोः श्रवणाङ्गत्वम्।

४. सगुणोपासनस्य ब्रह्मज्ञानसाधनत्वम्[८७]

श्रवणादिकं यथा ब्रह्मानुभवसाधनं तथा सगुणोपासनमपि निर्विशेषब्रह्मसाक्षात्कारहेतुः। सगुणोपासनं नाम 'य एषरन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रु हिरण्यकेश आप्रणखात् सर्व एव सुवर्णः'[८८] इत्यादिना विहितम् उपासनम्। ननु सगुणोपासनस्य निर्विशेषब्रह्मानुभवहेतुत्वं नैव युक्तम्, तस्य मानसक्रियारूपत्वात्, क्रियायाश्च अनुभवाहेतुत्वात्, बह्वायाससाध्यानां श्रवणादीनाम् अननुष्ठानप्रसङ्गाच्च इति चेत्। न, सगुणोपासनस्यापि चित्तैकाग्र्यद्वारा निर्विशेषब्रह्मसाक्षात्कारहेतुत्वात्। तदुक्तं कल्पतरुकारैः—निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः। ये मन्दास्तेऽनुकम्प्यन्ते सविशेषनिरूपणैः॥ वशीकृते मनस्येषां सगुणब्रह्मशीलनात्। तदेवाविर्भवेत् साक्षादपेतोपाधिकल्पनम्[८९]॥ इति। ये दुर्वासनावासितान्तःकरणाः वैराग्याद्यभावात् श्रवणादिसाधनहीनाः निर्विशेषं ब्रह्म साक्षात्कर्तुम् अक्षमाः, ते सगुणब्रह्मोपासननिरूपणैः अनुगृह्यन्ते। सगुणब्रह्मोपासनाभ्यासात् च ब्रह्मणि तेषां मनसि एकाग्रे सति निरुपाधिकं परं ब्रह्म आविर्भवति इत्यर्थः।

अर्चिरादिप्राप्तिद्वारा अपि सगुणोपासनं पारम्पर्य्येण ब्रह्मानुभवसाधनं भवति, 'तं यथायथोपासते, तदेव भवति, यथाक्रतुरस्मिन् लोके भवति, तथेतः प्रेत्य भवति'[५०] इत्यादिश्रुतेः, 'यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम्। तं तमेवैति कौन्तेय सदा तद्भावभावितः[५१]॥' इति स्मृतेश्च। ननु सगुणोपास्तेः फलं न निर्विशेषब्रह्मानुभवः, तदुपासनस्य ताद्भाव्यप्राप्तिहेतुत्वात्, अन्यथा अतिप्रसङ्गात् इति चेत्। उच्यते—ये तावत् उपासनमान्द्यात् ब्रह्मलोकं नाधिगगच्छन्ति, तेषां तदुपास्यप्राप्तिरेव तदुपास्तेः फलम्, न ब्रह्मानुभवः। ये तु पुरुषधौरेयाः उपासनोत्कर्षात् चित्तैकाग्र्यं सम्पाद्य अर्चिरादिमार्गक्रमेण ब्रह्मलोकं गच्छन्तः तत्रैव श्रवणादिना ब्रह्मात्मैक्यम् अनुभवन्ति, ते अमृतत्वभाजो भवन्ति, उत्पन्नतत्त्वसाक्षात्कारास्ते ब्रह्मणा सह मोक्षं लभन्ते, 'न च ते पुनरावर्तन्ते'[५२] इति श्रुतेः, 'ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसञ्चरे। परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्' इति स्मृतेश्च। तथा च सगुणोपासकानां श्रवणादिद्वारैव ब्रह्मानुभवहेतुत्वात् नातिप्रसङ्गः।

८. ब्रह्मज्ञानकरणविचारः[५३]

ब्रह्मापरोक्षज्ञानं श्रवणमनननिदिध्यासनसंस्कृतान्तःकरणात् इति भामतीपन्थिनः, तत्त्वमस्यादिवाक्यात् इति विवरणानुयायिनः।

भामतीकाराणाम् अयम् आशयः—करणविशेषनिबन्धनम् इन्द्रियनिबन्धनं वा ज्ञानानां प्रत्यक्षत्वम्, न विषयविशेषनिबन्धनम्। (अनुमित्यादीनां व्याप्तिज्ञानादिरूपकरणविशेषनिबन्धनत्वे अपि अप्रत्यक्षत्वाद्) इन्द्रियजन्यत्वस्यैव ज्ञानगतप्रत्यक्षत्वप्रयोजकत्वम् स्वीकरणीयम् इति भावः। एकस्मिन् एव लिपिरेखादिसूक्ष्मवस्तुनि पटुकरणापटुकरणयोः प्रत्यक्षत्वाप्रत्यक्षत्वव्यवहारदर्शनात्। पटुकरणस्य सूक्ष्मवस्तुनि इदं पश्यामीति प्रत्यक्षत्वव्यवहारः, अपटु-

करणस्य तु इदं न पश्यामीति प्रत्यक्षत्वाभावव्यवहारः। तथा च यदि विषयविशेषनिबन्धनं ज्ञानानां प्रत्यक्षत्वं स्यात्, तदा विषयस्यैकत्वाद् उभयोरेव प्रत्यक्षं ज्ञानं भवेत्, नैकस्य। भवति तु एकस्य। तस्माद् विषयविशेषनिबन्धनं न प्रत्यक्षत्वं किन्तु करणविशेषनिबन्धनम्। एवम् इन्द्रियजन्यत्वस्य प्रत्यक्षत्वप्रयोजकत्वेन संवित्साक्षात्त्वे ज्ञानस्य प्रत्यक्षत्वे वा इन्द्रियजन्यत्वस्यैव प्रयोजकत्वम्। अत्र इन्द्रियपदं मनसोऽपि उपलक्षणम्, तन्मते मनसोऽपि इन्द्रियत्वात्, अन्यथा सुखादिज्ञानस्य प्रत्यक्षत्वं न स्यादिति भावः। एवं च शब्दजन्यज्ञानस्य न अपरोक्षत्वम्, इन्द्रियजन्यत्वाभावः।

ननु, ब्रह्मान्यसाक्षात्कारे इन्द्रियस्य करणत्वे अपि ब्रह्मणः साक्षात्कारे महावाक्यमेव करणम्, नेन्द्रियम्, तस्य इन्द्रियाद्यगोचरत्वात्, 'यन्मनसा न मनुते'[५४] इति तस्य साक्षात्कारकरणत्वप्रतिषेधात् इति न इन्द्रियजन्यत्वस्य प्रत्यक्षत्वप्रयोजकत्वम् इति चेत्। न, ब्रह्मान्यसाक्षात्कारो यथा इन्द्रियजन्यः तथा ब्रह्मसाक्षात्कारोऽपि मनोरूपेन्द्रियजन्यः न तु शब्दकरणकः। न च ब्रह्मसाक्षात्कारे इन्द्रियस्य करणत्वे इदानीमपि ब्रह्मसाक्षात्कारप्रसङ्गः मनोरूपेन्द्रियस्य सद्भावात् इति वाच्यम्। न हि ब्रह्मसाक्षात्कारे केवलमनसः करणत्वम्, किन्तु मनननिदिध्यासनसंस्कृतस्य मनस एव। तथा चोक्तं वेदान्तार्थज्ञानाभ्यासाहितसंस्कारो जीवः स्वस्य ब्रह्मभावम् अन्तःकरणेन[५५] (अनुभवति)' इति 'तस्यापि (विद्योदयस्यापि) श्रवणमननपूर्वकोपासनाजनितसंस्कारसचिवादेव चेतसो भावात्'[५६] इति च भामत्याम्। एतादृशस्य मनसश्च इदानीम् अभावात् ब्रह्मसाक्षात्कारापत्तिः। मनसः ब्रह्मसाक्षात्कारकरणत्वे च 'मनसैनवानुद्रष्टव्यम्',[५७] 'एषोऽणुरात्मा चेतसा वेदितव्यः',[५८] 'दृश्यते त्वग्र्यया बुद्ध्या'[५९] इत्यादिश्रुतिर्मानम्।

ननु, 'यन्मनसा न मनुते'[६०] 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह'[६१] इत्यादिमनोऽगम्यत्वश्रुतिविरोधात् शब्दस्यैव

तत्करणत्वं न मनसः। मनोगम्यत्वश्रुतिस्तु न करणत्वपरा, पूर्वोदाहृतश्रुतिविरोधात्, किन्तु हेतुत्वमात्रपरा, शब्दसाक्षात्कारजनने अपि तदैकाग्र्यस्य अपेक्षितत्वात् इति चेत्। न, मनोगम्यत्वश्रुतिविरोधात् इति चेत्। न, मनोगम्यत्वश्रुतिविरोधात् अक्लृप्तकरणान्तरकल्पनागौरवाद् 'यतो वाचो निवर्तन्ते' इत्यादिश्रुतौ ब्रह्मणः शब्दगम्यत्वनिषेधात् मनोऽगम्यत्वश्रुतीनाम् अन्यपरत्वौचित्यात् मनोऽगम्यत्वश्रुतिः नाम असंस्कृतमनोविषया। ननु, एवं ब्रह्मणो मनोगम्यत्वे 'तं त्वौपनिषदं पुरुषं पृच्छामि'[६२] इत्यादिश्रुतौ तस्य औपनिषदत्वाभिधानम् असमञ्जसं स्यात् इति चेत्। न, ब्रह्मसाक्षात्कारकरणस्य संस्कृतमनसः वेदजन्यब्रह्मविषयकपरोक्षज्ञानानन्तरमेव प्रवृत्ततया वेदोपजीवित्वात्, वेदपूर्वकत्वाद् वा। तथा च उपनिषत्प्रवृत्तेः अनन्तरं मनसः प्रवृत्तेः ब्रह्मणः औपनिषदत्वाभिधानं नानुपपन्नम् इति भावः।

ननु, 'तं त्वौपनिषदम्' इत्यादिश्रुतिविरोधात् 'मनसैवाणो द्रष्टव्यम्'[६३] इत्यादिश्रुतेः बाधात् मनसा न ब्रह्मसाक्षात्कारकरणत्वम् इति चेत्। उच्यते—वेदानुपजीविमानान्तरगम्यत्वस्यैव वेदगम्यत्वविरोधः। तथा च यत् प्रमाणं वेदान्तम् अनपेक्ष्य एव स्वातन्त्र्येण ब्रह्मज्ञानाय प्रवर्तते, तस्यैव वेदान्तनिरपेक्षस्य वेदान्तेन विरोधः, तेन तद्बाधश्च। मनस्तु न तथा, तस्य वेदान्तोपजीविनो वेदान्ताविरोधात्। एवं च शब्दकरणत्ववादिन्या श्रुत्या मनःकरणत्ववादिन्याः श्रुतेः विरोधाभावेन बाधाभावात् सिद्धं मनसो ब्रह्मसाक्षात्कारकरणत्वम् इति भावः। शास्त्रदृष्टिसूत्रमपि ब्रह्मविषयकमानसप्रत्यक्षस्य शास्त्रप्रयोज्यत्वाद् उपपद्यते। तथा च अस्मिन् सूत्रे शास्त्रदृष्टिशब्देन शास्त्रजन्यं प्रत्यक्षं नाभिधीयते, किन्तु शास्त्रप्रयोज्यं प्रत्यक्षम्। ब्रह्मविषयकमानसप्रत्यक्षं च शास्त्रार्थबोधोत्तरप्रवृत्तमनोजन्यतया शास्त्रप्रयोज्यमेव। तस्मात् शास्त्रमूलकमनोगम्यत्वेन शास्त्रगम्यत्वस्य न विरोधः, न वा बाध्यबाधक इति भावः। तदुक्तं कल्पतरुकारैः—

"अपि संराधने सूत्राच्छास्त्रार्थध्यानजा प्रमा । शास्त्रदृष्टिर्गता तान्तु वेत्ति वाचस्पतिः परम् ।''[६४] इति 'शास्त्रदृष्ट्या तूपदेशः'[६५] इति सूत्रे शास्त्रदृष्टिः न शास्त्रजन्या अपरोक्षप्रमा अभिमता, किन्तु वेदान्तशास्त्रार्थध्यानजा प्रमैव शास्त्रदृष्टिः गता । तत्र अयं हेतुः—प्रपञ्चजाताद् अन्यत् परं ब्रह्म अस्ति चेत् कस्मात् न गृह्यते ? इन्द्रियाद्यग्राह्यत्वात् इत्युक्ते तत् किम् अप्रामाणिकम् इति शङ्कायां 'अपि च संराधने प्रत्यक्षानुमानाभ्याम्'[६६] इति सूत्रेण इदम् उच्यते—अपि च एनम् आत्मानं निरस्तसमस्तप्रपञ्चम् अव्यक्तं संराधनकाले भक्तिध्यानप्रणिधानाद्यनुष्ठानकाले वा योगिनः पश्यन्ति । कथम् अवगम्यते ? उच्यते—प्रत्यक्षानुमानाभ्यां श्रुतिस्मृतिभ्याम् । श्रुतिस्तावत्—'कश्चित् धीरः प्रत्यगात्मानमैक्षद् आवृत्तचक्षुरमृतत्वमिच्छन्',[६७] 'ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यायमानम्[६८] इत्याद्या स्मृतिरपि—'योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम्' इत्याद्या । तथा च अस्मिन् सूत्रे संराधनकालिकस्य ब्रह्मदर्शनस्य श्रवणादिसंस्कृतमनोजन्यत्वाभिधानात् शास्त्रप्रयोज्यमनोजन्यब्रह्मप्रमैव शास्त्रदृष्टिपदग्राह्या । तस्मात् सिद्धं मनसः एव ब्रह्मसाक्षात्कारकरणत्वम् इति भावः ।

विवरणपन्थिनां मते तत्त्वमस्यादिवाक्यजन्यं ज्ञानम् अपरोक्षम् । तस्मात् शब्दः एव ब्रह्मसाक्षात्कारे करणम् इति तेषाम् अभिप्रायः । तत्र 'अभयं वै जनकप्राप्तोऽसि'[६९] 'तदात्मानमेवावेदहं ब्रह्मास्मि'[७०] इत्यादि श्रुतिः, 'तत्त्वमस्यादिवाक्योत्थं ज्ञानं मोक्षस्य साधनम्' इत्यादि स्मृतिश्च प्रमाणम् । इदमेव मतं शब्दापरोक्षवादः इत्युच्यते । अत्र अयम् आशयः—शुद्धं ब्रह्मेति ब्रह्माकारवृत्तौ जायमानायां स्वस्वेतरसकलोपाधिः निवर्तते । ततश्च आत्मा अपरोक्षब्रह्मरूपः प्रकाशते, अविद्याधीनस्य भेदस्य अविद्यानिवृत्तौ निवृत्तेः । तथा च ब्रह्मणः प्रमातृजीवाभिन्नतया तद्गोचरं शब्दजन्यं ज्ञानमपि अपरोक्षम् । तज्ज्ञानस्य अपरोक्षार्थव्यवहारानुकूलत्वाद् अपरोक्षार्थ-

व्यवहारानुकूलज्ञानत्वस्यैव ज्ञानगतप्रत्यक्षत्वप्रयोजकत्वात्। अतएव 'शास्त्रदृष्ट्या तूपदेशो वामदेववत्' इति वादरायणीयसूत्रे शास्त्रीया दृष्टिः शास्त्रदृष्टिः इति तत्त्वमस्यादिवाक्यजन्यम् अहं ब्रह्मास्मीति ज्ञानं शास्त्रदृष्टिशब्देन उक्तम्। अहं ब्रह्मास्मीति ब्रह्मात्मैक्यज्ञानस्य प्रत्यक्षवाचकदृष्टिशब्देन उक्तत्वात् वाक्यजन्यज्ञानस्य प्रत्यक्षत्वं बोध्यम्। तस्य परोक्षत्वे दृष्टिशब्देन अभिधानं न स्यादिति भावः। एतन्मते ब्रह्म एव सर्वसंविदुपादानत्वात् शब्दप्रमाणजन्यसंवेदने अपि तदभिन्नतया वा तज्जनकतया वा ब्रह्म अपि प्रथमम् एव अपरोक्षतया अवभासते, तच्च चित्तस्य अतिसूक्ष्मे अनैकाग्र्यदोषात् विपर्यय-संस्कारदोषाच्च प्रतिबद्धं भ्रान्त्या परोक्षवत् अवभासते। तत्र अपरोक्षज्ञानम् उद्दिश्य मननिदिध्यासनादीनां विधानसामर्थ्यात् मननिदिध्यासनादिभिः परोक्षविभ्रमनिमित्तप्रतिबन्धनिरासेन शब्दादेव अपरोक्षं ज्ञानं भवति, 'तं त्वौपनिषदम्' इति तद्धित-प्रत्ययेन च ब्रह्मावगतिहेतुत्वं शब्दस्य दर्शितम् उपपन्नं भवति। अत्र मतान्तरम्—न प्रथमोत्पन्नं शब्दज्ञानमेव अपरोक्षावभासकं भवति। किन्तु शब्दः एव प्रथमं ब्रह्मणि परोक्षज्ञानमुत्पाद्य पुनः मननिदिध्यासनादिसाहचर्य्यात् द्वितीयम् अपरोक्षज्ञानमुत्पादयति। न चेदं ज्ञानं परोक्षम्, परोक्षत्वे अपरोक्षभ्रमनिवर्तकत्वानुपपत्तेः। ब्रह्मात्मैक्यज्ञानं परोक्षरूपं चेत् नाविद्यानिवर्तकम्, आप्तवचनलिङ्गा-दिभिः दिगादितत्त्वनिश्चये जाते अपि दिङ्मोहादेः निवृत्त्यदर्शनाद् अपरोक्षज्ञानस्यैव अपरोक्षभ्रमनिवर्तकत्वाभ्युपगमात्। तथा च ब्रह्मात्मैक्यगोचरमपि ज्ञानम् अपरोक्षम् एव अज्ञाननिवर्तकं वाच्यं न परोक्षमिति भावः।

ननु परोक्षज्ञानजननस्वभावस्य शब्दस्य कथं अपरोक्षज्ञानजन-कत्वम् प्रमाणाभावात् इति चेत्। न, 'दशमस्त्वमसि' इत्यादौ सन्निकृष्टविषये शब्दादपि अपरोक्षज्ञानाभ्युपगमात्। नौकया नदीपारं गतेषु दशसु पुरुषेषु अन्यतमः स्वव्यतिरिक्तान् नवपुरुषान्

गणयित्वा दशमः नोत्तीर्णः इति विलपन् आस्ते। तत्र एकेन पथिकेन प्रत्येकगणनया प्राश्निकम् अङ्गुल्या निर्दिश्य आह—'दशमस्त्वमसि' इति। एवं तस्य दशमत्वज्ञाने जाते शोकः निवृत्तः। अत्र दशमत्वज्ञानं नेन्द्रियजन्यं शब्दश्रवणात् प्राक् इन्द्रियसन्निकर्षे सत्यपि तदनुदयात्। न च शब्दसहकृतेन्द्रियजन्यत्वेन तदापरोक्ष्यम्, यतः इन्द्रियस्य प्रत्यक्षजनकतायां शब्दस्य सहकारित्वं न कुत्रापि क्लृप्तम्। न चेदं तस्य ज्ञानं परोक्षम्, तस्य परोक्षत्वे तस्य अपरोक्षभ्रमनिवृत्त्यप्रसङ्गात्। एवं च शब्दजन्यमपि ज्ञानम् अपरोक्षमेव अङ्गीकरणीयम्। तथा चोक्तम् पञ्चदश्याम्—

"त्वमेव दशमोऽसीति गणयित्वा प्रदर्शितः। अपरोक्षतया ज्ञात्वा हृष्यत्येव न रोदिति ॥"[७९] इति। तस्मात् शब्दस्यापि क्वचित् अपरोक्षज्ञानजनकत्वम् अङ्गीकरणीयम्। एवं च 'दशमस्त्वमसि', 'तत्त्वमसि' इत्यादिवाक्यात् यथा अपरोक्षज्ञानं तथा सुखस्य वर्त्तमानतादशायां 'त्वं सुखी'—इत्यादि वाक्यजन्यज्ञानमपि अपरोक्षं ज्ञानम्। ननु शाब्दमिदं ज्ञानं न प्रत्यक्षम् इन्द्रियाजन्यत्वात् इति चेत्। न, नहि इन्द्रियजन्यत्वं प्रत्यक्षत्वे तन्त्रम् (व्यापकम्), किन्तु योग्यवर्तमानविषयत्वे सति प्रमाणचैतन्यस्य विषयचैतन्याभिन्नत्वम्। विषयचैतन्याभिन्नप्रमाणचैतन्यत्वरूपं प्रत्यक्षत्वं च वाक्यजन्यज्ञानसाधारणम्।

ननु वाक्यं यदि अपरोक्षज्ञानजनकं स्यात्, तदा शाब्दबोधोच्छेदः स्यात्। समानविषये परोक्षज्ञानसामग्र्यपेक्षया प्रत्यक्षज्ञानसामग्र्याः बलवत्त्वादिति चेत्। न, प्रमात्रभिन्नार्थकशब्दस्य एव अपरोक्षज्ञानजनकत्वनियमात् नान्यस्य इति विशेषात्। सन्निकृष्टविषये प्रमात्रभिन्नार्थविषये सुखदुःखादौ एव 'त्वं सुखी' इत्यादि अपरोक्षज्ञानं मन्यते। इन्द्रियसन्निकृष्टविषये तु शब्देन अपरोक्षज्ञानं न मन्यते। न च सुखदुःखादानां मनोरूपेन्द्रियसन्निकृष्टत्वं वाच्यम्,

मनसः अनिन्द्रियत्वात्। तथा च प्रमातृचैतन्यगतानां दशमत्वादीनां प्रमात्रभेदाद् तदर्थकवाक्यस्य एव अपरोक्षज्ञानजनकत्वं नान्यस्य इति न शाब्दबोधोच्छेदः" इति भावः।

ननु शब्दस्य अपरोक्षज्ञानजनकत्वे तस्य प्रत्यक्षे अन्तर्भावप्रसङ्गः। न च दशमस्त्वमसि इत्यादिवाक्यम् उदाहरणीयम्, तत्रापि इन्द्रियसन्निकृष्टस्यापि सद्भावेन, केवलशब्दस्य अपरोक्षज्ञानजनकत्वाभावात्। न च इन्द्रियसन्निकर्षे सत्यपि आदौ अदर्शनात्, पश्चात्, शब्दश्रवणानन्तरं च दर्शनात् तस्य शब्दजनितत्वम् इति वाच्यम् रत्नतत्त्वाधिगमेऽपि तथात्वप्रसङ्गात्, रत्नतत्त्वपरीक्षाशास्त्रम् अनधिगतेन पुष्परागादिभेदः न प्रत्यक्षतः ज्ञायते, शास्त्रार्थाधिगमानन्तरं च ज्ञायते इति नहि तत् शास्त्रं तत्र प्रत्यक्षप्रमितिजनकम् इत्यभ्युपेतव्यम्। अस्ति च अनुमानम्—विवादाध्यासितः शब्दः अपरोक्षज्ञानजनको न भवति, शब्दत्वात् ज्योतिष्टोमादिवाक्यवत् इति।

तत्र उच्यते—शब्दस्य अपरोक्षज्ञानजनकत्वेऽपि न तस्य प्रत्यक्षे अन्तर्भावः। न हि साक्षात्कारिज्ञानहेतुतामात्रेण प्रत्यक्षत्वं सम्भवति, शब्दव्यतिरिक्तत्वे सति तादृशस्य तत्प्रयोजकत्वात्, न च शब्दस्य अपरोक्षप्रमितिकरणत्वं न दृष्टचरमिति वाच्यम्, 'दशमस्त्वमसि' इत्यादिवाक्येषु दर्शनात्। "साक्षात्करणहेतोरप्यप्रत्यक्षत्वसम्भवात्। दशमस्त्वमसीत्यादौ शब्दादेव तदुद्भवात्[७३] ॥ इति ननु तत्रापि इन्द्रियसहितस्यैव तद्धेतुत्वम, न केवलस्य, इति चेत्। तत्र किं शब्दः करणम्, इन्द्रियं तु सहकारीत्यभिधीयते, किं वा इन्द्रियस्यैव करणत्वं शब्दः सहकारीति, आद्ये ब्रह्मसाक्षात्कारे अपि मनःरूपेन्द्रियसहायस्यैव शब्दस्य अपरोक्षप्रतीतिजनकत्वम् अस्तु। ननु इन्द्रियस्यैव करणत्वं शब्दस्य तु सहकारित्वमात्रम् इति चेत्। न, क्वचित् बहुलतमे तमसि क्वचिच्च लोचनविरहिणोऽपि वाक्यात् दशमोऽस्मि इति अपरोक्षप्रमितिदर्शनात् शब्द एव करणम्,

न इन्द्रियम् । ननु 'दशमस्त्वमसि' इत्यादौ, एवं भवतु, ब्रह्मसाक्षात्कारे तु न युक्तं श्रुतिविरोधात् । तथाहि श्रुतिः—'मनसैवानुद्रष्टव्यम्' ॥ [७४] इति । 'यन्मनसा न मनुते' 'अप्राप्य मनसा सह' इत्यादिश्रुतेः तु असंस्कृतमनोविषयत्वात् इति चेत् । मैवम्, 'तद्धास्य विजज्ञौ', [७५] 'तमसः पारं दर्शयति' [७६] इति च उपदेशमात्रादेव अपरोक्षप्रमित्युपपत्तिप्रतिपादनात् । अन्यथा शब्दस्य परोक्षत्वे तेन अपरोक्षभ्रमनिवृत्तिः न स्यात् । ननु एतानि वचनानि आगमाचार्योपदेशयोः न साक्षात्कारहेतुतां प्रतिपादयन्ति, साक्षात्कारहेतोः मनसः सहायताप्रतिपादनपरत्वेनापि उपपत्तेः । श्रवणेनैव साक्षात्कारोपपत्तेः श्रवणोत्तरकालयोः मनननिदिध्यासनयोः वैयर्थ्यप्रसङ्गात्, श्रुतवेदान्तानामपि संसारानिवृत्तिदर्शनात् इति चेत् । न, असम्भावनाविपरीतभावनाख्यस्य चित्तविक्षेपलक्षणस्य च प्रतिबन्धस्य निरासद्वारेण श्रवणं प्रति मनननिदिध्यासनयोः फलोपकार्य्यङ्गतया अपि विधानोपपत्तेः । श्रुतवेदान्तानामपि संसारित्वस्य च प्रतिबद्धविज्ञानपुरुषविषयत्वात्, न हि प्रतिबन्धे सति कार्य्यानुत्पादकत्वं कारणतां विहन्ति । या तु श्रुतिः मनसः साक्षात्कारकरणत्वे प्रमाणम् उक्ता तस्याः चित्तैकाग्र्यस्य अङ्गताप्रतिपादनपरत्वात् नासमञ्जसम् । यत्तु 'तद्धा' इत्यादिश्रुतीनाम् उपदेशस्य मनःसहायताप्रतिपादकतया अपि उपपत्तिः इति उक्तम्, तन्न, मनसः नित्यशुद्धबुद्धमुक्तस्वभावब्रह्मात्मसाक्षात्कारहेतुत्वस्य अदृष्टचरतया तत्र शब्दस्य सहकारित्वकल्पनानुपपत्तेः । तथात्वे श्रवणादीनामेव वैयर्थ्यप्रसङ्गात् । सुखादीनां साक्षिवेद्यत्वात् आत्मनश्च स्वयंप्रकाशत्वाद् मनसः क्वचिदपि साक्षात्कारहेतुत्वासंप्रतिपत्तेः । 'भिद्यते हृदयग्रन्थिः, [७७] 'तरति शोकमात्मवित्, [७८] 'मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते' [७९] इत्यादि श्रुतिस्मृतिषु ब्रह्मविद्यायाः एव अविद्यानिवर्तकत्वश्रवणात्, पारिशेष्यात् वेदान्तवाक्यमेव करणमिति निश्चीयते । वेदादेव परमेश्वरज्ञानम् इत्यत्र

साक्षादेव श्रुतिरस्ति—'नावेदविन्मनुते तं बृहन्तम्',[८०] 'तं त्वौपनिषदं पुरुषं पृच्छामि' 'वेदान्तविज्ञानसुनिश्चितार्थाः'[८१] इत्यादिः।

यत् पुनः शब्दत्वेन हेतुना शब्दस्य परोक्षज्ञानाजनकत्वम् अनुमितं तन्न, 'तद्धास्य विजज्ञौ' इत्यादि श्रुतिविरुद्धतया कालात्ययापदिष्टत्वात् दशमस्त्वमसि इत्यादिवाक्ये व्यभिचाराच्च। तदुक्तम्—

तद्धेत्यादिश्रुतेः क्वापि मनसस्तदयोगतः।
शब्दत्वादनुमितेर्बाधाद्व्यभिचारादनुदियतेः ॥[८२] इति।

६. 'तत्त्वमसि' वाक्यार्थः

शङ्कराचार्य्याणां मते जीवब्रह्मणोः परमार्थतः ऐक्यमेव सर्वेषु वेदान्तेषु गीयते। तथा चोक्तम्—'ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः' इति। ऐक्यं चेदं जीवब्रह्मणोः अखण्डचैतन्यरूपेणैव। एतच्च जीवब्रह्मणोः ऐक्यं 'तत्त्वमसि' इति महावाक्येन* श्वेतकेतुं प्रति पित्रा आरुणिना उक्तं छान्दोग्यश्रुतौ। एतस्य 'तत्त्वमसि'[८४] इति वाक्यस्य साम्प्रदायिकं व्याख्यानम् एतत्—अध्यारोपापवादाभ्यां तत्त्वं पदार्थशोधनं भवति। तथाहि—'तत्त्वं-पदयोः प्रत्येकं द्विविधः

---

*. जीवब्रह्मणोः एकत्वसूचकं वेदान्तवाक्यमेव महावाक्यम् इत्युच्यते। जीवब्रह्मणोः ऐक्यरूपं परं तत्त्वम् अनेन प्रतिपाद्यते इति तस्य महावाक्यत्वम्। तत्र चतुर्णां वेदानां महावाक्यचतुष्टयं प्रधानतया स्वीकृतं भवति। तथा हि—

१. 'प्रज्ञानं ब्रह्म'—इति ऋग्वेदे (ऐतरेयोपनिषदि)।
२. 'अहं ब्रह्मास्मि'—इति यजुर्वेदे (बृहदारण्यकोपनिषदि)।
३. 'तत् त्वमसि'—इति सामवेदे (छान्दोग्योपनिषदि)।
४. 'अयमात्मा ब्रह्म'—इति अथर्ववेदे (माण्डूक्योपनिषदि)।

अर्थः—वाच्यः लक्ष्यश्च। समष्ट्यज्ञानम् एतदुपहितं सर्वज्ञत्वादि-विशिष्टम् ईश्वरचैतन्यम्, तदुभयाश्रयम् अनुपहितं स्वमहिम्नि प्रतिष्ठितम् अक्षरशब्दवाच्यं चिन्मात्रं चैतन्यम्—इत्येतत् त्रयं तप्तायःपिण्डवत् अन्योन्यतादात्म्याध्यासेन एकत्वेन प्रतीयमानं सत् तत्पदवाच्यार्थः भवति। एतदुपाध्युपहितस्य ईश्वरचैतन्यस्य आधारभूतं यत् अनुपहितं चैतन्यं तत् समष्ट्यज्ञानतदुपहितेश्वराभ्यां विविक्तं सत् भेदविवक्षया च तत्पदलक्ष्यार्थः भवति।

व्यष्टिभूतम् अज्ञानम् अन्तःकरणं वा, एतदुपहितम् असर्वज्ञत्वा-दिविशिष्टं जीवचैतन्यम्, तदनुपहितं चैतन्यम् इत्येतत् त्रयं तप्तायः-पिण्डवत् अन्योन्यतादात्म्याध्यासवशात् एकत्वेन प्रतीयमानं सत् त्वंपदवाच्यार्थः भवति। एतदुपाध्युपहितस्य जीवचैतन्यस्य आधारभूतम् यत् अनुपहितं प्रत्यगानन्दरूपं तुरीयं चैतन्यं तत् व्यष्ट्यज्ञानतदुपहितेश्वराभ्यां विविक्तं सत् भेदविवक्षया त्वंपद-लक्ष्यार्थः भवति।

एवं तत्त्वंपदार्थयोः परिशोधितयोः 'तत्त्वमसि' इति वाक्यस्य अर्थः अनुसन्धेयः। वाक्यार्थः तावत् त्रिविधः भवितुम् अर्हति—संसृष्टार्थः, विशिष्टार्थः, अखण्डार्थश्च इति। वाक्यं द्विविधं संसृष्टार्थं अखण्डार्थं चेति बालबोधिनी वचने विशिष्टार्थं संसृष्टार्थे अन्तर्भूतम् इति मन्तव्यम्। तत्र तत्त्वमसि इति वाक्यं न संसृष्टार्थं नापि विशिष्टार्थं बोधयति, अपि तु अखण्डार्थम् एव। तथाहि लोके 'गाम् आनय' इत्यादौ पदैः स्मारितानाम् आकाङ्क्षादिमतां गवादि-पदार्थानाम् अन्वयो वाक्यार्थत्वेन अङ्गीकृतः। यथा 'नीलमुत्पलम्' इत्यादौ नीलत्वादिविशिष्टस्य उत्पलस्य वाक्यार्थत्वं स्वीकृतम्। 'नीलम् उत्पलम्' इत्यत्र नीलपदार्थभूतस्य नीलगुणस्य शुक्लगुणादि-व्यावर्त्तकतया उत्पलपदार्थस्य उत्पलद्रव्यस्य च वस्त्रादिद्रव्य-व्यावर्त्तकतया अन्योन्यविशेषणविशेष्यरूपसंसर्गस्य अन्यतरविशिष्टस्य

अन्यतरस्य (नीलविशिष्टस्य उत्पलस्य उत्पलविशिष्टस्य नीलस्य वा) तत्संसर्गैक्यस्य वा वाक्यार्थत्वाङ्गीकारे प्रत्यक्षादिप्रमाणान्तरविरोधाभावात् अन्यतरविशिष्टान्यतरस्य तत्सम्बन्धैक्यस्य वाक्यार्थत्वं संगच्छते। 'तत्त्वमसि' इति वाक्ये तु नीलमुत्पलम् इत्यादिवाक्यवत् संसर्गः वा विशिष्टः वा वाक्यार्थः न संगच्छते। 'तत्त्वमसि' इति वाक्ये तु परोक्षत्वसर्वज्ञत्वादिविशिष्टेश्वरचैतन्यरूपस्य तत्पदार्थस्य अपरोक्षत्वकिञ्चिज्ज्ञत्वादिविशिष्टजीवचैतन्यरूपस्य त्वंपदार्थस्य च अन्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावसंसर्गस्य=अन्यतरविशिष्टस्य अन्यतरस्य उभयोः ऐक्यरूपस्य संसर्गस्य वा वाक्यार्थत्वाङ्गीकारे प्रत्यक्षत्वादिप्रमाणविरोधात् नीलम् उत्पलम् इत्यादि वाक्यवत् संसर्गः वा विशिष्टः वा वाक्यार्थः न संगच्छते। एवं च महावाक्येषु संसर्गविशिष्टयोः अन्यतरस्य वाक्यार्थत्वं नाभ्युपगम्यते, किन्तु अखण्डैरसत्त्वेन स्वगतादिभेदशून्यवस्तुमात्ररूपेण वाक्यार्थो विद्वद्भिः अभ्युपेयते। (तदर्थं च लक्षणा आश्रयणीया) तदुक्तम्—

संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र सम्मतः।
अखण्डैकरसत्वेन वाक्यार्थो विदुषां मतः॥ इति।[८५]

अखण्डार्थः[८६]

अपर्य्यायशब्दानां संसर्गागोचरप्रमितिजनकत्वम्, अपर्य्यायशब्दानाम् एकप्रातिपदिकार्थमात्रप्रमापकत्वं वा अखण्डार्थत्वम्। तदुक्तं पञ्चपादिकाकृद्भिः—'पदानां परस्परानवच्छिन्नार्थानाम् अनन्याकाङ्क्षानाम् अव्यतिरिक्तैकरस-प्रातिपदिकार्थमात्रान्वयः'[८७] इति। वाच्यतासम्बन्धेन परस्पराविशेषार्थानाम् अन्योन्यवाच्यवाचकानाम् अपर्य्यायानां वा अव्यतिरिक्तत्वात्; विशेषणीभूतेन पदार्थान्तरेण अविशेषितत्वात् वा एकरसं पदार्थान्तरसंसर्गनैरपेक्ष्येण भासमानं यत् तस्य प्रातिपदिकार्थमात्रस्य च अन्वयः अखण्डार्थत्वम् इत्यर्थः।

प्रथमलक्षणे संसर्गपदेन पदवृत्तिस्मारितातिरिक्तं विवक्षितम्। तथा च अपर्य्यायशब्दानां पदवृत्तिस्मारितातिरिक्तागोचरप्रमाजनकत्वम् आद्यलक्षणं पर्य्यवसितम्। न च 'अप्राप्तयोः प्राप्तिः संयोगः' इति संयोगलक्षणे अतिव्याप्तिः, तस्य पदवृत्तिस्मारितत्वात्। नापि 'द्विषदन्नं न भोक्तव्यम्' इत्येतत्परे 'विषं भुङ्क्ष्व' इति वाक्ये अतिव्याप्तिः, तत्र अनिष्टसाधनत्वसंसर्गस्य पदवृत्त्यस्मारितस्य प्रतिपाद्यत्वात्। द्वितीये लक्षणे एकत्वं प्रातिपदिकार्थस्य एकधर्मावच्छेदेन वृत्तिविषयत्वम्, न तु एकमात्रव्यक्तित्वम्। तदुक्तम् कल्पतरुकृद्भिः—'अविशिष्टमपर्य्यायानेकशब्दप्रकाशितम्। एकं वेदान्तनिष्णाता अखण्डं प्रतिपेदिरे॥'[८८] इति।

अखण्डार्थं नाम "अपर्यायशब्दानां संसर्गागोचरप्रमितिजनकत्वम्"[८९] इति चित्सुखाचार्य्यः। संसर्गपदेन अत्र स्वघटकपदवृत्तिस्मारितातिरिक्तं सम्भूयैकार्थप्रतिपादकत्वे सति अपर्य्यायानेकनामघटितत्वं च विवक्षितम्। तथा च सम्भूयैकार्थप्रतिपादकत्वे सति अपर्य्यायानेकनामघटितत्वे सति स्वघटकपदवृत्तिस्मारितान्याविषयकप्रमाजनकत्वम् अपर्यायशब्दानां पदवृत्तिस्मारितातिरिक्ता-गोचरप्रमाजनकत्वं वा अखण्डार्थत्वम् इति लक्षणं पर्य्यवसितम्। उक्तं च चित्सुखाचार्य्यैः एव—"संसर्गासङ्गिसम्यग्धीहेतुता या गिरामियम्। उक्ताऽखण्डार्थता यद्वा तत्प्रातिपदिकार्थता॥"[९०] इति। गिराम् अपर्य्यायशब्दानां या संसर्गानवगाहिनी संसर्गाविषयिणी वा सम्यग्धीः यथार्थज्ञानं तद्धेतुता=तज्जनकता प्राचीनैः अखण्डार्थता उक्ता। अखण्डार्थस्य लघुभूतं लक्षणं तावत् गिराम् अपर्य्यायशब्दानां या तत्प्रातिपदिकार्थता, इयम् अखण्डार्थता इति। गिरां यः प्रातिपदिकार्थः नामार्थः तत्प्रातिपदिकार्थत्वं तस्य अखण्डार्थत्वम् इत्यर्थः। ननु इदं लक्षणं न युक्तं संसर्गपरे 'गाम् आनय' इत्यादिवाक्ये तत्प्रातिपदिकार्थत्वस्य सत्त्वात् अतिव्याप्तेः इति चेत्। उच्यते—प्रातिपदिकार्थमात्रपरत्वम् अखण्डार्थत्वम् इति। प्राति-

पदिकार्थः नाम शक्तिलक्षणान्यतराधीनज्ञानविषयः। तन्मात्र-विषयत्वं च यद्यपि तदितराविषयज्ञानाजनकत्वे सति तद्विषयक-ज्ञानजनकत्वं तथापि तद्विषयकत्वांशविवक्षावैफल्यात् शक्तिलक्षणा-न्यतरज्ञानविषयातिरिक्ताविषयकत्वम् अखण्डार्थत्वम् इति फलति। तथा च यस्मात् वाक्यात् प्रातिपदिकार्थः एव प्रतीयते, न तदन्यार्थः, तद्वाक्यं प्रातिपदिकार्थमात्रपरम्। 'गाम् आनय' इत्यादि वाक्यं तु न तथा। तस्मात् प्रातिपदिकार्थान्यस्य संसर्गादेः प्रतीयमानत्वात् तत्र नातिव्याप्तिः।

'तत्त्वमसि' इति वाक्ये तु वाक्यघटकतत्त्वप्रादिपदवृत्त्या स्मारितस्य स्वरूपचैतन्यमात्रस्य एव प्रमाजननात् पदवृत्तिस्मारिता-न्यस्य प्रमानुत्पादात् लक्षणसमन्वयः।

तत्त्वमस्यादिवाक्यम् अखण्डार्थनिष्ठम् आत्मस्वरूपमात्रनिष्ठं वा अकार्य्यकारणद्रव्यमात्रनिष्ठत्वे सति समानाधिकरणत्वात् तन्मात्रप्रश्नोत्तरत्वात्, 'सोऽयं देवदत्तः' इति वाक्यवत्, इत्याद्यनुमानं च तत्त्वमस्यादिवाक्यानाम् अखण्डार्थत्वे प्रमाणम्। न च तत्त्वम-स्यादिवाक्ये तन्मात्रप्रश्नोत्तरत्वम् असिद्धम्, कोऽहम् इति आत्म-स्वरूपस्यैव प्रश्नविषयत्वेन तदधिकप्रत्युक्तेः अयुक्तेः। नाप्यत्र दृष्टान्तासिद्धिः, देवदत्तस्वरूपमात्रे पृष्टे अस्य प्रवृत्तेः। न च 'सोऽयं देवदत्तः' इत्ययं दृष्टान्तः साध्यविकलः, तद्देशकालैतद्देशकालयोः विशेषणयोः परित्यागेन विशेष्यमात्रस्य अभिन्नस्य बोधात् अखण्डा-र्थत्वसिद्धेः। उक्तं च कल्पतरुकारैः—"उपाधिभेदभिन्नार्थो येनैकः प्रतिपाद्यते। तदपि स्यादखण्डार्थं महत् कुम्भं यथा॥"[११] इति।

एवं 'सत्यं ज्ञानमनन्तं ब्रह्म'[१२] इत्यादि वाक्यानाम् अखण्डार्थत्वे सत्यादिवाक्यम्, अखण्डार्थनिष्ठं लक्षणवाक्यत्वात् तन्मात्रप्रश्नोत्तर-त्वात्, प्रकृष्टप्रकाशश्चन्द्रः इति वाक्यवत् इत्यनुमानम् प्रमाणम्। 'ब्रह्मविदाप्नोति परम्'[१३] इति ज्ञेयतया ब्रह्मण एव निर्दिष्टत्वेन

तन्मात्रस्यैव बुभुत्सितत्वात् न तन्मात्रप्रश्नोत्तरत्वम् असिद्धम्। सत्यत्वादिविशिष्टं वाच्यं यद्यपि सखण्डम्, तथाऽपि लक्ष्यम् अखण्डम् एव; असत्यत्वादिशङ्कानिवर्त्तनेन पदत्रयस्य सार्थक्यात्। लक्षणं हि क्वचिद् धर्मः, क्वचित् स्वरूपम्। यत्र धर्मः तत्र सखण्डार्थत्वे अपि यत्र स्वरूपं तत्र अखण्डार्थत्वे न विरोधः। 'प्रकृष्टप्रकाशश्चन्द्रः' इति दृष्टान्तोऽपि सङ्गतः, चन्द्रस्वरूपमात्रप्रश्नोत्तरे तत्र स्वरूपमात्र-भानस्यैव सम्भवात्।

तत्त्वमस्यादि वाक्यम् आत्मस्वरूपमात्रविवक्षया प्रयुक्तत्वात् अखण्डार्थं बोधयति। ननु जीवेश्वरयोः किञ्चिज्ज्ञत्वसर्वज्ञत्वादि-विशिष्टयोः अत्यन्तविलक्षणयोः तत्त्वमस्यादिमहावाक्यानि परस्पर-विरुद्धार्थप्रतिपादकानि कथम् अखण्डैकरसं ब्रह्म प्रतिपादयन्ति इति चेत्। उच्यते—साक्षात् ऐक्यप्रतिपादकत्वाभावे अपि लक्षणया सम्बन्धत्रयेण अखण्डैकार्थं प्रतिपादयति इति। सम्बन्धत्रयं नाम—पदयोः सामानाधिकरण्यम्, पदार्थयोः विशेषणविशेष्यभावः, प्रत्यगात्मपदार्थयोः लक्ष्यलक्षणभावश्च इति। तथा चोक्तं नैष्कर्म्य-सिद्धौ—"सामानाधिकरण्यञ्च विशेषणविशेष्यता। लक्ष्यलक्षण-सम्बन्धः पदार्थप्रत्यगात्मनाम्॥"[९८] इति।

भिन्नप्रवृत्तिनिमित्तयोः शब्दयोः एकस्मिन्नर्थे प्रवृत्तिः सामाना-धिकरण्यम्। तथा च—'सोऽयं देवदत्तः' इति वाक्ये 'सः' इति तत्पदस्य तत्कालतद्देशवैशिष्ट्यं प्रवृत्तिनिमित्तम्, एतत्कालैतद्-देशवैशिष्ट्यम् 'अयम्' इति शब्दस्य प्रवृत्तिनिमित्तम्, तयोः भिन्न-प्रवृत्तिनिमित्तयोः सोऽयं शब्दयोः एकस्मिन् देवदत्तपिण्डे तात्पर्य्य-सम्बन्धः सामानाधिकरण्यमित्यर्थः। तथा तत्त्वमसीति वाक्येऽपि परोक्षत्वसर्वज्ञत्वादिवैशिष्ट्यं तत्पदप्रवृत्तिनिमित्तम्, अपरोक्षत्व-किञ्चिज्ज्ञत्वादिवैशिष्ट्यं त्वंपदप्रवृत्तिनिमित्तम्। तथा च भिन्न-प्रवृत्तिनिमित्तयोः तत्त्वंपदयोः एकस्मिन् चैतन्ये तात्पर्य्यसम्बन्धः सामानाधिकरण्यमित्यर्थः।

विशेषणविशेष्यभावसम्बन्धः उच्यते = व्यावर्तकं विशेषणं, व्यावर्त्यं विशेष्यम्। तथा च 'सोऽयं देवदत्तः' इति वाक्ये एव अयं शब्दवाच्यो योऽसौ एतत्कालैतद्देशसम्बन्धविशिष्टो देवदत्तपिण्डः अयं, स इति तच्छब्दवाच्यात् तत्कालतद्देशविशिष्टदेवदत्तपिण्डात् भिन्नो न इति यदा प्रतीयते–तदा तच्छब्दार्थस्य अयंशब्दवाच्यार्थ-निष्ठभेदव्यावर्त्तकतया विशेषणत्वं, अयंशब्दार्थस्य व्यावर्त्यत्वाद् विशेष्यत्वम्। यदा च स इति तच्छब्दवाच्यः तत्कालतद्देशविशिष्टो देवदत्तपिण्डः सः अयमिति इदंशब्दवाच्यात् एतत्कालैतद्देश-सम्बन्धविशिष्टात् अस्मात् देवदत्तपिण्डात् न भिद्यते इति यदा प्रतीयते, तदा अयंशब्दवाच्यस्य तच्छब्दार्थनिष्ठभेदव्यावर्तकतया विशेषणत्वं तच्छब्दार्थस्य व्यावर्त्यत्वाद् विशेष्यत्वम्। तथा च 'अयमेव सः', 'स एवायम्' इत्यन्योन्यभेदव्यावर्तकतया सोऽयं शब्दार्थयोः परस्परं विशेषणविशेष्यभावः इत्यर्थः।

तत्त्वमसीति वाक्येऽपि त्वं-पदवाच्यं यदपरोक्षत्वकिञ्चिज्ज्ञत्वादि-विशिष्टचैतन्यं तत्पदवाच्यात् सर्वज्ञत्वादिविशिष्टचैतन्यात् न भिद्यते इति यदा प्रतीयते तदा तच्छब्दार्थस्य त्वं-पदार्थनिष्ठभेदव्यावर्तक-तया विशेषणत्वम्, त्वंपदार्थस्य व्यावर्त्यत्वात् विशेष्यत्वम्। तथा च तत्पदवाच्यं यत् सर्वज्ञत्वादिविशिष्टचैतन्यं तत् त्वंपदवाच्यात् किञ्चिज्ज्ञत्वादिविशिष्टचैतन्यात् न भिद्यत इति यदा प्रतीयते तदा त्वंपदार्थस्य तत्पदार्थनिष्ठभेदव्यावर्तकत्वेन विशेषणत्वं तत्पदार्थस्य व्यावर्त्यत्वेन विशेष्यत्वम्। तथा च त्वं तदसि, तत्त्वमसीति तत्त्वमपदार्थयोः परस्परव्यावर्तकत्वेन परस्परविशेषणविशेष्यभावः इत्यर्थः।

लक्ष्यलक्षणभावसम्बन्धः

असाधारणधर्मप्रतिपादकं वाक्यं लक्षकम्, तत्प्रतिपाद्यम् अवि-शिष्टं वस्तु लक्ष्यम्। तथा च सोऽयं देवदत्तः इत्यस्मिन् वाक्ये सोऽयं

शब्दयोः तदर्थयोर्वा विरुद्धतत्कालैतत्कालतद्देशैतद्देशविशिष्टपरिहारेण अविरुद्धदेवदत्तत्वविशिष्टदेवदत्तपिण्डेन सह देवदत्तत्वविशिष्टदेवदत्तवाचकशब्दस्य लक्ष्यलक्षणभावः सम्बन्धः इत्यर्थः। तथा तत्त्वं-पदयोः तदर्थयोर्वा विरुद्धपरोक्षत्वापरोक्षत्वादिविशिष्टत्वपरित्यागेन अविरुद्धचैतन्येन सह तत्त्वं पदयोः लक्ष्यलक्षणभावः सम्बन्ध इत्यर्थः। अतएव तत्त्वंपदयोः तदर्थयोश्च त्यक्तविरुद्धांशयोः लक्षणत्वं अखण्डचैतन्यस्य लक्ष्यत्वमिति भावः। इयमेव भागलक्षणा जहदजहल्लक्षणा वेत्युच्यते। तत्त्वंपदयोः वाच्यार्थयोः परोक्षचैतन्यापरोक्षचैतन्ययोः नीलमुत्पलम् इतिवत् सम्बन्धः न संगच्छते इति अत्र 'लक्षणा एव आश्रयणीया, इति भावः।

अत्रेदमवधेयम्-अभिधेयाविनाभूतप्रवृत्तिः लक्षणा। सा त्रिविधा, जहल्लक्षणा अजहल्लक्षणा जहदजहल्लक्षणा चेति। वाच्यार्थमशेषतः परित्यज्य तत्सम्बन्धिनि अर्थान्तरे वृत्तिः जहल्लक्षणा, वाच्यार्थापरित्यागेन तत्सम्बन्धिनि वृत्तिः अजहल्लक्षणा, वाच्यार्थैकदेशपरित्यागेन एकदेशवृत्तिः जहदजहल्लक्षणा। 'तत्त्वमसि' इति वाक्ये तु 'गङ्गायां घोषः' इतिवत् जहल्लक्षणा न सङ्गच्छते, 'श्येनः धावति' इतिवत् अजहल्लक्षणा अपि न सङ्गच्छते इति सोऽयं देवदत्त इतिवत् जहदजहल्लक्षणा एव आश्रयणीया। यथा 'सोऽयं देवदत्तः' इति वाक्यं तदर्थः वा तत्कालैतत्कालविशिष्टदेवदत्तस्य वाक्यार्थस्य अंशे विरोधात् (See संसर्गः वा) विरुद्धतत्कालैतत्कालविशिष्टांशं परित्यज्य अविरुद्धं देवदत्तमात्रं लक्षयति, तथा तत्त्वमसीति वाक्यमपि तदर्थो वा परोक्षत्वापरोक्षत्वादिविशिष्ट-चैतन्यैकत्वलक्षणस्य वाच्यार्थस्य अंशे विरोधात् विरुद्धपरोक्षत्वापरोक्षत्वविशिष्टत्वांशं परित्यज्य अविरुद्धम् अखण्डचैतन्यमात्रं लक्षयतीत्यत्र जहदजहल्लक्षणैव आश्रितेति। तथा चोक्तं पञ्चदश्याम्—

तत्त्वमस्यादिवाक्येषु लक्षणा भागलक्षणा।
सोऽयमित्यादिवाक्यस्थपदयोरिव नापरा॥ [१५] इति

न चात्र पदद्वये लक्षणाऽनुपपन्नेति वाच्यम्। 'विषं भुङ्क्ष्व' इत्यादौ इव उभयपदार्थलक्षणासम्भवात्।

एतच्च सम्बन्धत्रयं न परस्परस्वातन्त्र्येण, अपि तु मिलित्वा अखण्डार्थं बोधयति। तत्र प्रथमतः सामानाधिकरण्यज्ञानम्, ततः विशेषणविशेष्यज्ञानम्, ततः लक्षणया विरोधनाशे सति अखण्डार्थः भासते इति क्रमः। तथा चोक्तं संक्षेपशारीरके—'सामानाधिकरण्यमत्र भवति प्राथम्यभागन्वयः पश्चादेष विशेषणेतरया पश्चाद्विरोधोद्भवः। उत्पन्ने च विरोध एकरसके वस्तुन्यखण्डात्मके वृत्तिर्लक्षणया भवत्ययमिह ज्ञेयः क्रमः सूरिभिः'[१६] इति २।२८६१। सर्वज्ञात्मपादादीनां मतेऽपि 'तत्त्वमसि' इत्यादौ तत्पदवाच्यस्य सर्वज्ञत्वादिविशिष्टस्य त्वंपदवाच्येन अन्तःकरणविशिष्टेन ऐक्यायोगात् ऐक्यसिद्ध्यर्थं शुद्धचैतन्यस्वरूपे लक्षणा। विशेषणयोः सर्वज्ञत्वासर्वज्ञत्वयोः विरोधेन विशिष्टचैतन्ययोः विरुद्धत्वात् सामानाधिकरण्येन प्रतीयमानस्य ऐक्यस्य उपपत्त्यर्थं शुद्धचैतन्यस्वरूपे लक्षणा इत्यर्थः।

धर्मराजाध्वरीन्द्राणां मते तु 'सोऽयं देवदत्तः' 'तत्त्वमसि' इत्यादौ शक्त्या एव तात्पर्यप्रतीत्युपपत्तौ लक्षणाश्रयणम् अन्याय्यम्, तन्मते 'तत्त्वमसि' 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादौ विशेषणविशिष्टविशेष्यवाचकानां तदादिपदानाम् एकदेशपरत्वे अपि विशेष्यस्वरूपमात्रतात्पर्यकत्वेन न तत्र लक्षणा स्वीकार्या। तथा चोक्तम् अद्वैतसिद्धौ—"'सोऽयं देवदत्तः' इत्यादिवाक्ये इव शक्यैकदेशस्य अन्वयाभ्युपगमात् विशेषणबाधेन विशेष्यमात्रान्वयस्य एवात्र लक्षणाशब्देन व्यपदेशात्" इति। अत्र 'लाक्षणिकं पदं नानुभावकम्' इति सिद्धान्तात् सर्वपदलाक्षणिकत्वे तत्त्वमसीति वाक्यस्य अनुभावकत्वं तथा प्रामाण्यं न स्यादिति धर्मराजाध्वरीन्द्रेण तन्मतं परित्यक्तमिति परिभाषाप्रकाशिकाकाराः। तदयुक्तम्, अद्वैतिनां मते

'कुमतिः पशुः' इत्यादौ सर्वपदलाक्षणिके वाक्ये अवबोकत्वसिद्धयर्थम् सर्वपदलाक्षणिकत्वे अपि अनुभावकत्वोपपत्तेः। तदुक्तम् अद्वैतसिद्धौ— 'लाक्षणिकत्वे अपि अनुभावकत्वोपपत्तेः'[६७] इति।

ननु विशिष्टवाचकपदेभ्यः विरुद्धानां विशिष्टानाम् अर्थानाम् उपस्थितौ तेषाम् अभेदान्वयासम्भवात् तात्पर्य्यविषयीभूतार्थस्य स्वरूपमात्रस्य प्रतीतिः नोपपद्यते। अतः तत्प्रतीत्युपपत्तये लक्षणा अङ्गीक्रियते, लक्षणयैव स्वरूपमात्रोपस्थितिसम्भवात्। न हि लक्षणां विना स्वरूपमात्रस्य उपस्थितिः शक्त्या सम्भवति, तस्याः विशिष्टोपस्थापकत्वात्। तत् कथं लक्षणा न स्वीकार्य्या इति चेत्। उच्यते—शक्त्युपस्थितयोः विशिष्टयोः अभेदान्वयानुपपत्तौ विशेष्ययोः शक्त्युपस्थितयोः एव अन्वयाविरोधात्। यथा नानार्थकशब्दानां नानार्थशक्तत्वे अपि एकार्थ तात्पर्य्यनिश्चयेन एकार्थोपस्थापकत्वं, तद्वद् विशिष्टवाचकानाम् अपि तदादिपदानां विशेष्यस्वरूपमात्रे तात्पर्य्यनिश्चयेन तत्रैव विशेष्यस्वरूपमात्रे तत्तत्पदानां संस्कारोद्बोधात् स्मृतिरूपकार्य्यजनने संस्कारस्य सहकारित्वात् तदादिपदज्ञानसहकृतात् तत्संस्कारात् विशेष्यमात्रोपस्थितिः शक्त्यैव भवतीति लक्षणा नाश्रयणीया इति भावः। तथा चोक्तं सिद्धान्तबिन्दौ 'अद्वितीयब्रह्मविजिज्ञापयिषया प्रवृत्तानां सत्यज्ञानादिपदानाम् उपाधिविशिष्टचैतन्ये शक्तत्वे अपि चैतन्यमात्रे तात्पर्य्येण तत्रैव तदंशे एव संस्कारोद्बोधात्' इति।

यथा घटोऽनित्य इत्यत्र घटपदवाच्यैकदेशेन घटेन सह अनित्यत्वस्य अन्वयः, न तु घटत्वेन सह। तथाहि जातिविशिष्टव्यक्तिशक्तिवादे घटपदवाच्यस्य द्वौ अंशौ—घटत्वं घटश्चेति। अतएव घटत्वस्य घटपदवाच्यैकदेशत्वम्। तस्य च घटत्वस्य नित्यत्वात् अनित्यत्वेन सह अन्वयायोग्यत्वे अपि अनित्यस्य घटस्य अनित्यत्वेन सह अन्वययोग्यत्वात् घटव्यक्त्या सह एव अनित्यत्वस्य अन्वयः

गृह्यते। एवं च घटादिपदस्य जातिविशिष्टव्यक्तिशक्तत्वे अपि घटोऽनित्यः इति वाक्यश्रवणात् श्रोतुः अनित्यत्वविशिष्टे घटे एव तात्पर्यनिश्चयेन तत्र घटांशे एव संस्कारोद्बोधे सति तादृशसंस्कार-सहकृताद् घटपदज्ञानाद् घटव्यक्तिमात्रोपस्थितौ घटव्यक्त्या सह अनित्यत्वस्य अन्वयः। सोऽयम् इत्यादौ अपि एवमेव, तत्र लक्षणा-स्वीकारे घटोऽनित्यः इत्यत्रापि लक्षणाप्रसङ्गात्। न च एवं घटो नित्यः इत्यादौ विशेषणपरे घटादिपदे लक्षणा न स्यात् इति वाच्यम्, यत्र पदार्थैकदेशस्य विशेषणतया उपस्थितिः तत्रैव तस्य स्वातन्त्र्येण उपस्थितये लक्षणाभ्युपगमः। घटपदाद् वाच्यैकदेशयोः घटघटत्वयोः उपस्थितिसाम्ये अपि विशेषणस्य घटत्वस्य स्वातन्त्र्येण उपस्थितये लक्षणा स्वीकर्त्तव्या इत्यर्थः। तथाहि नित्यः घटः इत्यत्र घटपदाद् घटत्वस्य शक्त्या स्वातन्त्र्येण अनुपस्थित्या तादृशोपस्थित्यर्थं घटपदस्य घटत्वे लक्षणा।

एवं तत्त्वमसीति वाक्येऽपि न लक्षणा, शक्त्यैव विशेष्यमात्रोप-स्थितौ अन्वयनिर्वाहात्, शक्त्या स्वातन्त्र्येण उपस्थितयोः तत्-त्वम्-पदार्थयोः अभेदान्वये बाधकाभावात्। विरुद्धयोः विशिष्टयोः अभेदान्वयबाधे अपि तत्-त्वम्-पदोपस्थाप्ययोः स्वरूपचैतन्ययोः ऐक्यान्वये न किमपि बाधकम् अस्ति, आकाङ्क्षादीनां सत्त्वाद् इति भावः।

विशेष्यपरे अपि पदे लक्षणास्वीकारे गेहे घटः, घटे रूपं, घटम् आनय इत्यादौ घटत्वगेहत्वादेः अभिमतान्वयबोधायोग्यतया घटादिव्यक्तीनां च अभिमतान्वयोग्यतया तत्रापि घटादिपदानां लक्षणयैव घटव्यक्त्याद्युपस्थितिः स्वीकार्या स्यात्। तत्र तद्वाक्य-घटकेन घटपदेन घटमात्रोपस्थितौ एव तात्पर्यविषयीभूतस्य गृह-वृत्तित्वस्य घटेन सह अन्वयो घटते, तस्य तत्साकाङ्क्षत्वात्, न तु घटत्वेन सह, तस्य घटवृत्तित्वेन गृहावृत्तितया तन्निराकांक्षत्वात्।

घटव्यक्तिमात्रोपस्थितौ च घटपदस्य विशेष्यमात्रपरत्वं वक्तव्यम्। तथा च विशेष्यमात्रपरे पदे लक्षणास्वीकारे अत्रापि घटपदेन विशेष्यभूतघटव्यक्त्युपस्थितये शक्तिं परित्यज्य लक्षणा स्वीकार्या स्यात्। न चात्र लक्षणा अङ्गीक्रियते केनापि। कुतः एवम् इति चेत्। विशेष्यतया शक्त्युपस्थितेनैव घटादिना गृहवृत्तित्वादेः अन्वयसम्भवात् इति ब्रूमः। सोऽयं इत्यादि वाक्येऽपि शक्त्युपस्थितानाम् अर्थानाम् अन्वयसम्भवात् न तत्र लक्षणा स्वीकार्या, अभेदान्वययोग्यस्य देवदत्तस्वरूपस्य विशेष्यतयैव शक्त्या उपस्थितत्वात्। एवं तत्त्वमसि इत्यादिवाक्येऽपि स्वरूपचैतन्यस्य विशेष्यतयैव शक्त्या उपस्थितत्वात् तत्र लक्षणास्वीकारः न प्रयोजनीयः। तेषां मते यद्यपि तत्त्वमसीति वाक्ये लक्षणाया अनावश्यकत्वम्, तथापि तत्र आचार्याणां लक्षणोक्तिः अभ्युपगमवादेन बोध्या।

अत्र इदं बोद्धव्यम्—'अयो दहति' इत्येतावन्मात्रे उक्ते अयसः दहनशक्त्यभावात् तात्पर्यानुपपत्तिः तत्र चेत् उच्यते—यदेव तप्तायः, स एव अग्निः इति अनयोः अभेदः इति, तर्हि अयो दहति इत्यस्य वाक्यार्थेनैव अवबोधः। यदि तु तप्तायसः अग्नेश्च भेदो विवक्षते तप्तायसः अयस्त्वधर्मवत्त्वात् अग्नेश्च अग्नित्वधर्मवत्त्वात्, तर्हि लक्षणया अयो दहति इत्यस्य वाक्यस्य अर्थः अग्निः दहति इत्येवमेव स्यात्। एवमेव तत्त्वमसीति महावाक्ये अपि तत्पदस्य अनुपहितविशुद्धचैतन्यरूपार्थकत्वात् त्वं पदस्य च उपहितचैतन्यरूपार्थकत्वात् आपाततः उभयोः ऐक्ये बाधिते सति लक्षणया उभयोः चैतन्यरूपम्। अर्थं गृहीत्वा अभेदः व्यवस्थाप्यते। यदि तु सर्वं खल्विदं ब्रह्म इत्यादिश्रुतिबलात् सर्वत्रैव एकं चैतन्यम् अस्तीति कृत्वा चैतन्यत्वेन उभयोः ऐक्यं विवक्ष्यते तर्हि वाच्यार्थेनैव महावाक्यस्य अवबोधः स्यात्।

७. श्रवणादौ विधिविचार[९८] :

'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति वाक्योपस्थापिते दर्शने विधिः नास्ति, ज्ञानरूपस्य दर्शनस्य अपुरुषतन्त्रत्वात्, विधेयत्वानुपपत्तेः इत्यत्र भामतीपन्थिनां विवरण-पन्थिनां च मतैक्यम् अस्ति। श्रवणादौ विधिसद्भावे तु मतभेदः अस्ति। तथाहि, श्रवणादौ न कोऽपि विधिः अस्ति इति भामती-पन्थिनः। तेषां मते श्रवणं मननं निदिध्यासनं च दर्शनवत् आत्म-विषयकत्वात् ज्ञानपदवाच्यम्। तथाहि श्रवणं नाम शास्त्राचा-र्य्योपदेशजनितम् आत्मविषयकं ज्ञानं, न तु तात्पर्य्यविचाररूपा क्रिया। 'आत्मा श्रोतव्यः' इत्यत्र आत्मश्रवणयोः विषयविषयिरूपः ज्ञेयज्ञानरूपः सम्बन्धो वा प्रतीयते इति श्रवणम् आत्मानं विषयी-करोति इति तस्य ज्ञानपदवाच्यत्वम्। श्रवणस्य विचाररूपकर्मत्वे न हि आत्मा तस्य विषयो भविष्यति, विचाररूपक्रियया सह निष्क्रियस्य आत्मनः साक्षात्सम्बन्धाभावात्। तथा च आत्मनः विचाररूपक्रियायाः कर्मत्वं न स्यात्। कर्मत्वं तु अत्र स्वीक्रियते। तच्च श्रवणस्य ज्ञानरूपत्वे स्वीकृते सम्भवतीति। ज्ञाने च विध्य-भावः इति श्रवणे विधिः न स्वीकरणीयः।

एवं मननम् अपि न क्रियारूपम्, अपि तु अनुमित्यात्मकं ज्ञानम्। श्रुत्यर्थं दृढीकर्तुं तर्करूपं मननम् उल्लिखितम् इति हि वार्तिककाराः वदन्ति। तथैव निदिध्यासनम् अपि ब्रह्मविषयकं विज्ञानम्, 'आत्मनि खल्वरे दृष्टे श्रुते मते' विज्ञाते'[१००] इति 'आत्मनो वा अरे दर्शनेन श्रवणेन मत्या। विज्ञानेन'[१०१] इति च निदिध्यासनस्य पर्य्यायत्वेन विज्ञात-विज्ञानशब्दयोः प्रयोगात्।

एवं श्रवणमनननिदिध्यासनानां ज्ञानरूपत्वात् तेषु न विधि-रस्ति। अतएव समन्वयसूत्रे "किमर्थानि तर्हि आत्मा वा अरे

द्रष्टव्यः श्रोतव्यः" इत्यादीनि विधिच्छायानि वचनानि? स्वाभाविकप्रवृत्तिविषयविमुखीकरणार्थानीति ब्रूमः"।[102] इत्युक्तम्।

श्रवणस्य वेदान्ततात्पर्य्यविचाररूपत्वे अपि तु तात्पर्य्यनिश्चयपूर्वकः वेदान्ततात्पर्य्यविषये भ्रमसंशयादिनिरासः एव तस्य फलं भवेत्, पापादिप्रतिबन्धकानां निरासः ब्रह्मज्ञानं वा तस्य फलं न भवेत्। भ्रमादेः निरासरूपम् एतत् दृष्टं फलं तु लौकिकेनैव उपायेन प्राप्यते इति अदृष्टफलार्थं अपूर्वविधिस्वीकारः निरर्थकः। श्रवणादिसाधनानां च विकल्परूपेण समुच्चितरूपेण वा न साधनान्तरं प्राप्यते इति न नियमविधिः, नापि परिसंख्याविधिः स्वीकरणीयः। एवं श्रवणादौ विधित्रयस्य अवकाशो नास्ति। तदुक्तम्—"अन्यतः प्राप्ता एव हि श्रवणादयः विधिसरूपैर्वाक्यैः अनूद्यन्ते"।[103] मनननिदिध्यासनयोरपि न विधिः, तयोः अन्वयव्यतिरेकसिद्धसाक्षात्कारफलयोः विधिसरूपैः वचनैः अनुवादात्[104]। 'द्रष्टव्यः' 'निदिध्यासितव्यः' इति च विधिसरूपं न विधिरित्यप्युक्तम्"[105] 'एतत्-साधनानि च श्रवणानि विहितानि श्रोतव्यः इत्यादिना'[106] इति भामतीवचने तु 'विहितानि' इत्यस्य 'विधिवन्निगदैर्बोधितानि' इति व्याख्यानात् न विरोधः। एवम् 'अपूर्वत्वाद् विधिरास्थेय इत्यर्थः'[107] इति भामतीवचने अपि 'विधित्वं च अर्थवादस्यैव सतः वाक्यस्य प्रशंसाद्वारेण प्रवृत्त्यतिशयकरत्वम्। अतएव समन्वयसूत्रे भाष्यम् 'विधिच्छायानि वचनानि इति' इति कल्पतरुकारैः समाहितम्।

ननु सूत्रकारैः भाष्यकारैश्च 'सहकार्य्यान्तरविधिः'[109] इत्यादौ बाल्य-पाण्डित्य-मौनशब्दैः क्रमेण अभिहितेषु श्रवण-मनन-निदिध्यासनेषु विधिः स्वीकृतः इति चेत्। मैवम्, यतः विचारः विचार्य्यविषयकतात्पर्य्यविषये निश्चयात्मकज्ञानस्य कारणं भवतीति वस्तुसिद्धेः हेतुभूतानां युक्तीनां स्मरणरूपं मननम्, तु तस्यैव वस्तुज्ञानस्य पदार्थाकारायाः वृत्तेश्च अभ्यासरूपं निदिध्यासनं वस्तुज्ञान-

प्रतिबन्धकनिरासस्य कारणं भवतीति च लौकिकप्रमाणैः सिद्धम्। तस्मात् श्रवणादौ विधेः अपेक्षा नास्ति। परन्तु विधिच्छाया-तुल्यार्थवादवाक्यवत् प्रशंसामुखेन श्रवणादौ प्रवृत्तेः अतिशयं सम्पादयितुं विधेः प्रयोगः कृतः।

एवं श्रवणादौ विधेरभावात् कर्मकाण्डीयविचारवत् ब्रह्म-काण्डीयविचारोऽपि 'स्वाध्यायोऽध्येतव्यः' इति अध्ययनविधेः एव लभ्यते इति भामतीपन्थिनः।

विवरणपन्थिनां मते तु श्रवणादौ विधिः सम्भवति। तथाहि, श्रवणं नाम वेदान्तानाम् अद्वितीये ब्रह्मणि यत् तात्पर्यम् तदवधार-णानुकूला मानसी क्रिया। मननं नाम शब्दावधारिते अर्थे मानान्त-रस्य असम्भावनाबुद्धेश्च विरोधशङ्कायां तन्निराकरणानुकूल-तर्कात्मक-ज्ञानजनकः मानसः व्यापारः। निदिध्यासनं नाम अनादिविषयसंस्कारेण विषयेषु आकृष्यमाणस्य चित्तस्य विषयेभ्यः अपकृष्य आत्मविषयकमनःस्थैर्यानुकूलः मानसः व्यापारः। एवं श्रवणादीनां मानसक्रियारूपत्वेन पुरुषतन्त्रत्वाद्, युक्तं तेषां विधेय-त्वम्। तदुक्तम्—"अमृतत्वसाधनम् आत्मदर्शनं 'द्रष्टव्यः' इत्यनूदय-तादर्थ्येन मनननिदिध्यासनाभ्यां फलोपकार्यङ्गाभ्यां सह श्रवणं नाम अङ्गिविधीयते'[१०९] इति। श्रवणादयस्तु क्रियारूपत्वात् सम्यग्दर्शनस्य दृष्टादृष्टोपकारितया विधेयाः एवेति। .. मनननिदि-ध्यासनोपबृंहितस्य श्रवणस्य सम्यग्दर्शनाय विधेयत्वम् अङ्गीकृत्य-प्रथमसूत्रं प्रवृत्तम्" इति।

श्रवणादिविधेः नियमविधित्वे एव भाष्यम् इदं सङ्गच्छते— "दर्शनपर्य्यवसानानि हि श्रवणादीनि आवर्तमानानि दृष्टार्थानि भवन्ति, यथा अवघातादीनि तण्डुलनिष्पत्त्यवसानानि"[११०] इति। ब्रह्मदर्शनहेतोः श्रवणस्य दृष्टफलतया दर्शपूर्णमासिकावघातन्यायः एव अत्र प्राप्यते। अतएव अत्र नियमविधिः।

तत्र विचारविधायक-श्रवणविधिरेव जिज्ञासासूत्रमूलम् इति विवरणपन्थिनां मतम्। ननु, 'श्रोतव्यः' इति विधिः मोक्षसाधन-ब्रह्मात्मज्ञानाय वेदान्तवाक्यविचारं साधनचतुष्टयसम्पन्नस्य विधातुं न शक्नोति। तथाहि, स किं ज्योतिष्टोमादेः इव अपूर्वविधिः उत अवघातादिवत् नियमविधिः, किं वा 'पञ्च पञ्चनखा भक्ष्याः' इत्यादिवत् परिसंख्याविधिः। नाद्यः, दृष्टं फलं यद् ब्रह्मज्ञानं तत् प्रति वेदान्तश्रवणादीनां साधनत्वस्य अन्वयव्यतिरेकाभ्यां सिद्धत्वात्। प्रसिद्धं हि लोके वैद्यशास्त्रश्रवणस्य वैद्यशास्त्र-प्रतिपाद्यविषयावगमं प्रति साधनत्वम्। अपूर्वविधेः अत्यन्ताप्राप्त-विषयकत्वात् श्रवणादीनां च ज्ञानसाधनत्वम् अन्यतः प्राप्तमिति नापूर्वविधित्वं तस्येत्यर्थः। न द्वितीयः, नियमादृष्टस्य कल्पनायां हेत्वभावात्। अवघातादिस्थले तावत् नियमादृष्टात् यत् परमापूर्वं जायते, तदेव नियमादृष्टस्य कल्पकं भवति। न च ब्रह्मज्ञानम् अदृष्टजन्यम्, केवलव्यतिरेकाभावात्। न हि वेदान्तश्रवणादौ सत्यपि नियमादृष्टाभावरूपेण अपराधेन ब्रह्मज्ञानानुत्पत्तिः दृश्यते। समन्वयसूत्रभाष्ये भाष्यकारैः नियमविधेः प्रयत्नेन निराकृतत्वात्, नियमविध्यङ्गीकारे वेदान्तानां विधिपरत्वं ब्रह्मपरत्वं च इत्युभय-कल्पनायां वाक्यभेदप्रसङ्गात् नात्र नियमविधिः। नापि तृतीयः, पञ्चनखापञ्चनखभक्षणयोः तावत् रागतः प्राप्तिर्भवति, तत्र अपञ्चनखभक्षणस्य परिवर्जनं विधीयते। आत्मसाक्षात्कारस्य तु उपनिषद्व्यतिरिक्तप्रमाणान्तरात् प्राप्तिर्नास्तीति अपञ्चनख-भक्षणपरिवर्जनवत् उपायान्तरप्राप्तवस्तुनः परिहारः न सम्भवति। तस्मात् श्रवणे न कोऽपि विधिः सम्भवति[111]।

तत्रोच्यते—अपूर्वपरिसंख्याविधिनिराकरणं तावद् युक्तम्, नियमविधिस्तु न निराकर्तुं शक्यते। तथा च यथा दृष्टफलस्यापि धर्मज्ञानस्य साधने वेदाध्ययने नियमविधिः अङ्गीक्रियते, तथा परमपुरुषार्थब्रह्मसाक्षात्कारसाधने श्रवणे अपि नियमविधिः

स्वीक्रियते। न हि परमापूर्वमेव नियमविधिकल्पकम्, अपि तु फलमेव। न हि कस्यचित् प्रधानस्य प्रकरणे अध्ययनं विहितम्, अपि तु स्वातन्त्र्येण इति न परमापूर्वं अयध्यनविधेः कल्पकम्, अपि तु परमापूर्वसमूहरूपं फलम्। एवं ब्रह्मज्ञानरूपं फलमेव वेदान्तश्रवणगतनियमविधेः कल्पकम्। यदि अध्ययने नियमादृष्टजन्यं यागीयापूर्वं तत् कल्पकं स्यात्, तर्हि श्रवणेऽपि ब्रह्मज्ञानं तत् कल्पकम् अस्तु। ब्रह्मज्ञानस्य सर्वादृष्टजन्यत्वात्। "सर्वं कर्माखिलं पार्थज्ञाने परिसमाप्यते'[११२] इति स्मरणात्।"

ननु वेदान्तश्रवणव्यतिरिक्तस्य साधनान्तरस्य ब्रह्मज्ञानं प्रति साधनभावः अन्वयव्यतिरेकादिना न प्राप्यते, निर्विशेषस्य ब्रह्मणः वेदान्तैकसमधिगम्यत्वात्। तथा च कथं नियमसिद्धिः इति चेत्? उच्यते, मैवम्, 'व्रीहीन् अवहन्ति' इत्यत्र अपूर्वसम्बन्धिनां व्रीहीणां केवलं शस्त्रेण एव अधिगमः भवति। एतेभ्यः अपूर्वहेतुभूतेभ्यः व्रीहीभ्यः तुषविमोक्षे साधनभूतानां दलनादीनाम् प्रमाणान्तरेण अप्राप्तो अपि अवघाते यथा नियमविधिः अङ्गीक्रियते, तथा श्रवणे अपि पाक्षिकत्वम् अन्तरेणैव नियमः अस्तु। अथ व्रीहित्वरूपसामान्यधर्मसत्त्वात् अपूर्वसाधने व्रीहौ अपि नखदलनादिरूपाणां साधनानां प्राप्तिः स्यात् इति अत्र नियमः स्वीक्रीयते इति तदत्रापि समानम्; भाषापुस्तकादिपाठरूपाणां साधनानां सुवचत्वात्।

ननु, विधिपरत्वे वेदान्तानां तन्निष्ठतया ब्रह्मस्वरूपस्य असिद्धयादिदोषप्रसङ्गात् नास्ति श्रवणादिविधानमिति भाष्यकारैरेव दर्शितम्। "लिङ्गादयः स्तूयमाणा अपि विधयः कुण्ठी भवन्ति...... आत्मा वा अरे द्रष्टव्यः श्रोतव्य इति विधिच्छायानि वचनानि"[११३] इति। अतः भाष्यविरोधप्रसङ्गः इति चेत्। उच्यते—ज्ञानविधिस्तत्र निराकृतः, न श्रवणादिविधिः इति। सामान्यवचनं कथं विशेषविषयत्वेन व्याख्यायते इति चेत्। उच्यते ज्ञानविधौ

उक्तदोषस्य श्रवणविधौ प्रसङ्गाभावात्। कोऽसौ दोषः? कथं तत्प्रसङ्गाभावः इति चेत्, उच्यते—दर्शनविधाने हि 'प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः प्राधान्येन इति न्यायेन प्रत्ययार्थस्य नियोगस्यैव प्राधान्यात् दर्शनस्य प्रकृत्यर्थतया गुणभूतत्वेन तदविशेषणस्य ब्रह्मणः अपि सुतरां गुणभावः स्यात्, ततो न वेदान्तैः ब्रह्म सिद्धयेत्। फलत्वेन प्रधानं ब्रह्मदर्शनम् उद्दिश्य श्रवणविधाने तु स्वप्रधानफल-भूतदर्शनविशेषणतया ज्ञायमानं ब्रह्म अपि स्वप्रधानं भवति, न तु गुणभूतम् इति न कोऽपि दोषः। विधेयविचारं प्रति प्रधानभूतं दर्शनम्, तदविशेषणतया च ब्रह्मणः विचारं प्रति प्राधान्यम् इत्यर्थः। एवं च वेदान्तैः स्वप्रधानब्रह्मप्रतिपादनं तद्दर्शनाय श्रवणादिविधानं च उपपद्यते।

ननु एवम् अपि 'आत्मनस्तु कामाय सर्वं प्रियम्' इति उपक्रमात् 'आत्मनि विज्ञाते सर्वमिदं विज्ञातं भवति' इति आत्मनि उपसंहारात् च एकस्मिन् आत्मप्रदिपादनपरे वाक्ये अवान्तरवाक्यभेदेन श्रवणादिविधानं कथं कल्प्यते इति चेत्। तत्रोच्यते-वाक्यभेददोषश्च किम् एकदेशिना प्रदर्श्यते, किं वा सिद्धान्तिना? नाद्यः वेदान्तेऽपि अवान्तरवाक्यभेदेन 'विविदिषन्ति यज्ञेन' इत्यत्र ज्ञानसाधनत्वेन यज्ञादिविधेः अङ्गीकारात् सिद्धान्तिनाऽपि नायं दोषः उद्भावयितव्यः, प्रेताग्निहोत्रप्रकरणे 'अधस्तात् समिधं धारयन्ननुद्रवेत्' इति विधाय 'उपरि हि देवेभ्यो धारयति' इति पठितम्। तत्र दैविकमुपरि धारणम् अन्यपकरणे श्रुतमपि विधेयमिति 'विधिस्तु धारणे अपूर्वत्वात्'[११४] इत्यधिकरणे निर्णीतत्वात्। अथ कथञ्चिद् एत-धिकरणं प्राभाकरो नाङ्गीकुर्य्यात् तथापि दर्शपूर्णमासप्रकरणे 'तिस्रो रात्रीर्व्रतं चरेत्' इति रजस्वलायाः व्रतकलापविधानमङ्गी-करोत्येव। तथा दर्शपूर्णमासयोरेव श्रूयते—'मलवद्वाससा न संवदेत्' इति। तत्र 'तामपरुध्य यजेत' इति उक्तत्वात् सर्वस्मात् क्रतुव्यापारात् निवृत्ततया रजस्वलया संवादप्रसक्त्यभावाद् न

क्रत्वर्थत्वेन प्रतिषेधः, किन्तु स्वातन्त्र्येण प्रवर्तमानस्य पुरुषस्य रजस्वलया संवादप्रसक्तौ सत्यां निषिध्यते पुरुषार्थतया इति। तस्माद् ब्रह्मप्रकरणेऽपि श्रवणं विधीयताम् अत्र का हानिः। अथ व्रतकलापस्य प्रकरणान्वयासम्भावाद् अगत्या वाक्यभेदाश्रयणम्, इह तु तव्य—प्रत्ययस्य अर्हार्थत्वेन अपि अन्वयसम्भवात् न तद्युक्तमिति चेत्। उच्यते—तर्हि 'तस्माद् ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्। बाल्यं च पाण्डित्यं च निर्विद्य मुनिरमौनं च मौनं च निर्विद्याथ ब्राह्मणः'[११५] इति वाक्यं श्रवणादिविधायकमस्तु। तत्र आपाततः श्रवणाद्यप्रतीतौ अपि वाक्यपर्यालोचने वाक्यस्य श्रवणादिविधिपरत्वात्, 'सहकार्यन्तरविधिः' इति सूत्रे पाण्डित्य-बाल्ययोः=श्रवणमननयोः विधिं सिद्धवत्कृत्य अथ मुनिः इति वाक्यशेषे निदिध्यासनरूपस्य मौनस्य विधित्वप्रतिपादनात्। तथा च भाष्यम्—विद्यासहकारिणो मौनस्य बाल्यपाण्डित्यवत् विधिरेव आश्रयितव्यः अपूर्वत्वात्'[११६] इति। ननु एवमपि अधीतस्वाध्यायेन अवगतस्य श्रोतव्यः इत्यस्य श्रवणविधेः अनुपपत्तिः तदवस्थैवेति चेत्। न, तव्यप्रत्ययस्य विधौ अपि स्मरणात्, 'तद्विजिज्ञासस्य'[११७] इत्यादिषु समानप्रकरणेषु श्रुत्यन्तरेषु श्रवणस्य अवश्यं वाक्यभेदेन विधेः अङ्गीकर्तव्यत्वात् च। अतः सर्वथा तावत् मनननिदिध्यासनाभ्याम् अङ्गभूताभ्यां सह श्रवणविधानम् उपपन्नमेव।

८. समाधिः[११८]

यमनियमवता जितासनेन परिहृतप्राणविक्षेपेण, प्रत्याहृतेन्द्रियग्रामेण अधिकारिणा अद्वितीयवस्तुनिअन्तरिन्द्रियधारणमभ्यस्यते। तत्र अद्वितीयवस्तुनि विच्छिद्यविच्छिद्य अन्तरिन्द्रियप्रवाहः चित्तस्य-एकतानता ध्यानम्। ततः परं चित्तस्यज्ञेयात्मना निश्चलावस्थानं जायते स एव समाधिः। तथा च चित्तस्य ज्ञेयात्मना निश्चलावस्थानं समाधिरिति विद्वन्मनोरञ्जन्याम्। व्युत्थाननिरोध-

संस्कारयोः अभिभवप्रादुर्भावे सति चित्तस्य एकाग्रतापरिणामः समाधिः इति च सुबोधिन्याम्। सम्यक्आधीयते एकाग्रीक्रियते विक्षेपान् परिहृत्य मनः यत्र स समाधिः इति व्युत्पत्तेः। पातञ्जलयोगसूत्रे त्वेवमुक्तम्—'तदेवार्थमात्र निर्भासं स्वरूपशून्यमिव समाधिः'[११९] इति। ध्यानं यदा अर्थाकारसमावेशात् उद्भूतार्थरूपं न्यग्भूतज्ञानस्वरूपत्वेन स्वरूपशून्यताम् इव आपद्यते सः समाधिः इत्युच्यते इत्यर्थः।

समाधिश्च द्विविधः सविकल्पकः निर्व्विकल्पकश्च। सविकल्पकः सम्प्रज्ञातसमाधिः, निर्व्विकल्पकश्च असम्प्रज्ञातसमाधिः इति साम्प्रदायिको संज्ञा।

तत्र सविकल्पकः नाम ज्ञातृज्ञानादिविकल्पलयानपेक्षया अद्वितीये वस्तुनि तदाकाराकारितायाः चित्तवृत्तः अवस्थानम्। ज्ञाता ज्ञानं ज्ञेयश्चेति यः विकल्पः विभागोल्लेखः तस्य लयः अभावः, तदनपेक्षया= ज्ञात्रादिविकल्पोल्लेखपूर्वकम् परब्रह्मणि चित्तवृत्तेः अवस्थानं सविकल्पकः समाधिः इत्यर्थः। "वितर्कविचारानन्दास्मितानुगमात् सम्प्रज्ञातः"[१२०] इति पतञ्जलिः। सम्यक् संशयविपर्ययरहितत्वेन प्रज्ञायते प्रकर्षेण ज्ञायते भाव्यस्य स्वरूपं येन स सम्प्रज्ञातः समाधिः इत्यर्थः।

सविकल्पोऽपि द्विविधः। अहं ब्रह्मास्मीति शब्दानुविद्धतया अद्वितीये वस्तुनि चित्तवृत्तेः अवस्थानम् इत्येकः। द्वितीयस्तु ज्ञातृज्ञानज्ञेयत्रिपुटीलयानपेक्षया अहं ब्रह्मास्मीति शब्दाननुविद्धतया तथैव अद्वितीये वस्तुनि चित्तवृत्तेः अविच्छेदेन अवस्थानम् इति।

ननु 'भक्षितेऽपि लशुने न शान्तो व्याधिः' इति न्यायेन उक्तसविकल्पसमाध्योः सकलभेदनिराकरणे प्रवृत्तयोः तयोरपि ज्ञात्रादिभेदविषयत्वात् नाद्वैतवस्तुमात्रभानं तत्र। इत्युच्यते—मृद्विकारे गजे कुम्भकारादिनिर्मिते गजोऽयम् इत्यस्यां बुद्धौ गजाकारोल्लेखे

अपि मृण्मात्रमेव सत्यं भासते गजाकारस्य मिथ्यात्वनिश्चयात्। तथा च श्रुतिः—वाचारम्भणं विकारोनामधेयं मृत्तिकेत्येव सत्यमिति[१२१]। एवं ब्रह्माकारायां वृत्तौ ज्ञात्राद्याकारे उल्लख्यमाने अपि ब्रह्मैव सत्यं भासते न ज्ञात्रादिविकल्पः, तेषां वाचारम्भणमात्रत्वात्। यद्वा 'सर्वं खल्विदं ब्रह्म',[१२२] 'ऐतदात्म्यमिदं सर्वं'[१२३] इत्यादि श्रुतिबलात् सर्वम् अहमिति गिरिनदीसमुद्रात्मकं सर्वं जगत् स्वाभिन्नसच्चिदानन्दब्रह्मत्वेन अनुभूय तस्य दग्धपटन्यायेन प्रपञ्चभाने अद्वैतं सच्चिदानन्दलक्षणं वस्तु भासते एव इत्यर्थः। तदुक्तं भगवता—"वासुदेवः सर्वमिति स महात्मा सुदुर्लभः"[१२४] इति। "दृशिरूपं गगनोपमं परं सकृद्विभातं त्वजमेकमव्ययम्। अलेपकं सर्वगतं यदद्वयं तदेव चाहं सततं विमुक्त ओम्"॥[१२५] इति चोक्तम् उपदेशसाहस्र्याम्। ब्रह्मैवाहमिति भावयतः निषेधप्रतियोगित्वेन। तत्तदुपाधेः भानात् तत्प्रयुक्तभेदभाने अपि अद्वैतं भासते एव इत्यर्थः।

निर्विकल्पकस्तु ज्ञातृज्ञानादिभेदलयापेक्षया अद्वितीयब्रह्मणि तदाकाराकारितायाः बुद्धिवृत्तेः एकीभावेन अवस्थानम्। तदा तु जलाकाराकारितलवणानवभासेन जलमात्रावभासवत् अद्वितीयवस्त्वाकाराकारित चित्तवृत्त्यनवभासेन अद्वितीयवस्तुमात्रम् एव अवभासते। 'विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽसम्प्रज्ञातः'[१२६] इति पतञ्जलिः। सदैव समुदयमानसिकक्रियायाः विरामस्य अभ्यासः पौनःपुन्येन चेतसि विनिवेशनम्। तत्र या काचित् वृत्तिः उल्लसति तस्य नेति नेतीति नैरन्तर्य्येण पर्य्युदासनं तत्पूर्वकः सम्प्रज्ञातसमाधेः संस्कारशेषः असम्प्रज्ञातः इत्यर्थः। तत्र न किञ्चित्वेद्यं सम्प्रज्ञायते इति असम्प्रज्ञातः निर्बीजः समाधिः। तल्लक्षणं च पञ्चदश्याम्—"ध्यातृध्यानेपरित्यज्य क्रमाद्ध्येयैकगोचरम्। निवातदीपवच्चित्तं समाधिरभिधीयते।"[१२७] इति। यदा चित्तम् अभ्यासवशेन ध्यातृध्याने ध्यातारं ध्यानं च क्रमात्

परित्यज्य ध्येयैकगोचरं भवति तदा समाधिः इत्युच्यते। वायुरहिते प्रदेशे वर्तमानः दीपः यथा निश्चलः भवति तद्वत् इत्यर्थः। समाधिकाले वृत्तयस्तु अज्ञाता अपि समाधेः उत्थितस्य एतावन्तं कालं समाहितः अभवम् ;इत्येवंरूपात् स्मरणात् अनुमीयन्ते। वृत्तयस्तु तदानीम् अज्ञाता अप्यात्मगोचराः। स्मरणादनुमीयन्ते व्युत्थितस्य समुत्थितात् ॥[१२८] इति पञ्चदश्याम्।

अयञ्च द्विविधः—चिरकालाभ्यस्तयदुत्तरसविकल्पकसमाध्यनुभवजनितसंस्कारसहकृतायाः चित्तवृत्तेः ज्ञात्रादित्रिपुटीलयपूर्वकम् अद्वैते वस्तुनि एकत्रीभावावस्थानात्मकः प्रथमः। एतन्निर्विकल्पकसमाध्यभ्यासपाटवेन लुप्तसंस्कारतया ज्ञात्रादित्रिपुटीलयपूर्वकम् अखण्डाकाराकारितायाः चित्तवृत्तेः विनापि स्वस्फूर्त्तिं केवलचिदानन्दात्मना अवस्थानात्मकः द्वितीयः। आद्ये संस्कारोऽस्ति, द्वितीये तु नास्ति इति भेदः।

ननु सुषुप्तौ अपि ज्ञातृज्ञेयज्ञानभागानां लयसम्भवात् तत्र निर्विकल्पकसमाधिलक्षणम् अतिव्याप्नोति इति चेत्; न, समाधिसुषुप्त्योः वृत्त्यभाने समाने अपि तत्सद्भावासद्भावमात्रेण अनयोः भेदोपपत्तेः। समाधौ अज्ञायमानवृत्तिसद्भावात् सुषुप्तौ वृत्त्यभावाच्च तयोः भेदोपपत्तेः इत्यर्थः। सुषुप्तौ बुद्धिरेव नास्ति बुद्धेः कारणात्मना अवस्थानस्य तल्लक्षणत्वात्, इह तु बुद्धिवृत्तेः अद्वितीयवस्त्वाकाराकारितायाः अवस्थानांगीकारात् सुषुप्तेः भेदः उपपद्यते इत्यर्थः।

९. समाधेरष्टांगानि[१२९]

निर्विकल्पकसमाधेः साधनभूतानि अष्टांगानि सन्ति। तथाहि—यमनियमासनप्राणायामप्रत्याहारधारणाध्यान समाधयोऽष्टांगानीति। इह कानिचित् समाधेः साक्षादुपकारकत्वेन अन्तरंगानि,

यथा धारणादीनि। उक्तं च योगसूत्रे—'त्रयमन्तरंगं पूर्वेभ्यः'[13] इति। कानिचित् प्रतिपक्षभूतहिंसादिवितर्कोन्मूलनद्वारेण समाधेः उपकुर्वन्ति, यथा यमनियमादीनि। तत्र आसनादीनाम् उत्तरोत्तरम् उपकारकत्वं, यथा आसनजये सति प्राणायामस्थैर्यम्। एवमुत्तरत्रापि योज्यम्।

(१) अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः[131]। वाङ्मनःकायैः परपीडावर्जनम् अहिंसा। सत्यं वाङ्मनसोर्यथार्थत्वम्। अस्तेयं अदत्तादानरूपपरस्वापहरणराहित्यं। ब्रह्मचर्यं अष्टांगमैथुनवर्जनम्। तथा चोक्तं—"स्मरणं कीर्तनं केलिप्रेक्षणं गुह्यभाषणम्। संकल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च। एतन्मैथुनमष्टांगं प्रवदन्ति मनीषिणः। विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणम्।"[132] इति। अपरिग्रहः समाध्यनुष्ठानानुपयुक्तानां भोगसाधनानाम् अनंगीकारः। एते पञ्च यमाः।

(२) शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः।[133] शौचं द्विविधम्—बाह्यम् आभ्यन्तरञ्च। तदुक्तं दक्षसंहितायाम्—"शौचन्तु द्विविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा। मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिस्तथान्तरम्।"[134] इति। सन्तोषः यदृच्छालाभसन्तुष्टिः अलाभेचाविषादः। तपः द्वन्द्वसहनम्। केचित्तु 'मनसश्चेन्द्रियाणाञ्च ह्यैकाग्र्यं परमं तप'[135] इत्याहुः। स्वाध्यायः प्रणवजपः, उपनिषद्ग्रन्थावृत्तिश्च। "ओमित्येवं ध्यायथ आत्मानं" 'उपनिषदमावर्तयेत्' इत्यादिश्रुतेः। ईश्वरप्रणिधानं मानसैः उपचारैः ईश्वरस्य अभ्यर्चनम्। योगपरिपन्थिनां हिंसादीनां प्रतिपक्षभावने सति यदा बाधः भवति, तदा योगः सुकरो भवतीति यमनियमयोः योगांगत्वम्। उक्तं च "वितर्कबाधने प्रतिपक्षभावनम्"[136] इति।

(३) करचरणादिसंस्थानविशेषलक्षणानि पद्मस्वस्तिकादीनि आसनानि[१३७]। 'स्थिरसुखमासनम्'[१३८] इति योगसूत्रम्। आस्यते इति आसनम्; पद्मासनादि। तद् यदा स्थिरं निष्कम्पं सुखम् अनुद्वेजनीयञ्च भवति, तदा तत् योगांगत्वं भजते।

(४) तस्मिन् आसनजये सति श्वासप्रश्वासयोः गतिविच्छेदः प्राणायामः। रेचकपूरककुम्भकलक्षणाः प्राणनिग्रहोपायाः प्राणायामाः[१३९] प्राणवायोः शनैः वामनासापुटाद् दक्षिणनासापुटाद्वा सव्यापसव्यन्यायेन बहिर्निःसारणं रेचकः, तस्य तथैवान्तः प्रवेशनं पूरकः।पूरितस्य वायोः अन्तः एव निरोधः कुम्भकः एतत्त्रयद्वारेण श्वासप्रश्वासयोः गतिवारणं प्राणायामः।

(५) श्रोत्रादीनाम् इन्द्रियाणां स्वस्वविषयेभ्यः शब्दादिभ्यः प्रत्याहरणं प्रत्याहारः[१४०]। इन्द्रियाणि स्वस्वविषयेभ्यः प्रतीपम् आह्रियन्ते अस्मिन्निति व्युत्पत्तेः। श्रोत्रादीनाम् इन्द्रियाणां स्वस्वविषयेभ्यः शब्दादिभ्यः सकाशात् प्रत्यावर्तनं प्रत्याहारः इत्यर्थः। "स्वस्वविषयसंप्रयोगाभावे चित्तस्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः"[१४१] इति पतञ्जलिः। विषयाभिमुख्यं परित्यज्य इन्द्रियाणां चित्तस्वरूपमात्रानुकारः प्रत्याहार इत्यर्थः।

(६) 'अद्वितीयवस्तुनि अन्तरिन्द्रियधारणं धारणा'[१४२] इति सदानन्दयोगीन्द्रः। सर्वेषां बुद्ध्यादीनां साक्षितया विद्यमाने अद्वितीयवस्तुनि चित्तनिक्षेपणं धारणा इत्यर्थः। "देशबन्धश्चित्तस्य धारणा"[१४३] इति पतंजलिः। देशे नाभिचक्रनासाग्रादौ चित्तस्य बन्धः विषयान्तरपरिहारेण यत् स्थिरीकरणं सा चित्तस्य धारणा इत्युच्यते। मैत्र्यादिचित्तपरिकर्मवासितान्तःकरणेन यमनियमवता जितासनेन परिहृतप्राणविक्षेपेण प्रत्याहृतेन्द्रियग्रामेण निर्बाधे प्रदेशे ऋजुकायेन जितद्वन्द्वेन योगिना नासाग्रादौ सम्प्रज्ञातस्य समाधेः अभ्यासाय चित्तस्थिरीकरणं कर्त्तव्यमिति भावः।

(७) तत्राद्वितीयवस्तुनि विच्छिद्य विच्छिद्य अन्तरिन्द्रियवृत्तिप्रवाहः ध्यानम्।[१६४] धारणापाटवाभावेन चित्तस्थैर्याभावात् अद्वितीयवस्तुनि विच्छिद्य विच्छिद्य चित्तवृत्तिप्रवाहीकरणं ध्यानम् इत्यर्थः। "तत्र प्रत्ययैकतनता ध्यानम्"[१६५] इति पतञ्जलिः। यत्र चित्तं धृतं तत्र ज्ञानस्य या एकतानता=विसदृशपरिणामद्वारेण यदेव धारणायाम् अवलम्बनोकृतं तदवलम्बनतयैव निरन्तरप्रत्ययोत्पत्तिः सा ध्यानम् इत्युच्यते।

(८) 'तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः'[१६६] इति पतञ्जलिः। उक्तलक्षणं ध्यानं यत्र अर्थमात्रनिर्भास अर्थाकारसमावेशात् उद्भूतार्थरूपं न्यग्भूतज्ञानस्वरूपत्वेन स्वरूपशून्यताम् इव आपद्यते स समाधिः इत्युच्यते। सम्यक् आधीयते एकाग्रीक्रियते विक्षेपान् परिहृत्य मनः यत्र स समाधिः। अयं तु सविकल्पकः सबीजो वा समाधिरिति बोध्यम्। स च ज्ञातृज्ञानादिविकल्पलयानपेक्षया अद्वितीये वस्तुनि तदाकाराकारितायाः चित्तवृत्तेः अवस्थानम्।

अत्र धारणाध्यानसमाधिलक्षणं त्रितयम् अन्तरंगसाधनं संयमः इत्युच्यते। उक्तं च—"त्रयमेकत्र संयमः"[१६७] इति। एतत् साधनत्रितये आयत्ते अपि देहधारणबीजं तिष्ठत्येव इति एतत्त्रितयम् अपि निर्बीजसमाधेः बहिरंगम्। उक्तं च—"तदपि बहिरंगं निर्बीजस्य"[१६८] इति। निर्बीजस्य निरालम्बनस्य शून्यभावनाऽपरपर्यायस्य समाधेः एतदपि योगांगत्रयं बहिरंगं पारम्पर्येण उपकारकत्वात्। तदनन्तरं निर्बीजसमाधिलाभः।

१०. जीवन्मुक्तिः[१६९]

जीवन्मुक्तो नाम स्वस्वरूपाखण्डशुद्धब्रह्मज्ञानेन तदज्ञानबाधनद्वारा, स्वरूपाखण्डे ब्रह्मणि साक्षात्कृते सति अज्ञानतत्कार्याणां

सञ्चितकर्मसंशयविपर्ययादीनामपि बाधितत्वात् अखिलबन्धरहितो ब्रह्मनिष्ठः पुरुषः। तथा चाद्वैतसिद्धौ—"जीवन्मुक्तश्च तत्त्वज्ञानेन निवृत्ताविद्योऽपि अनुवृत्तदेहादिप्रतिभासः" इति। ब्रह्मात्मैक्य-साक्षात्कारे दृढीभूते अविद्यातत्कार्य्यात्मिव संसारनिवृत्तौ जायमानायां काकतालीन्यायेन यदि प्रारब्धकर्मक्षयवशात् तस्मिन्नेव काले देहपातः स्यात्, तदा सद्य एव मुक्तिः स्यात्, यदा तु ज्ञानोत्पत्तिकाले प्रारब्धकर्म न क्षीयते, तदा तत्क्षयपर्य्यन्तं शरीरावस्थानात् जीवन्नेव मुक्तसंसारः कर्तृत्वभोक्तृत्वसुखदुःखादिरहितो भवति। तथा च श्रुतिः 'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये' इति[१५०]। येन कर्मणा शरीरमारब्धम् तस्योपभोगेन क्षयाद् यावन्न देहपातः तावदेव आचार्य्यवतः विज्ञानवतः पुरुषस्य सदात्मसम्पत्तेः कालक्षेपः। यदैव च प्रारब्धकर्मणाम् उपभोगेन क्षयः तदैव सत् सम्पद्यते इति देहपातस्य सत्सम्पत्तेश्च न कालभेदः इत्यर्थः।

कथं पुनरिदमवगम्यते—प्रारब्धकर्मफलभोगार्थं ब्रह्मविदः शरीरधारणमिति? न हि ज्ञानकर्मणोरेकस्मिन् अवस्थितिसम्भवः तत्त्वज्ञानस्य कर्मनाशकत्वात्। ज्ञानकर्मणोर्विरोधः पर्वतवदकम्प्य इति भाष्यकृता सिद्धान्तितत्वात्। ज्ञानं चास्ति कर्मफलभोगार्थं शरीरधारणं च इति उन्मत्तबालवाक्यवत् परस्परविरुद्धम्, 'ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा'[१५१] इति स्मृतेः 'क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे'[१५२] इति 'तद् यथेषीका तूलमग्नौ प्रोतं प्रदूयते एवं हास्य सर्वपाप्मानः प्रदूयन्ते'[१५३] इति च श्रुतेः प्राक्ब्रह्मविज्ञानस्य अविशेषेण सर्वेषां सुकृतानां दुष्कृतानां च कर्मणां क्षयश्रवणात्। 'ब्रह्मैव सन् ब्रह्माप्येति'[१५४] इति च ब्रह्मप्राप्तेः विद्योदयसमकालत्वेन विद्योदयसमकालम् एव विदेहकैवल्यं स्यात्। विद्यया अविद्यानाशे च अविद्याकार्य्याणां शरीरादीनाम् अपि नाशः स्यात्।

अत्रोच्यते—सत्यमेवम्, तथापि प्रवृत्तफलानाम् अप्रवृत्तफलानाञ्च विशेषोऽस्ति। तथा च यानि प्रवृत्तफलानि कर्माणि, यैः विद्वच्छरीरमारब्धं तेषामुपभोगेनैव क्षयः, न ज्ञानेन। यद्यपि ज्ञाननाश्यमेव कर्मेति, ज्ञानलाभानन्तरं कर्मणः कर्मजन्यस्य भोगायतनस्य देहस्य च नाशप्रसङ्गः तथापि कर्म स्वभावेनैव प्रारब्धवेगक्षयावधि स्थातुमर्हति। यथा लक्ष्यमुद्दिश्य मुक्तस्य आरब्धवेगस्य इषोः लक्ष्यभेदात् ऊर्ध्वं—गतिप्रयोजनं नास्तीति न स्थितिरपि तु वेगक्षयं यावत्, तद्वत् विद्यार्थे देहे विद्यालाभानन्तरं प्रयोजनं नास्ति इति न कर्माणि निवर्तन्ते, किन्तु भोगानन्तरम् एव क्षीयन्ते। अन्यानि तु इह प्राग्ज्ञानोत्पत्तेः ऊर्ध्वं च कृतानि क्रियमाणानि अतीतजन्मान्तरकृतानि वा अप्रवृत्तफलानि कर्माणि ज्ञानेन दह्यन्ते, प्रायश्चित्तेनेव पापम्। अतो ब्रह्मविदः जीवनप्रयोजनाभावे अपि प्रवृत्तफलानां कर्मणाम् स्थितिः अवश्यमेव स्यादिति मुक्तेषुवत् तस्य तावदेव चिरमिति श्रुतिः सङ्गच्छते। ननु यथा प्रारब्धकर्मवशात् सद्विज्ञानान्तरम् एव देहपातः सत्सम्पत्तिश्च न भवति, तथा अप्रवृत्तफलकर्मवशात् अपि स्यात्। अप्रवृत्तफलानि कर्माणि ब्रह्मज्ञानेन न क्षीयन्ते, कर्मत्वात्, प्रवृत्तफलकर्मवत् इति चानुमानप्रयोगः। तथा च ज्ञानानर्थक्यम् इति चेत्। न, 'तस्य तावदेव चिरम्' इति विदुषः प्रारब्धकर्मफलभोगपर्य्यन्तम् एव शरीरधारणश्रवणात्, प्रारब्धकर्मफलभोगान्ते एव देहपातसमकालं विदेहकैवल्यं भवति, ज्ञानेन अप्रवृत्तफलकर्मणां, भोगेन च प्रवृत्तफलकर्मणां नाशात् देहान्तरप्राप्त्यप्रसङ्गात्।

अत्र इदं ज्ञातव्यम्—'नाभुक्तं क्षीयते कर्म,' 'न हि कर्म क्षीयते', 'कल्पकोटिशतैरपि। अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्' इत्यादि स्मृतिषु कर्मणाम् उपभोगैकनाश्यत्वम् उक्तम्। एवं सर्वकर्मणाम् उपभोगैकनाश्यत्वे मोक्षकथा निरर्थिका स्यात्। पक्षान्तरेण 'ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते' 'क्षीयन्ते

चास्य कर्माणि'[१५६] इत्यादिश्रुतिस्मृतिषु च सर्वकर्मणां ज्ञाननाश्यत्वम् उक्तम्। ज्ञानेन सर्वकर्मणां क्षये च ब्रह्मविदः 'तस्य तावदेव चिरम्' इति देहपातप्रतीक्षा न उपपद्यते। तथा च उभयप्रामाण्याय 'अनारब्धफलानां कर्मणां ज्ञाननाश्यत्वम्, आरब्धफलानां तु भोगनाश्यत्वम् इति श्रुतिस्मृतिप्रतिपाद्यम् इति ननु आरब्धफलानां कर्मणां ज्ञाननाश्यत्वं नारब्धफलानाम् इत्येतद् अयुक्तम्, अज्ञानकार्याणां कर्मणाम् अज्ञाननाशे नाशावश्यम्भावात्। तथा च ब्रह्मज्ञानात् मूलाज्ञाननिवृत्तौ अनारब्धफलानाम् इव आरब्धफलानामपि कर्मणां नाशे विद्यावतः देहनाशः तदैव स्यात्, तत्स्थितिहेतूनां कर्मणां नाशात् इति चेत्। न, अप्रतिबद्धज्ञानस्यैव अज्ञाननिवर्तकतया प्रारब्धकर्मरूपप्रतिबन्धकदशायाम् अज्ञाननिवृत्तेः अनङ्गीकारात्। तथा च ज्ञानमात्रस्य नाज्ञाननिवर्तकत्वं किन्तु अप्रतिबद्धज्ञानस्य। प्रारब्धकर्मरूपफलप्रतिबन्धकसद्भावदशायां ज्ञानं नाप्रतिबद्धम् अपि तु प्रतिबद्धम् एव। तेन अज्ञानस्य न निवृत्तिः न वा प्रारब्धकर्मणः। अतः अज्ञानकार्यसद्भावात् ज्ञानिनो देहधारणम् उपपन्नम्।

ननु मुक्तिश्च नाम एकत्वविज्ञानेन अविद्यानाशः। तत्र च 'नेह नानास्ति किञ्चन'[१५७] इत्यादिश्रुतेः नानात्वाभावात् प्रवृत्तिनिवृत्यादिकम् अनुपपन्नम्। सर्वं हि प्रवृत्तिनिवृत्यादिकं भेदज्ञानपुरःसरम्। भेदज्ञानं च अज्ञानविजृम्भितमात्रम्। अतः परित्यक्तद्वैतजालस्य मुक्तपुरुषस्य अविद्योच्छेदात् भेदज्ञानरहितत्वात् च कथं पुनः तस्य अज्ञानसद्भावः प्रारब्धकर्मफलभोगश्च उपपद्यते?

तत्रोच्यते अज्ञानस्य तावत् शक्तिद्वयम् अस्ति विक्षेपः, आवरणं च। जीवन्मुक्तस्य त्वज्ञानावरणे नष्टेऽपि विक्षेपशक्तेर्नाशाभावात् नानात्वदर्शनमुपपन्नम्। न चावरणे नष्टे विक्षेपस्यापि नाशः स्यादिति साम्प्रतं वक्तुम्, सोपाधिकभ्रमस्थले आवरणे नष्टेऽपि

विक्षेपशक्तेर्दर्शनात्, तडागजलप्रतिबिम्बिताधोऽग्रवृक्षे यथा। एवं जीवन्मुक्तस्यापि अन्तःकरणरूपोपाधिसन्निधानात् एकत्वविज्ञाने सत्त्वेऽपि नानात्वदर्शरूपो विक्षेपो भवत्येव।

ननु अन्तःकरणस्यैव उपस्थितिः अनुपपन्ना, अविद्याकार्य्यत्वात्। मुक्तिर्हि खलु अविद्याबन्धनाशः। अन्तःकरणञ्चाज्ञानकार्य्यम् इति कारणनाशे कार्य्यनाशः इति न्यायात्, अविद्यानाशे तत् कार्य्यस्यान्तः-करणस्य च नाशः स्यात्। मुक्तिश्चास्ति अविद्याकार्य्यसद्भावश्चेति परस्परविरोध एव। अतः त्यक्ताविद्याबन्धस्य मुक्तपुरुषस्य अविद्याकार्य्याणाम् अन्तःकरणादीनां नाशात् सद्य एव शरीरपातः स्यात्।

नैतत्सारम्—निवृत्तसर्पभ्रमस्यापि संस्काराद् भयकम्पानुवृत्तिवद् दण्डसंयोगनाशेऽपि चक्रभ्रमणवच्च संस्कारानुवृत्तेः अविद्यानिवृत्तौ अपि देहादिकार्य्यस्य अनुवृत्त्युपपत्तेः सम्भवात्। 'बाधितमपि तु मिथ्याज्ञानं द्विचन्द्रज्ञानवत् संस्कारवशात् कञ्चित्कालम् अनुवर्तते एव'—(४।१।१२) भाष्यम्। यद्वा अविद्यालेशानुवृत्त्या देहाद्युपपत्तिः यथा हि यागे गते अपि यागसूक्ष्मावस्थारूपम् अपूर्वं स्वर्गप्राप्त्यनुकूलं स्वीक्रियते, तथा अज्ञाने गतेऽपि तत्सूक्ष्मावस्थारूपो लेशो देहादि-प्रतीत्यनुकूलः स्वीक्रियते। न चाविद्यायां सत्यां कथं मुक्त इति व्यपदेशः? 'शक्तिमात्रनाशाद् तद्व्यपदेशोपपत्ते.'[१५८] इति अद्वैत-सिद्धौ प्रतिपादितम्। श्रुतिश्चास्ति—'तस्याभिध्यानाद् योजनाद् तत्त्वभावाद् भूयश्चान्ते विश्वमायानिवृत्तिः'[१५९] इति।

ननु, तथापि जीवतोमुक्तिरिति विरुद्धमिति चेत्, मैवम्, मुक्तिर्नाम अशरीरत्वम्, तच्चात्मनः स्वाभाविकमिति आत्मनः अशरीरित्वं सदैव विद्यते, केवलम् अविद्यावशात् आत्मनो बन्ध इति कल्प्यते। तस्याम् अविद्यायां ज्ञानेन निवृत्तौ सत्यामात्मनः स्वाभाविकमशरीरत्वम् व्यवतिष्ठते एवेति नात्मनि कदाचिदपि सशरीरत्वसम्भावना। तस्मान्न काचिदनुपपत्तिः।

११. विदेहमुक्तिः

कालवशेन प्रारब्धकर्मक्षये सति यदा शरीरपातः सञ्जायते, तदा जीवन्मुक्तपुरुषः विदेहमुक्तिं लभते। तथा च मुक्तिकोपनिषदि उक्तम्—'जीवन्मुक्तपदं त्यक्त्वा स्वदेहे कालसात् कृते। विशत्यदेहमुक्तत्वं पवनोऽस्पन्दतामिव'[१६०] इति। एतादृशः विदेहमुक्तः आत्मा निष्कलब्रह्मरूपेण अवतिष्ठते। तस्य मैत्र्यादिगुणसम्पन्नं सत्त्वप्रधानं चित्तमपि लीयते। विदेहमुक्तावस्थायां न कश्चन लौकिकव्यवहारः दृश्यते। तदा न गुणः नापि अगुणो, न सम्पत्, नापि विपत्, नोदयः नापि अस्तं, न हर्षः नापि शोकः, न तेजः नापि अन्धकारः, न सत्ता नापि असत्ता वर्त्तते। एतादृशः आत्मा ब्रह्मात्मतां प्राप्य ब्रह्मानन्दरूपं नित्यं सुखं अवाप्नोति, महामौनं च अवलम्बते। तथा च तेजोबिन्दूपनिषदि—'ब्रह्मभूतः प्रशान्तात्मा ब्रह्मानन्दमयः सुखी। स्वच्छरूपो महामौनी वैदेही मुक्त एव सः'[१६१]॥ इति। एतादृशः आत्मा अपरिच्छिन्नः, स्थूलसूक्ष्मकारणशरीरविवर्जितः, तुरीयादपि तुरीयः, शुभाशुभविवर्जितः, बन्धमोक्षरहितः, गुणागुणविहीनः, देशकालातीतः, साक्ष्यसाक्षित्वहीनः, नामरूपविहीनः, 'किञ्चित्किञ्चिन्ने'तिभाववर्जितः। तस्य जगत्प्रपञ्चभानं नास्ति, ब्रह्माकारवृत्तिरपि नास्ति। 'यस्य प्रपञ्चभानं न ब्रह्माकारमपीह न'[१६२] स स्वप्रकाशः, आत्मरतिः, अनिर्वचनीयानन्दस्वरूपः, वाक्यमनोऽतीतः, सर्ववृत्तिविहीनः। सच्चिदानन्दरूपस्य विदेहमुक्तस्य अहं ब्रह्म, अहं सच्चित्सुखात्मकः इति ज्ञानमपि नास्ति। 'ब्रह्मैवाहं चिदेवाहमेवं वापि न चिन्त्यते'।[१६३]

अद्वैतिनां मते शरीरं त्रिविधं स्थूलं, सूक्ष्मं कारणञ्चेति। विदेहमुक्तावस्थायां त्रिविधस्य शरीरस्यापि नाशो भवति इति सर्वदेहविगतत्वात् इयं विदेहमुक्तिरिति उच्यते।

(क) सद्योमुक्तिः

विदेहमुक्तिः द्विधा लभ्यते। निर्गुणब्रह्मज्ञानां ब्रह्मज्ञानेन अप्रारब्धकर्मणां नाशः भवति, प्रारब्धकर्माणि तु भोगेन नश्यते। प्रारब्धकर्मनाशानन्तरं च स्थूलदेहपातसमकालं सूक्ष्मकारणशरीरयोः अपि नाशे सति मुक्तात्मा सद्यः एव ब्रह्मनिर्वाणं लभते, ब्रह्मणा सह एकीभवति। इयं सद्योमुक्तिः। एतादृशस्य सद्योमुक्तपुरुषस्य लोकात् लोकान्तरं गमनागमनं नास्ति, तस्मिन्नेव क्षणे तस्मिन्नेव देशे भूमारूपेण ब्रह्मणा मिलनात्। एतादृशमुक्तपुरुषमुद्दिश्य उक्तम्—"अत्रैव समवनीयन्ते'[११४] इति 'योऽकामो निष्काम आप्तकाम आत्मकामो, न तस्य प्राणा उत्क्रामन्ति'[११५] इति आत्मैकत्वसाक्षात्कारवतः अकामयमानस्य कर्माभावेन गमनकारणाभावात् वागादयः न उत्क्रामन्ति इत्यर्थः। एवम् आत्मसाक्षात्कारवतः उत्क्रान्तिप्रतिषेधात् "ब्रह्मैव सन् ब्रह्माप्येति''[११६] 'ब्रह्म वेद ब्रह्मैव भवति'[११७] इति च विद्याब्रह्मप्राप्त्योः समकालताभिधानात् गन्तृगन्तव्यादिविभागाभावात् न लोकान्तरप्राप्तिपूर्विका ब्रह्मप्राप्तिः, किन्तु विद्योदयसमकालिका। 'स एतान् ब्रह्म गमयति' इति[११८] श्रुतिस्तु न परब्रह्मपरा, 'ब्रह्मलोकान् गमयति, ते तेषु ब्रह्मलोकेषु परा परावतो वसन्ति'[११९] इति तस्यैव ब्रह्मणः विशेषाभिधानात्, परस्य ब्रह्मणः प्रदेशाभावेन गन्तव्यलोकत्वाभावात्; किन्तु कार्य्यब्रह्मपरा, तस्य गन्तव्यत्वात् लोकत्वात् च।

(ख) क्रममुक्तिः

अद्वैतिनां मते निर्गुणब्रह्मज्ञानं विना ब्रह्मनिर्वाणलाभः न सम्भवति। तथा च ये तावत् सगुणब्रह्मज्ञानं लभन्ते ते स्थूलदेहपातसमकालं न सद्योमुक्तिभाजः भवन्ति। प्रारब्धाप्रारब्धफलनाशे अपि न तेषां स्थूलदेहपातसमकालं ब्रह्मनिर्वाणलाभो भवति।

एतादृशाः सगुणब्रह्मज्ञानिनः अर्चिरादिक्रमेण ब्रह्मलोकं गच्छन्ति। तदनन्तरं ब्रह्मलोके निर्गुणोपासनाम् अनुष्ठाय क्रमेण विदेहं ब्रह्मनिर्वाणं लभन्ते। कामायमानस्य ज्ञानिनः पुरुषस्य इहलोकात् प्रस्थानानन्तरं ब्रह्मलोकगमनम्, ततश्च निर्गुणब्रह्मलाभः भवतीति इयमेव क्रममुक्तिः इत्युच्यते। येन च मार्गेण एते गच्छन्ति तद् देवयानम् इत्युच्यते। अत्र अर्चिरादिद्वारेण सगुणोपासकानां गमनं भवति। मार्गक्रमे यद्यपि मतभेदोऽस्ति तथापि एषः क्रमः प्रदर्शयितुं शक्यते— प्रथमतः अर्चिः अग्निर्वा, ततः अहः, ततः शुक्लपक्षः, ततः उत्तरायणम्, ततः संवत्सरः, ततो देवलोकः, ततो वायुलोकः, ततः आदित्यलोकः, ततः चन्द्रलोकः, ततो विद्युल्लोकः, ततो वरुणलोकः, ततो इन्द्रलोकः, ततः प्रजापतिलोकः, ततः ब्रह्मलोकः इति। अत्र प्रयुक्ताः अर्चिरादयः न स्थानवाचकाः, अहरादयश्च न कालवाचकाः अपि तु एते सर्वे तत्तदभिमानिनः आतिवाहिकाः देवताविशेषाः इति आचार्यः बादरायणः मन्यते।

ये पञ्चाग्निविद्यायाः रहस्यं अवगच्छन्ति, ये च सत्यब्रह्महिरण्यगर्भमुपासते तेऽपि अनेन मार्गेण ब्रह्मलोकं गच्छन्ति[१७०] इति बृहदारण्यकश्रुतौ उक्तम्।

ये देवयानमार्गम् अनुसरन्ति ते अन्ते अमानवपुरुषेण वाहिताः सन्तः ब्रह्मलोकं प्राप्नुवन्ति इति श्रुतिः। इदं ब्रह्म कार्यब्रह्म हिरण्यगर्भो वा इति बादरिमतं शङ्करेणापि अनुमतम्। ब्रह्मलोकं हिरण्यगर्भलोकं प्राप्ताः उपासकाः न पुनः अस्मिन् लोके आवर्तन्ते, ततः एव निर्गुणोपासनासहायेन ब्रह्मनिर्वाणं लभन्ते। येषां तत्र निर्गुणब्रह्मज्ञानमुदेति, ते कल्पान्ते हिरण्यगर्भेण सह ब्रह्मनिर्वाणं लभन्ते।

उद्धृतिसूचिका

१. वे. प. २९१–६
२. बृ. उ. ४. ३. ३२
३. तै. उ. ३. १
४. बृ. उ. १. ३. २८
५. तै. उ. २. ७
६. मु. उ. २. २. ९
७. छा. उ. ७. १. ३
८. ई. ७
९. अ. सि. ८८५
१०. अ. सि. ८८५
११. ई. उ. ७
१२. बृ. ४. ५. १५
१३. चि. सु. ५३५–५५०
वे. प. २९६–८
१४. श्वे. उ. ६. १५, ३. ८
१५. तै. उ. २. १
१६. बृ. उ. २. ४. ५
१७. बृ. उ. ४. ५. १५
१८. महाना. उ. १०. ५
१९. मु. उ. १. ७. १२
२०. ब्र. सू. श. भा. १. १. ४
२१. ई. उ. ९
२२. मनु. १२. १०४
२३. बृ. उ. ४. ४. २२
२४. गी. श. भा. उपक्रम.
२५. गीता, ५. ११
२६. भाम. १. १. १
२७. श. भा. ३. ४. २७
२८. भाम. ३. ४. ६
२९. भाम. ३. ४. ३४
३०. विव. ३७
३१. गी. ६. ३
३२. नै. सि. १. ४९
३३. विव. ५४६
३४. वे. प. ३०३–५
३५. बृ. उ. ४. ५. ६
३६. बृ. उ. २. ४. ५
३७. श्वे. उ. १. ३
३८. मु. उ. ३. १. ८
३९. भाम. ४. १. १
४०. भाम. १. १. १
४१. बृ. उ. ३. ९. २६
४२. छा. उ. ६. १६. ३
४३. विव. २९–३०
४४. अ. सि. ८५९
४५. अ. सि. ८६२
४६. वे. प. ३११
४७. वे. प. ३१४
४८. छा. उ. १. ६. ६
४९. क. त. १. १. २०

५०. छा. उ. ३. १४. १
५१. गी. ८. ६
५२. छा. उ. ८. १५. १
५३. वे. प. २९९–३०१
चि. सु. ५३४
५४. के. उ. ३
५५. ब्र. सू. श. भा. १. १. १
५६. भाम. १. १. १
५७. बृ. उ. ४. ४. १९
५८. मु. ३. १. ९
५९. क. उ. ३. १२
६०. के. उ. ३
६१. तै. उ. २. ९. १
६२. बृ. उ. ३. ९. २६
६३. बृ. उ. ४. ४. १९
६४. द्र. वे. प. ३०२
६५. ब्र. सू. १. १. ३०
६६. ब्र. सू. ३. २. २४
६७. क. उ. ४. १
६८. मु. उ. ३. १. ८
६९. बृ. उ. ४. २. ४
७०. बृ. उ. १. १. १०
७१. बृ. उ. ३. ९. २६
७२. प. द. ७. २७
७३. चि. सु. ३. १ (पृ. ५३०)
७४. बृ. उ. ४. ४. १९
७५. छा. उ. ६. १६. ३
७६. छा. उ. ७. २६. २
७७. मु. उ. २. २. ८
७८. छा. उ. ७. १. ३
७९. गी. ७. १४
८०. तै. ब्रा. ३. १२. ९. ७
८१. मु. उ. ३. २. ६
८२. चि. सु. ३. २ (पृ. ५३१)
८३. वे. सा. १६७–८८
८४. छा. ६. ८. ७
८५. प. द. ७. ७५
८६. अ. सि. ६६२–७१६
८७. प. पा. ३२३
८८. अ. सि. ६७४
८९. वि. सु. १९२
९०. चि. सु. १९२
९१. अ. सि. ७०८
९२. तै. उ. २. १. १
९३. तै. उ. २. १
९४. नै. सि. ३. ३
९५. प. द. ७. ७४
९६. स. शा. १. १८९१
९७. अ. सि. ७०१
९८. वि. प्र. स. १७–४०
विव. ३३–३६
९९. बृ. उ. २. ४. ५
१००. बृ. उ. ४. ५. ६
१०१. बृ. उ. २. ४. ५

१०२. ब्र. सू. श. भा. १. १. ४
१०३. भाम. १. १. ४
१०४. भाम. १. १. ४
१०५. भाम. ३. ४. ८
१०६. भाम. १. ४. ६
१०७. भाम. ३. ४. १४
१०८. ब्र. सू. ३. ४. ४७
१०९. विव. २९–३०
११०. ब्र. सू. श. भा. ४. १. १
१११. द्र. वि. प्र. स. १७–१८
११२. गी. ४. ३३
११३. ब्र. सू. श. भा. १. १. ४
११४. जै. सू. ३. ४. १५
११५. बृ. उ. ३. ५. १
११६. ब्र. सू. श. भा. ३. ४. ४७
११७. तै. उ. ३. १. १
११८. वे. सा. २०३–२०९
११९. यो. सू. ३. ३
१२०. यो. सू. १. १७
१२१. छा. उ. ६. १. ४
१२२. छा. उ. ३. ४. १
१२३. छा. उ. ६. ८. ७
१२४. गी. ७. १९
१२५. उप. सा. १. १०. १
१२६. यो. सू. १. १८
१२७. प. द. १. ५५
१२८. प. द. १. ५६
१२९. वे. सा. २०९–२१४
१३०. यो. सू. ३. ७
१३१. यो. सू. २. ३०
१३२. दक्षसंहिता. द्र. वि. म., वे. सा. २१०
१३३. यो. सू २. ३२
१३४. दक्षसंहिता. द्र. वि. म. वे. सा. २१०
१३५. उप. सा. २. १७. २४
१३६. यो. सू. २. ३३
१३७. वे. सा. १४०
१३८. यो. सू. २. ४६
१३९. वे. सा. १४२
१४०. वे. सा. १४२
१४१. यो. सू. २. ५४
१४२. वे. सा. १४३
१४३. यो. सू. ३. १
१४४. वे. सा. १४४
१४५. यो. सू. ३, २
१४६. यो. सू. ३. ३
१४७. यो. सू. ३. ४
१४८. यो. सू. ३. ८
१४९. अ. सि. ८९०–१
१५०. छा. उ. ६. १४. २
१५१. गी. ४. ३७
१५२. मु. उ. २. २. ८
१५३. छा. उ. ५, २४. ३

१५४. बृ. उ. ४. ४. ६
१५५. गी. ४. ३७
१५६. मु. उ. २. २. ८
१५७. बृ. उ. ४. ४. १९
१५८. ब्र. अ. सि. ८९१
१५९. श्वे. उ. १. १०
१६०. मुक्तिक. उ. २. ७६
१६१. तेजो बि. उ. ४. ३३
१६२. तेजो बि. उ. ४. ५१
१६३. तेजो बि. उ. ४. ३६
१६४. बृ. उ. ३. २. ११
१६५. बृ. उ. ४. ४. ६
१६६. बृ. उ. ४. ४. ६
१६७. मु. उ. २. २. ९
१६८. छा. उ. ४. १५. ६
१६९. बृ. उ. ६. २. १५
१७०. बृ. उ. ६. २. २५